1.	अक्षुणदम्	अक्षुन्द्व	अक्षुन्द्म	अक्षुन्दि	अक्षुन्द्वहि	अक्षुन्द्महि
2.	अक्षुणः— अक्षुणत्-द्	अक्षुन्तम्	अक्षुन्त	अक्षुन्थाः	अक्षुन्दाथाम्	अक्षुन्द्ध्वम्
3.	अक्षुणत्-द्	अक्षुन्ताम्	अक्षुन्दन्	अक्षुन्त	अक्षुन्दाताम्	अक्षुन्दत

Imperat.

1.	क्षुणदानि	क्षुणदाव	क्षुणदाम	क्षुणदै	क्षुणदावहै	क्षुणदामहै
2.	क्षुन्द्धि	क्षुन्तम्	क्षुन्त	क्षुन्त्स्व	क्षुन्दाथाम्	क्षुन्द्ध्वम्
3.	क्षुणत्तु	क्षुन्ताम्	क्षुन्दन्तु	क्षुन्ताम्	क्षुन्दाताम्	क्षुन्दताम्

Pot.

1.	क्षुन्द्याम्	क्षुन्द्याव	क्षुन्द्याम	क्षुन्दीय	क्षुन्दीवहि	क्षुन्दीमहि
2.	क्षुन्द्याः	क्षुन्द्यातम्	क्षुन्द्यात	क्षुन्दीथाः	क्षुन्दीयाथाम्	क्षुन्दीध्वम्
3.	क्षुन्द्यात्	क्षुन्द्याताम्	क्षुन्द्युः	क्षुन्दीत	क्षुन्दीयाताम्	क्षुन्दीरन्

तृह् P. to kill.

	Pre.			*Imperf.*		
1.	तृणेह्मि *	तृंह्वः	तृंह्मः	अतृणहम्	अतृंह्व	अतृंह्म
2.	तृणेक्षि	तृण्ढः	तृण्ढ	अतृणेट्—ड्	अतृण्ढम्	अतृण्ढ
3.	तृणेढि	तृण्ढः	तृंहन्ति	अतृणेट्—ड्	अतृण्ढाम्	अतृंहन्

	Imperat			*Pot.*	
S.	D	P.	S	D	P
1. तृणहानि	तृणहाव	तृणहाम	तृह्याम्	तृह्याव	तृह्याम
2. तृण्ढि	तृण्ढम्	तृण्ढ	तृह्याः	तृह्यातम्	तृह्यात
3. तृणेढु	तृण्ढाम्	तृहन्तु	तृह्यात्	तृह्याताम्	तृह्युः

* पिष् P. to grind.

Present			*Imperfect*		
1. पिनष्मि	पिंष्वः	पिंष्मः	अपिनषम्	अपिंष्व	अपिंष्म
2. पिनक्षि	पिंष्ठः	पिंष्ठ	अपिनट्–ड्	अपिंष्टम्	अपिंष्ट
3. पिनष्टि	पिंष्टः	पिंषन्ति	अपिनट्–ड्	अपिंष्टाम्	अपिंषन्

Imperat			*Pot*		
1. पिनषाणि	पिनषाव	पिनषाम	पिंष्याम्	पिंष्याव	पिंष्याम
2. पिण्ड्ढि †	पिंष्टम्	पिंष्ट	पिंष्याः	पिंष्यातम्	पिंष्यात
3. पिनष्टु	पिंष्टाम्	पिंषन्तु	पिंष्यात्	पिंष्याताम्	पिंष्युः

¶ रिच् P Â. to evacuate.

Present					
1. रिणच्मि	रिञ्च्वः	रिञ्च्मः	रिञ्चे	रिञ्च्वहे	रिञ्च्महे
2. रिणक्षि	रिङ्क्थः	रिङ्क्थ	रिङ्क्षे	रिञ्चाथे	रिङ्ग्ध्वे
3. रिणक्ति	रिङ्क्तः	रिञ्चन्ति	रिङ्क्ते	रिञ्चाते	रिञ्चते

Imperfect					
1. अरिणचम्	अरिञ्च्व	अरिञ्च्म	अरिञ्चि	अरिञ्च्वहि	अरिञ्च्महि
2. अरिणक्–ग्	अरिङ्क्तम्	अरिङ्क्त	अरिङ्क्थाः	अरिञ्चाथाम्	अरिङ्ग्ध्वम्
3. अरिणक्–ग्	अरिङ्क्ताम्	अरिञ्चन्	अरिङ्क्त	अरिञ्चाताम्	अरिञ्चत

Imperat.					
1. रिणचानि	रिणचाव	रिणचाम	रिणचै	रिणचावहै	रिणचामहै
2. रिङ्ग्धि	रिङ्क्तम्	रिङ्क्त	रिङ्क्ष्व	रिञ्चाथाम्	रिङ्ग्ध्वम्
3. रिणक्तु	रिङ्क्ताम्	रिञ्चन्तु	रिङ्क्ताम्	रिञ्चाताम्	रिञ्चताम्

* शिष् P 'to distinguish' ought to be similarly conjugated.

† or पिण्ढि see note † page 29

¶ विच् P Â to separate तञ्च् P to contract and पृच् P to touch, ought to be similarly conjugated

Pot.

	S.	D.	P.	S.	D.	P.
1.	रिञ्च्याम्	रिञ्च्याव	रिञ्च्याम	रिञ्चीय	रिञ्चीवहि	रिञ्चीमहि
2.	रिञ्च्याः	रिञ्च्यातम्	रिञ्च्यात	रिञ्चीथाः	रिञ्चीयाथाम्	रिञ्चीध्वम्
3.	रिञ्च्यात्	रिञ्च्याताम्	रिञ्च्युः	रिञ्चीत	रिञ्चीयाताम्	रिञ्चीरन्

§ युज् P. Â. to join.

Present.

1.	युनज्मि	युञ्ज्वः	युञ्ज्मः	युञ्जे	युञ्ज्वहे	युञ्ज्महे
2.	युनक्षि	युङ्क्थः	युङ्क्थ	युङ्क्षे	युञ्जाथे	युङ्ग्ध्वे
3.	युनक्ति	युङ्क्तः	युञ्जन्ति	युङ्क्ते	युञ्जाते	युञ्जते

Imperf.

1.	अयुनजम्	अयुञ्ज्व	अयुञ्ज्म	अयुञ्जि	अयुञ्ज्वहि	अयुञ्ज्महि
2.	अयुनक्-ग्	अयुङ्क्तम्	अयुङ्क्त	अयुङ्क्थाः	अयुञ्जाथाम्	अयुङ्ग्ध्वम्
3.	अयुनक्-ग्	अयुङ्क्ताम्	अयुञ्जन्	अयुङ्क्त	अयुञ्जाताम्	अयुञ्जत

Imperat.

1.	युनजानि	युनजाव	युनजाम	युनजै	युनजावहै	युनजामहै
2.	युङ्ग्धि	युङ्क्तम्	युङ्क्त	युङ्क्ष्व	युञ्जाथाम्	युङ्ग्ध्वम्
3.	युनक्तु	युङ्क्ताम्	युञ्जन्तु	युङ्क्ताम्	युञ्जाताम्	युञ्जताम्

Pot.

1.	युञ्ज्याम्	युञ्ज्याव	युञ्ज्याम	युञ्जीय	युञ्जीवहि	युञ्जीमहि
2.	युञ्ज्याः	युञ्ज्यातम्	युञ्ज्यात	युञ्जीथाः	युञ्जीयाथाम्	युञ्जीध्वम्
3.	युञ्ज्यात्	युञ्ज्याताम्	युञ्ज्युः	युञ्जीत	युञ्जीयाताम्	युञ्जीरन्

रुध् P. Â. to obstruct.

Present.

1.	रुणध्मि	रुन्ध्वः	रुन्ध्मः	रुन्धे	रुन्ध्वहे	रुन्ध्महे
2.	रुणत्सि	रुन्द्धः *	रुन्द्ध *	रुन्त्से	रुन्धाथे	रुन्द्ध्वे
3.	रुणद्धि	रुन्द्धः *	रुन्धन्ति	रुन्द्धे	रुन्धाते	रुन्धते

§ भुज् P. to protect. Â. to eat. विज् P. to fear; to tremble वृज् P. to abandon and भञ्ज् P. to destroy are conjugated like युज् ° or रुध् रुध् &c.

Imperf.

	S.	D.	P.	S	D	P.
1.	अरुणधम्	अरुन्ध्व	अरुन्ध्म	अरुन्धि	अरुन्ध्वहि	अरुन्ध्महि
2.	अरुणत्-द् } अरुणः	अरुन्द्धम्	अरुन्द्ध	अरुन्द्धाः	अरुन्धाथाम्	अरुन्द्ध्वम्
3.	अरुणत्-द्	अरुन्द्धाम्	अरुन्धन्	अरुन्द्ध	अरुन्धाताम्	अरुन्धत

Imperative.

1.	रुणधानि	रुणधाव	रुणधाम	रुणधै	रुणधावहै	रुणधामहै
2.	रुन्द्धि	रुन्द्धम्	रुन्द्ध	रुन्त्स्व	रुन्धाथाम्	रुन्द्ध्वम्
3.	रुणद्धु	रुन्द्धाम्	रुन्धन्तु	रुन्द्धाम्	रुन्धाताम्	रुन्धताम्

Pot

1.	रुन्ध्याम्	रुन्ध्याव	रुन्ध्याम	रुन्धीय	रुन्धीवहि	रुन्धीमहि
2.	रुन्ध्याः	रुन्ध्यातम्	रुन्ध्यात	रुन्धीथाः	रुन्धीयाथाम्	रुन्धीध्वम्
3.	रुन्ध्यात्	रुन्ध्याताम्	रुन्ध्युः	रुन्धीत	रुन्धीयाताम्	रुन्धीरन्

हिंस्. P. to kill

	Pre			*Imperf*		
1	हिनस्मि	हिंस्वः	हिंस्मः	अहिनसम्	अहिंस्व	अहिंस्म
2.	हिनस्सि	हिंस्थः	हिंस्थ	अहिनत्-द्-अहिनः	अहिंस्तम्	अहिंस्त
3	हिनस्ति	हिंस्तः	हिंसन्ति	अहिनत्-द्	अहिंस्ताम्	अहिंसन्

	Imperat.			*Pot*		
1.	हिनसानि	हिनसाव	हिनसाम	हिंस्याम्	हिंस्याव	हिंस्याम
2.	हिन्धि	हिंस्तम्	हिंस्त	हिंस्याः	हिंस्यातम्	हिंस्यात
3.	हिनस्तु	हिंस्ताम्	हिंसन्तु	हिंस्यात्	हिंस्याताम्	हिंस्युः

SECTION V. (cl. 8)

* तन् P. Â to spread.

Present.

1.	तनोमि	तनुवः-तन्वः	तनुमः-तन्मः	तन्वे	तनुवहे-तन्वहे	तनुमहे-तन्महे
2.	तनोषि	तनुथः	तनुथ	तनुषे	तन्वाथे	तनुध्वे
3.	तनोति	तनुतः	तन्वन्ति	तनुते	तन्वाते	तन्वते

---

* तनादिकृञ्भ्य उः ॥ तनादेः कृञश्च उप्रत्ययः स्यात् कर्त्रर्थे सार्वधातुके परे। शपोऽपवादः। उ is added to the roots of the eighth class beginning with तन् and to the root कृ in the conjugational tenses.

Imperf.

	S	D.	P.	S.	D.	P.
1.	अतनवम्	अतनुव / अतन्व	अतनुम / अतन्म	अतन्वि	अतनुवहि / अतन्वहि	अतनुमहि / अतन्महि
2.	अतनोः	अतनुतम्	अतनुत	अतनुथाः	अतन्वाथाम्	अतनुध्वम्
3	अतनोत्	अतनुताम्	अतन्वन्	अतनुत	अतन्वाताम्	अतन्वत

Imperat.

1.	तनवानि	तनवाव	तनवाम	तनवै	तनवावहै	तनवामहै
2.	तनु	तनुतम्	तनुत	तनुष्व	तन्वाथाम्	तनुध्वम्
3.	तनोतु	तनुताम्	तन्वन्तु	तनुताम्	तन्वाताम्	तन्वताम्

Pot.

1.	तनुयाम्	तनुयाव	तनुयाम	तन्वीय	तन्वीवहि	तन्वीमहि
2.	तनुयाः	तनुयातम्	तनुयात	तन्वीथाः	तन्वीयाथाम्	तन्वीध्वम्
3.	तनुयात्	तनुयाताम्	तनुयुः	तन्वीत	तन्वीयाताम्	तन्वीरन्

कृ P. Â. *to do.*

Present

1.	करोमि	कुर्वः §	कुर्मः †	कुर्वे	कुर्वहे	कुर्महे
2.	करोषि	कुरुथः	कुरुथ	कुरुषे	कुर्वाथे	कुरुध्वे
3.	करोति	कुरुतः	कुर्वन्ति	कुरुते	कुर्वाते	कुर्वते

Imperf

1.	अकरवम्	अकुर्व	अकुर्म	अकुर्वि	अकुर्वहि	अकुर्महि
2.	अकरोः	अकुरुतम्	अकुरुत	अकुरुथाः	अकुर्वाथाम्	अकुरुध्वम्
3.	अकरोत्	अकुरुताम्	अकुर्वन्	अकुरुत	अकुर्वाताम्	अकुर्वत

Imperat

1.	करवाणि	करवाव	करवाम	करवै	करवावहै	करवामहै
2	कुरु	कुरुतम्	कुरुत	कुरुष्व	कुर्वाथाम्	कुरुध्वम्
3	करोतु	कुरुताम्	कुर्वन्तु	कुरुताम्	कुर्वाताम्	कुर्वताम्

§ अत उत्सार्वधातुके ॥ उप्रत्ययान्तस्य कृञोऽकारस्य उः स्यात्सार्वधातुके क्ङिति । कृ is changed to कुर् before the weak terminations

† नित्यं करोतेः ॥ करोतेः प्रत्ययोकारस्य नित्यं लोपः स्यान्म्वोः परयोः । The Vikarana उ is dropped before व् and म्.

	S.	D.	P.	S.	D.	P.
1.	कुर्याम् ¶	कुर्याव	कुर्याम	कुर्वीय	कुर्वीवहि	कुर्वीमहि
2.	कुर्याः	कुर्यातम्	कुर्यात	कुर्वीथाः	कुर्वीयाथाम्	कुर्वीध्वम्
3.	कुर्यात्	कुर्याताम्	कुर्युः	कुर्वीत	कुर्वीयाताम्	कुर्वीरन्

SECTION VI (cl. 9)

क्री P. Â. to buy.

Present.

1.	क्रीणामि ‡	क्रीणीवः §	क्रीणीमः	क्रीणे	क्रीणीवहे	क्रीणीमहे
2.	क्रीणासि	क्रीणीथः	क्रीणीथ	क्रीणीषे	क्रीणाथे	क्रीणीध्वे
3.	क्रीणाति	क्रीणीतः	क्रीणन्ति †	क्रीणीते	क्रीणाते	क्रीणते

Imperf.

1.	अक्रीणाम्	अक्रीणीव	अक्रीणीम	अक्रीणि	अक्रीणीवहि	अक्रीणीमहि
2.	अक्रीणाः	अक्रीणीतम्	अक्रीणीत	अक्रीणीथाः	अक्रीणाथाम्	अक्रीणीध्वम्
3.	अक्रीणात्	अक्रीणीताम्	अक्रीणन्	अक्रीणीत	अक्रीणाताम्	अक्रीणत

Imperat.

1.	क्रीणानि	क्रीणाव	क्रीणाम	क्रीणै	क्रीणावहै	क्रीणामहै
2.	क्रीणीहि	क्रीणीतम्	क्रीणीत	क्रीणीष्व	क्रीणाथाम्	क्रीणीध्वम्
3.	क्रीणातु	क्रीणीताम्	क्रीणन्तु	क्रीणीताम्	क्रीणाताम्	क्रीणताम्

Pot.

1.	क्रीणीयाम्	क्रीणीयाव	क्रीणीयाम	क्रीणीय	क्रीणीवहि	क्रीणीमहि
2.	क्रीणीयाः	क्रीणीयातम्	क्रीणीयात	क्रीणीथाः	क्रीणीयाथाम्	क्रीणीध्वम्
3.	क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः	क्रीणीत	क्रीणीयाताम्	क्रीणीरन्

¶ ये च ॥ कृञ उ लोपः स्याद्यादौ प्रत्यये परे। उ is dropped in the case of the root कृ before the weak terminations beginning with य् in the conjugational tenses

‡ क्र्यादिभ्यः श्ना ॥ क्र्यादिभ्यो धातुभ्यः श्ना स्यात्कर्त्रर्थे सार्वधातुके परे। शपोऽपवादः। ना is added to the root of the 9th class.

§ ई हल्यघोः ॥ श्नाभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि न तु घुसंज्ञकस्य। The Wikarana ना and the roots of the 3rd conjugation (except the घु verbs i. e. दा धा &c.) substitute ई for आ before the weak terminations beginning with a consonant.

† श्नाभ्यस्तयोरातः ॥ अनयोरातो लोपः स्यात् क्ङिति सार्वधातुके। The आ of ना, दरिद्रा and the roots of the third class is dropped before the vowel weak terminations in the conjugational tenses.

. § स्तम्भ् P to obstruct or to stop.

	Pre			Imperf	
S	D.	P	S	D	P.
1. स्तभ्नामि	स्तभ्नाव	स्तभ्नीम	अस्तभ्नाम्	अस्तभ्नीव	अस्तभ्नीम
2. स्तभ्नासि	स्तभ्नीथ	स्तभ्नीथ	अस्तभ्ना	अस्तभ्नीतम्	अस्तभ्नीत
3. स्तभ्नाति	स्तभ्नीत	स्तभ्नन्ति	अस्तभ्नात्	अस्तभ्नीताम्	अस्तभ्नन्
	Imperat			Pot	
1. स्तभ्नानि	स्तभ्नाव	स्तभ्नाम	स्तभ्नीयाम्	स्तभ्नीयाव	स्तभ्नीयाम्
2 स्तभान*	स्तभ्नीतम्	स्तभ्नीत	स्तभ्नीया	स्तभ्नीयातम्	स्तभ्नीयात
3 स्तभ्नातु	स्तभ्नीताम्	स्तभ्नन्तु	स्तभ्नीयात्	स्तभ्नीयाताम्	स्तभ्नीयुः

§ The penult mute nassal is dropped (ch IV - 5°).

* हल श्नः शानज्झौ ॥ हल उत्तरस्य श्न शानजादेश स्याद्धौ परे। Roots of this conjugation ending in a consonant substitute आन for ना before the termination हि, हि is afterwards dropped as the base ends in अ(अतो हे ॥ अत परस्य हे र्लुक्स्यात्)

CHAPTER II.

Irregular verbs of the 1st, 4th, 6th and 9th classes.

SECTION I (cl 1)

1 उर्द् A to measure, to play ऊर्दते, ऊर्दाञ्चक्रे

2. कुर्द्. 3. खुर्द्. 4 गुर्द् A. to play कूर्दते खूर्दते गूर्दते.

5 हुर्छ् P. to retreat, to be crooked हूर्छति जुहूर्छ हूर्छिता

6 मुर्छ् P to be faint to increase. मूर्छति. मुमूर्छ मूर्छिता

7. स्फुर्छ् P to spread स्फूर्छति

8 स्फुर्ज् P to thunder स्फूर्जति.

9 उर्व् 10 तुर्व् 11 थुर्व् 12 दुर्व्. 13 धुर्व् P to kill ऊर्वति ऊर्वाञ्चकार ऊर्विता. तूर्वति तुतूर्व. तूर्विता. थूर्वति. दूर्वति धूर्वति.

14 गुर्व् P to endeavour गूर्वति जुगूर्व

15 मुर्व् P to bind मूर्वति.

16 पुर्व् P to fill पूर्वति.

1-16 उपधायां च ॥ धातोरुपधाभूतयो रेफवकारयोर्हल्परयो परत इको दीर्घ स्यात्। The long vowel is substituted for इ उ ऋ or ऌ preceding र् or व् penultimate of a root if र् or व् is followed by a consonant

17 गुप् P. to protect गोपायति.

18 धूप् P to heat धूपायति.

19 पण् Âtm to transact business पणते. he transacts business, to praise पणायति* he praises

20 पन् A. to praise पनायति*

21 ऋत् to censure, to be compassionate ऋतीयते, ऋतीयेते, ऋतीयन्ते.

22 कम् Â. to wish कामयते. कामयेते, कामयन्ते.

23 ष्ठिव् P. to spit ष्ठीवति, ष्ठीवतः ष्ठीवन्ति.

24 चम् P. to eat आचामति, आचामतः, आचामन्ति.

25 भ्राश् Â. to shine भ्राशते भ्राश्यते.

26 भ्लाश् Â. ,, भ्लाशते भ्लाश्यते.

27 भ्रम् P. to wander भ्रमति-भ्राम्यति.

28 क्रम् P. to step or walk क्रामति क्राम्यति.

29 लष् P Â. to desire लषति ते लष्यति ते.

17—20 गुपूधूपविच्छिपणिपनिभ्य आयः ॥ एभ्य आयप्रत्ययः स्यात्स्वार्थे । आय् is subjoined to these roots in the conjugational tenses. गुप् takes Guna before this आय्

* When पण् and पन् take the affix आय् in the sense of 'to praise they are conjugated in the Parasmaipada

21 ऋतेरीयङ् ॥ ऋतेः ईयङ् प्रत्ययः स्यात्स्वार्थे । The root ऋत् takes the affix ईय in the conjugational tenses it is one of the sootra verbs i e those noticed in the sutras

22 कमेर्णिङ् ॥ कमेर्णिङ् प्रत्ययः स्यात्स्वार्थे । ङकार आत्मनेपदार्थः । कम् takes अय् in the conjugational tenses Before this अय् the penultimate अ is lengthened

23—24 ष्ठिवुक्लमुचमां शिति ॥ एषामचो दीर्घः स्यात् शिति । The roots ष्ठिव्, क्लम् 4 P. and चम् with आ [आङि चम इति वक्तव्यम्] lengthen their vowel in the special tenses

25—26 वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ॥ एभ्यः श्यन् वा स्यात् कर्त्रर्थे सार्वधातुके परे । The roots भ्राश्, भ्लाश्, भ्रम्, क्रम्, क्लम् 4 P त्रस् 4 P त्रुट् 6 P and लष् optionally admit the Vikarana य in the special tenses.

28 क्रमः परस्मैपदेषु ॥ क्रमेर्दीर्घः स्यात् परस्मैपदे शिति ॥ क्रम्, lengthens its vowel in the parasmaipada.

13 यस् P to endeavour यस्यति यसति; with सम् *संयस्यति–संयसति.
14 जॄ P. to be old जीर्यति.
15 झॄ P. „ झीर्यति
16 शो. P. to make thin or sharpen श्यति. श्यतः. श्यन्ति.
17 छो P. to cut छ्यति. छ्यतः
18 सो P. to put an end to स्यति
19 दो P. to divide द्यति. द्यतः द्यन्ति.
20 जन् Â. to be produced जायते.
21 रञ्ज् P. Â to colour रज्यति ते.
22 भ्रंश् P. to fall. भ्रश्यति.
23 मिद् P. to be unctuous मेद्यति.
24 व्यध् P. to beat to tear, or to hurt विध्यति.

13—यसोऽनुपसर्गात् ॥ यसोऽनुपसर्गाद्वा श्यन् स्यात् । यस् admits य optionally unless it be joined with a proposition
* संयसश्च ॥ सम्पूर्वस्य यसेर्वा श्यन् स्यात् । With the preposition सम् यस् admits य optionally, but with any other prepostion it indispensably requires य, as प्रयस्यति.
14—15 (ch IV 4. 16)
16—19 ओतः श्यनि ॥ ओकारान्तस्य लोपः स्यात् श्यनि । Roots ending in ओ drop it before the य of the 4th class
20 ॥ ज्ञाजनोर्जा ॥ अनयोर्जादेशः स्याच्छिति । जा is substituted for ज्ञा and जन् the conjugational tenses
21—22 (ch IV. 2 52)
23 मिदेर्गुणः ॥ मिदेरिको गुणः स्यात् इत्संज्ञकशकारादौ प्रत्यये परे ॥ मिद् takes Guna in the special tenses
24 (ch. III. 2. 5+b; ch III 5. 52)

SECTION III. (cl. 6.)

1 भ्रस्ज् P. Â. to fry भृज्जति-न्ते
2 मस्ज् P. to purify by bathing मज्जति.
3 लस्ज् Â. to blush लज्जते.
4 व्रश्च् P to cut वृश्चति.
5 व्यच् P. to cheat विचति.
6 प्रच्छ् P. to ask पृच्छति.
7 इष् P. to wish इच्छति.

The Wikarana अ of this class is weak.
1. 3, 4, 5, 6 (ch III 2 5 +b) 1—2 भृस्ज्, मस्ज्, । स्तोः श्चुना श्चुः ॥ सकारतवर्गयोः शकारचवर्गाभ्यां सयोगे शकारचवर्गौ स्तः । अन्तरयान्यादेशयोर्यथासंख्यम् । (a) श् or a consonant of the palatal class is substituted for स् or a consonant of the dental class when they two are combined. भृश्ज्, मश्ज्, (ch III 2. 95 e) भृज्ज्, मज्ज्, 6 (ch. II I. 51)

7 त्रुट् P. cut त्रुट्यति त्रुटति.
8 विच्छ् P to go विच्छायति.
9 नू P to praise नुवति.
10 धू P to shake धुवति.
11 सू P. to direct, to send सुवति
12 धि P. to hold धियति.
13 दृ Â. to respect आद्रियते.
14 धृ Â. to remain, to hold ध्रियते.
15 वृ Â. to be busy व्याप्रियते.
16 मृ Â. to die म्रियते.
17 रि P to go रियति.
18 पि P to go पियति.
19 क्षि P. to dwell, to go क्षियति.
20 कॄ P. to spread किरति, किरत, उप प्रतिस्किरति *
21 गॄ P to swallow गिरति गिलति
22 सद् P to wither &c. सीदति.
23 शद् P to perish gradually शीयते.
24 लस्ज् A to feel shame लज्जते.
25 मुच् P Â. to release मुञ्चति ते.
26 लुप् P. Â. to cut लुम्पति ते.
27 विद् P. A. to get विन्दति ते.
28 लिप् P. A to paint लिम्पति-ते.
29 सिच् P. A to sprinkle सिञ्चति ते.
30 कृत् P. to cut कृन्तति.
31 खिद् P. to pain खिन्दति.
32 पिश् P. to form, to light पिंशति.

---

7 (ch II I 25) 8 (ch II I 17) 9—12 and 17—19 (ch. III I 4 ¶) also कू A to sound कुवते.

13 and 15 दृ is generally prefixed with आ and वृ with वि and आ.

13—16 (ch VI I 3 and ch III I 4 ¶) 20-21 (ch IV 4. 16)

20 * कृ See ch xv

21 अचि विभाषा॥गिरते रेफस्य लत्व वा स्यादजादौ प्रत्यये परे। र् of गॄ is changed to ल् optionally when it is followed by a termination beginning with a vowel

22—23 (sect 1 43 44) The root शद् takes Âtmanepada terminations in the conjugational tenses.

25—32 शेमुचादीनाम्॥मुचादीना नुमागम स्याच्छे परे। These roots admit a nasal in the special tenses.

33 तुम्फ् P. to be satisfied तृम्फति.
34 तुम्प् P. to kill तुम्पति.
35 तुम्फ् P. to kill तुम्फति.
36 दृम्फ् P. to give pain दृम्फति.
37 ऋम्फ् P. to kill ऋम्फति.
38 गुम्फ् P. to string गुम्फति.
39 उम्भ् to fill उम्भति.
40 शुम्भ् to shine शुम्भति.

33—40 शे तृम्फादीनां नुम्वाच्यः ॥ Penultimate (न्) of a root belonging to the sixth class, is not dropped before the sign श (exception to note * p. 2)

SECTION IV. (cl 9)

1 स्कु P. A. to go by lips; to lift स्कुनाति स्कुनीते; स्कुनोति स्कुनुते.
2 स्तम्भ् P. to obstruct or to stop स्तम्नाति; स्तम्नोति.
3 स्तुम्भ् P. to stop; to extirpate स्तुम्नाति; स्तुम्नोति.
4 स्कम्भ् P. to obstruct or to stop स्कम्नाति; स्कम्नोति.
5 स्कुम्भ् P. to obstruct; to hold स्कुम्नाति; स्कुम्नोति.
6 पू P. A. to purify पुनाति-पुनीते.
7 लू ,, to cut लुनाति लुनीते.
8 स्तॄ ,, to cover स्तृणाति-स्तृणीते.
9 कॄ ,, to injure कृणाति-कृणीते.
10 वॄ ,, to choose वृणाति-वृणीते.
11 धू ,, to shake धुनाति-धुनीते.
12 शॄ P. to destroy शृणाति.
13 वॄ P. to choose; to support वृणाति.
14 पॄ ,, to protect; to fill पृणाति.
15 भॄ ,, to censure, to support. भृणाति.
16 मॄ ,, to kill मृणाति.
17 दॄ ,, to tear दृणाति.
18 जॄ (झॄ, धॄ) P. to be old जृणाति, झृणाति; धृणाति.
19 नॄ P. to lead नृणाति.
20 कॄ P. to kill कृणाति.
21 ऋ P. to go ऋणाति.
22 गॄ P. to sound गृणाति.
23 ज्या P. to be old जिनाति.
24 री P. to go; to howl रिणाति
25 ली P to embrace लिनाति.

1—5 स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्य श्नुश्च ॥ एतेभ्य श्नाप्रत्ययो भवति श्नुश्च । The roots admit नु or ना in the special tenses.

2—5 These are soutra roots written sometimes as स्तम्, स्तुम्, स्कम्, and स्कु

6—27 प्वादीनां ह्रस्वः ॥ प्वादीनां ह्रस्व. स्याच्छिति परे ॥ These roots shorten the vowel in the special tenses

26 व्ली P. to choose व्लिनाति.
27 प्ली P. to go प्लिनाति.
28 व्री P to choose व्रीणाति-व्रिणाति.
29 भ्री P. to fear, to support भ्रीणाति-भ्रिणाति.
30 क्षी ,, to kill क्षीणाति-क्षिणाति.
31 ज्ञा P Â. know जानाति जानीते.
32 खच् P. to be past birth खश्नाति; some read खव्; खौनाति+
33 ग्रह् P. Â. गृह्णाति गृह्णीते.
34 क्षुभ् P. to tremble क्षुभ्नाति.

---

28 हलः ॥ अङ्गावयवाद्धलः परं यत्सम्प्रसारणं तदन्ताङ्गस्य दीर्घं स्यात् । If a root beginning with a conjunct consonant ends in इ or उ, substituted for य् or व्, the short इ or उ is changed to ई or ऊ, as ज्या by ch III. 2 5+b becomes जि, जि now by this rule is changed to जी. By the preceding rule प्वादीनां ह्रस्वः, ज्ि shortens its vowel जिनाति.

28—30 These roots shorten their vowel optionally

31 (sect 2. 20) 32+खव्+ना, by ch IX. § 23, we have ख+ऊ+ना (ch III. 2 5 + b)

by note+on ई 2. P ch. XV खौनाति 33

34 क्षुभ्नादिषु च ॥ न् in क्षुभ्ना, नृनमन. हरिनन्दी &c is not changed to ण् exception to 22 b c P 63

CHAPTER III.

Perfect.

SECTION I.

* Set roots ending in vowels.

Terminations.

	$ *Parasmaipada.*			¶ *Âtmanepada.*	
S.	D.	P.	S.	D.	P.
1. अ	व	म	ए	वहे	महे
2. थ	अथुस्	अ	से	आथे	ध्वे
3. अ	अतुस्	उस्	ए	आते	इरे

Par. भू 1. P. to be, भू 1. Â. to get. Âtm.

1. बभूव	बभूविव**	बभूविम	बभूवे	बभूविवहे	बभूविमहे
2. बभूविथ**	बभूवथुः	बभूव	बभूविषे §	बभूवाथे	बभूविध्वे ढ्वे ‡‡
3. बभूव	बभूवतुः	बभूवुः	बभूवे	बभूवाते	बभूविरे

*ऊदृदन्तैर्यौतिरुक्ष्णुशीस्नुनुक्षुश्विडीङ्श्रिभिः
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥

All roots ending in ऊ and ॠ and यु, रु, क्ष्णु, शी, स्नु, नु क्षु, श्वि, डी, श्रि, वृ, (9th cl Âtm) and वृ (5th cl. P. Â.) are set, while other monosyllabic roots ending in vowels are anit.

§ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥ लिट तिबादीनां नवानां णलादयो नव स्युः णल्, (अ) अतुस्, उस्; थल् (थ) अथुस्, अ, णल् (अ), व and म.

† लिटस्तझयोरेशिरेच् ॥ लिडादेशयोस्तझयोरेश् इरेच् एतौ स्तः । The Âtmanepada terminations of the Perfect are the same as those of the second division of the special tenses (except the 3rd pers. sing. and plural), ए (एश्) and इरे (इरेच्) are put instead of ते and अते (झ).

The singulars of the Parasmaipada are strong, the duals and plurals of the Par. and all persons of the Âtmanepada are weak.

1 भू+अ । भुवो वुग् लुङ्लिटोः ॥ भुवो वुगागमः स्याल्लुङ्लिटोरचि । (a) भू- admits व् before the terminations beginning with vowels in the Aorist and Perfect. भूव्+अ । लिटि धातोरनभ्यासस्य ॥ लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्त आदिभूतादचः परस्य तु द्वितीयस्य । (b) The root is reduplicated in the

2 स्तृ 9 P. Â. to cover.

	Par. S.	Par. D.	Par. P.	Âtm. S.	Âtm. D.	Âtm. P.
1.	तस्तार तस्तर*	तस्तरिव¶	तस्तरिम	तस्तरे	तस्तरिवहे	तस्तरिमहे
2.	तस्तरिथ	तस्तरथु	तस्तर	तस्तरिषे	तस्तराथे	तस्तरिध्वे ढ्वे
3.	तस्तार	तस्तरतु	तस्तरु:	तस्तरे	तस्तराते	तस्तरिरे

Perfect भूव् भूव्+अ । हलादि शष ॥ अभ्यासस्यादिर्हल् शिष्यते । अन्येहला लुप्यन्ते । (c) The first consonant of the reduplicatve syllable is retained, while others are dropped, so we have भू भूव्+अ । ह्रस्व ॥ अभ्यासस्याचो ह्रस्व स्यात् । (d) A short vowel is substituted for the long one (if there be any) of the reduplicative syllable.

भूभूव्+अ । भवतेर ॥ भवतेरभ्यासोकारस्य अ स्याल्लिटि । (e) अ is substituted for उ in the reduplicative syllable of भू मभूव्+अ । अभ्यास चर्च ॥अभ्यासे झशां चरः स्युर्जशश्च । झशां जश खयांचर । (f) the fourth letter, contained in the reduplicative syllable, of each of the five classes is changed to the third of its class, and the second to the first, the first and third letters and श्, ष्, and स् in the reduplicative, are not changed so we come to बभूव्+अ=बभूव

° ° आर्धधातुकस्येड्वलाद ॥ वलादेरार्ध धातुकस्येडागम स्यात् । इ is prefixed to the nonconjugational (or Ardha dhatuka) termination beginning with any consonant except य् i e set roots admit of इ before all Ardhadhatuka terminations beginning with any consonant except य्, anit roots of course, do not admit it. The Perfect, though it is a non-conjugational tense, is not affected by this rule In it all anit roots should be treated like set roots There are only eight roots following कृ that are really anit in the Perfect. See the subsequent Karika अजन्तोऽकारवान्॰ on page 48

§ see ch III 23 c d

‡‡इण षीध्वलुङ्लिटां धोऽङ्गात्॥इण तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य मूर्धन्यः स्यात् । The ध् of the terminations षीध्वम्, ध्वम् and ध्वे of the 2nd pers. plur Benedictive Aorist and Perfect Âtm. must be changed to ढ् when they are preceded by an inflective root ending in any vowel except अ or आ or in one of the consonants य्, व्, र्, ल् or ह्, as rt. च्यु च्योषीढ्वम्. अचोढ्वम् rt. कृ. चकृढ्वे rt ह्वृ अगीढ्वम् (2nd pers pl. Aorist of the passive of ह्वृ 6 P) विभाषेट. ॥ इण परो य इट्तत परे षा षीध्वलुङ्लिटां धस्यवा मूर्धन्य स्यात् ।(b) ध् may optionally be changed to ढ् when the intermediate इ is prefixed to them, provided this इ be preceded by any vowel except अ or आ or by one of the consonants य्, व्, र्, ल्, or ह, rt, लू लविषीध्वम्-लविषीढ्वम्. अलविध्वम्-अलविढ्वम्. लुलविध्वे लुलविढ्वे.

3. शॄ 9 P. to kill.

1.	शशार, शशर	शशरिव †, शश्रिव †	शशरिम, शश्रिम
2.	शशरिथ	शशरथुः, शश्रथुः	शशर, शश्र
3.	शशार	शशरतुः, शश्रतुः	शशरुः, शश्रुः

4 यु 2. P. to join; to *Separate.*

1.	युयाव, युयव	युयुविव§	युयुविम
2.	युयविथ	युयुवथुः	युयुव
3.	युयाव	युयुवतुः	युयुवुः

5 रु P. to sound. 1. Â to go &c.

	S.	P.	S.	P.
1.	रुराव, रुरव	रुरुविम	रुरुवे	रुरुविमहे
2.	रुरविथ	रुरुव	रुरुविषे	रुरुविध्वे ढ्वे
3.	रुराव	रुरुवुः	रुरुवे	रुरुविरे

---

2 * स्तॄ + अ, by 1 b स्तृस्तृ, शर्पूर्वाः खयः ॥ अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते । हलादिः शेष इत्यस्यापवादः । (a) A hard letter, preceded by a sibilant, is retained in the reduplicative syllable (expection to 1 c.) तृस्तृ + अ, by 1 d तृस्तृ + अ; उरत् ॥ अभ्यास ऋवर्णस्य अत्स्यात् प्रत्यये परे । रपरत्वम् । (b) अ is substituted for ऋ in the reduplicative syllable तस्तृ + अ. The ending vowel takes Vriddhi optionally in the first and necessarily in the third person singular तस्तार तस्तर In the second person singular it takes Guna. तस्तरिथ.

ऋच्छत्यॄताम् ॥ तौदादिक ऋच्छेर्ऋ धातोर्ॠतां च गुणः स्याल्लिटि ॥ The roots ऋच्छ, ऋ and those that end in long ॠ change their vowel to अर् before the terminations of the perfect.

3 † शॄदॄप्रां ह्रस्वो वा ॥ एषां किति लिटि ह्रस्वो वा स्यात् । पक्षे गुणः ॥ शॄ, दॄ, and पॄ shorten their vowel optionally before the weak terminations of the Perfect. ददार, ददरतु –दद्रतु ; ददरु –दद्रु । पपार, पपरतु पप्रतु , पपरु –पप्रु ॥

4 § अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ श्नुप्रत्ययान्तस्येवर्णोवर्णान्तधातोर्भ्रू इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे । ङिच्च तादेशः । The ending इ or उ (short or long) of an inflective root is changed to इय् or उव् respectively when followed by vowel weak terminations, the Vikarana नु and भ्रू likewise change their vowels to उव्, प्राप्नुवन्ति, भ्रुवौ, भ्रुव &c.

6 क्ष्णु 2 P to sharpen — 7 शी 2 Ā to sleep.

	S	P	S	P
1	चुक्ष्णाव, चुक्ष्णव	चुक्ष्णुविम	शिश्ये	शिश्यिमहे
2	चुक्ष्णविथ	चुक्ष्णुव	शिश्यिषे	शिश्यिध्वे ढ्वे
3	चुक्ष्णाव	चुक्ष्णुवुः	शिश्ये	शिश्यिरे

8 स्नु 2 P to drop. — 9 नु 2 P. to praise — 10 क्षु 2 P to sneeze

1	सुष्णाव } सुष्णव	सुष्णुविम	नुनाव } नुनव	नुनुविम	चुक्षाव } चुक्षव	चुक्षुविम
2	सुष्णविथ	सुष्णुव	नुनविथ	नुनुव	चुक्षविथ	चुक्षुव
3	सुष्णाव	सुष्णुवुः	नुनाव	नुनुवुः	चुक्षाव	चुक्षुवुः

11 श्वि 1 P to swell, to go. 12 डी 1 4 Ā to fly.

1	शिश्वाय शुशाव } शिश्वय, शुशव	शिश्वियिम } शुशुविम	डिड्ये	डिड्यिमहे
2	शिश्वयिथ } शुशविथ	शिश्विय } शुशुव	डिड्यिषे	डिड्यिध्वे ढ्वे
3	शिश्वाय } शुशाव	शिश्वियुः } शुशुवुः	डिड्ये	डिड्यिरे

---

6 कुहोश्चु ॥ अभ्यास कवर्गह कारयोश्चवर्गादेश स्यात् । A guttural in the reduplicative syllable is changed to the corresponding palatal. ह् undergoes the same change i. e it is changed to ज्

7 एरनेकाचोऽसयोगपूर्वस्य ॥ धात्ववयव सयोग पूर्वो न भवति य इवर्ण स्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्ययण् स्यादजादौ प्रत्यये परे । An inflective root, consisting of more than one syllable and ending in इ or ई, not preceded by a conjunct consonant, changes it (इ or ई) to य् before the weak terminations beginning with vowels

8 सेकसृप्सृस्तृसृजस्तृस्त्यान्ये दन्त्याजन्तसादय एवाच पोपदेशा ष्वष्क् स्विदस्वद्स्वञ्जस्वपास्मिड (a) All monosyllabic roots beginning with स् which is immediately followed by a vowel or dental (except सेक्, सृप्, सृ, स्तृ, सृज, स्तृ, and स्त्यै and ष्वष्क्, स्विद्, स्वद्, स्वञ्ज्, स्वप्, and स्मि are to be considered as roots beginning with ष ,thus the root स्नु is to be considered as ष्णु धात्वादे ष स ॥ धातोरादे षस्यस स्यात् । (b) स् is substituted for the initial ष् of a root, accordingly ष्णु becomes स्नु स् in स्नु is now a substitute and is, there fore changed to ष् (ch III 3 23 c. d) Or स of tnese roots is changed to ष् it it is preceded by any vowel except अ or आ or by a semi vowel, ह् or a guttural.

13 श्रि I. P. Â. to serve. 14 वृ . Â. to worship.

	S.	P.	S.	P.	S.	P.
1.	शिश्राय } शिश्रय }	शिश्रियिम	शिश्रिये	शिश्रियिमहे	वव्रे	ववृमहे †
2.	शिश्रयिथ	शिश्रिय	शिश्रियिषे	शिश्रियिध्वे-ढ्वे	ववृषे	ववृढ्वे
3.	शिश्राय	शिश्रियुः	शिश्रिये	शिश्रियिरे	वव्रे	वव्रिरे

15 वृ 5. P. Â. to choose.

	Par.		Âtm.	
1.	ववार-ववर	ववृम†	वव्रे	ववृमहे
2.	ववर्थ (वेदे) *ववरिथ	वव्र	ववृषे	ववृढ्वे
3.	ववार	वव्रुः	वव्रे	वव्रिरे

SECTION II.

The following are the anit roots ending in consonants.

शक्लृपच्मुचिरिच्वच्विच् सिच्प्रच्छित्यज्निजिर्भजः ।
भञ्ज्भुज्भ्रस्ज्मस्जियज्युज्रुज् रञ्ज्विजिर्स्वञ्जिसञ्ज्सृजः ॥
अद्क्षुद्खिद्छिद्तुदिनुदः पद्यभिद्विद्यतिर्विनद् ।
शद्सदीस्विद्यतिःस्कन्दि हदीक्रुध्क्षुधिबुध्यती ॥
बन्धिर्युधिरुधीराधि व्यध्शुधःसाधिसिध्यती ।
मन्यहन्नाप्क्षिप्छुपितप् तिपस्तृप्यतिदृप्यती ॥
लिप्लुप्वप्शप्स्वप् सृपियभ् रभ्लभ्गम्नम्यमोरमिः ।
क्रुशिर्दंशिदिशीदृश्मृश् रिश्रुश्लिश्विश्स्पृशःकृषिः ॥
त्विष्तुष्द्विष्दुष्पुष्यपिष्विष् शिष्शुष्श्लिष्यतयो घसिः ।

11 विभाषा श्वेः ॥ श्वयतेः सम्प्रसारणं वास्याल्लिटि यङि च। श्वि takes सम्प्रसारण optionally in the Perfect and Freequentive i. e. its base becomes शुशु or शिश्वि; शोशूयते-शेश्वीयते.

14 † कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ एभ्यो लिट इण् न स्यात् । प्रकृत्याश्रयः प्रत्ययाश्रयोऽपि यावन्निषेधः सोऽलिटिचत्तद्विक्रयादिभ्य एव ॥ In the case of these roots इ is not prefixed to the consonantal terminations of the Perfect.

* The form ववर्थ (without the intermediate इ) is restricted to the vedic language; hence the form ववरिथ is used in common speech [बभूथा ततन्थजगृभ्मववर्थेतिनिगमे]

वसतिर्दिह्दिहिदुहो नह्मिह्रुह्लिह्नहिस्तथा ॥
अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम् ॥
*कचछजा दधनपा भमशाः षसहाः क्रमात् ॥
कै चं कौर्णौ पं टौ खडौ³ गै धँ ऑं छेखैर्जाः स्मृताः ॥

1 शक् P. 5. to be able. 2 पच् 1. P. Ā. to cook. 1 Ā. to make evident.

	S.	D.	P.	S.	D.	P.	S.	D.	P.
1.	शशाक / शशक	शेकिव	शेकिम	पपाच / पपच	पेचिव	पेचिम	पेचे	पेचिवहे	पेचिमहे
2.	शेकिथ / *शशक्थ	शेकथुः	शेक	पेचिथ / पपक्थ	पेचथुः	पेच	पेचिषे	पेचाथे	पेचिध्वे
3.	शशाक	शेकतुः	शेकुः	पपाच	पेचतुः	पेचुः	पेचे	पेचाते	पेचिरे

3 मुच् 6. P. Ā. to release. 4 रिच् 7. P. to purge. 1. P. to separate.

	S.	P	S.	P.	S.	P.	S	P.
1	मुमोच	मुमुचिम	मुमुचे	मुमुचिमहे	रिरेच	रिरिचिम	रिरिचे	रिरिचिमहे
2	मुमोचिथ	मुमुच	मुमुचिषे	मुमुचिध्वे	रिरेचिथ	रिरिच	रिरिचिषे	रिरिचिध्वे
3	मुमोच	मुमुचुः	मुमुचे	मुमुचिरे	रिरेच	रिरिचुः	रिरिचे	रिरिचिरे

---

* *In the first half of this verse the ending consonants of Anit roots are given In the second half the number of roots is given*

1 अत उपधायाः ॥उपधाया अतो वृद्धि. स्यात्ञिति णिति च प्रत्यये परे। णलुत्तमो वा॥ (b) उत्तमो णल् वा णित्स्यात्। Vriddhi is necessarily substituted for the penultimate अ of a root in the third and optionally in the first person singular.

§ अत एकहल्मध्येऽनादेशादेर्लिटि ॥ लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्यासंयुक्तहल्मध्यस्थस्याकारस्य एकारः स्यादभ्यासलोपश्च । Roots, which have an अ situated between two simple consonants and which do not change their initial letters in the reduplication, change the अ to ए and drop the reduplicative syllable before the weak terminations of the Perfect. थलि च सेटि ॥ this change, in similar circumstances, takes place before the termination इथ

* अजन्तोऽकारवान् वा यस्तास्यनिट् थलि वेडयम् ।
ऋदन्त ईदृङ्नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत् ॥

5 वच् 2 1. P to speak (including the substitute of ब्रू which is both P. Â)

6 विच् 7. P. Â to divide.

	S.	P.	S.	P.	S	P.	S	P.
1.	उवाच * उवच.	ऊचिम †	ऊचे	ऊचिमहे	विवेच	विविचिम	विविचे	विविचिमहे
2.	उवचिथ उवक्थ	ऊच	ऊचिषे	ऊचिध्वे	विवेचिथ	विविच	विविचिषे	विविचिध्वे
3.	उवाच	ऊचुः	ऊचे	ऊचिरे	विवेच	विविचुः	विविचे	विविचिरे

7 सिच् 6. P. Â. to sprinkle. 8 प्रच्छ् 6. P. to ask.

1.	सिषेच	सिषिचिम	सिषिचे	सिषिचिमहे	पप्रच्छ	पप्रच्छिम
2.	सिषेचिथ	सिषिच	सिषिचिषे	सिषिचिध्वे	पप्रच्छिथ पप्रष्ठ ‡	पप्रच्छ
3.	सिषेच	सिषिचुः	सिषिचे	सिषिचिरे	पप्रच्छ.	पप्रच्छुः

Roots of the anit class, which end in a vowel or have an अ in them, take इ optionally before the थ of the Perfect, while those (i. e. anit roots) ending in short ऋ reject it altogether before the same termination Others (except इ, स, भृ &c) do take इ before all the consonantal terminations.

† According to the rule इणः षीध्व on page 45 the form should be पेचिढ्वे but in the opinion of some the vowel इ, before षीध्वम्, ध्वम् and ध्वे must be distinct from the intermediate इ Both forms पेचिध्वे and पेचिढ्वे are correct एधिषीध्वम्—एधिषीढ्वम्, ऐधिढ्वम्—ऐधिध्वम्.

3 The penultimate short vowel takes its Guna substitute before the strong terminations of the Perfect.

5 इग्यणः संप्रसारणम् ॥ यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् । The change of य्, व्, र्, ल्, to इ, उ, ऋ, लृ respectively is called सम्प्रसारण.

० लिट्यभ्यासस्योभयेषाम् ॥ वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्याल्लिटि । All roots mentioned in the following two sutras undergo this change in the reduplicative syllable even before the strong terminations of the Perfect.

† वचिस्वपियजादीनां किति ॥ वचिस्वप्योर्यजादीनां च संप्रसारणं स्यात्किति । (a) The roots वच् (including the substitute of ब्रू) स्वप् and those of the यज् class i. e. यज्, वप्, वह, वस्, वे, व्ये, ह्वे वद्, and श्वि take सम्प्रसारण before the कित् weak terminations (i. e. generally before the weak terminations of the perfect, in the benedictive passive participle and gerund).



	9. त्यज् 1 P to abandon		10 निज् 3 P. Â to purify, to nurture			
	S	P.	S	P.	S	P.
1	तत्याज तत्यज	तत्यजिम	निनेज	निनिजिम	निनिजे	निनिजिमहे
2	तत्यजिथ तत्यक्थ	तत्यज	निनेजिथ	निनिज	निनिजिषे	निनिजिध्वे
3	तत्याज	तत्यजु	निनेज	निनिजु	निनिजे	निनिजिरे

	11 भज् 1 P. Â to worship				12 भञ्ज् 7. P to break or to destroy	
1	बभाज बभज	भेजिम	भेजे	भेजिमहे	बभञ्ज	बभञ्जिम †
2	भेजिथ बभक्थ	भेज	भेजिषे	भेजिध्वे	बभञ्जिथ बभङ्क्थ	बभञ्ज
3	बभाज	भेजु	भेजे	भेजिरे	बभञ्ज	बभञ्जु:

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च॥ एषां किति ङिति च संप्रसारणं स्यात् (b) The roots ग्रह्, ज्या, वय, (substituted for वे) व्यध्, वश्, व्यच, व्रश्च, प्रच्छ and भ्रस्ज् take संप्रसारण before the ङित् and कित् weak terminations (i e generally before the weak terminations of the Perfect and conjugational tenses as well as in the Benedictive Passive, participle gerund and frequentative), the three last, however, do not take it in the Perfect

8 ‡ व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः॥ व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च। ष् is substituted for the final of these roots and of those which end in छ or श् when they are followed by any consonant except a nasal or a semivowel or by nothing पप्रच्छ्+थ–पप्रष्+थ–पप्रष्ठ (note 102 b)

11 तॄफलभजत्रपश्च॥ एषां मत एत्वमभ्यासलोपश्च स्यात्किति लिटि सेटि थलि च। (a) राधो हिंसायाम्॥ राधो हिंसायामर्थेऽवर्णस्यैत्वमभ्यासलोपश्च स्यात्किति लिटि सेटि थलि च। (b) वा जॄभ्रमुत्रसाम्॥ एषां मेत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च। (c) फणां च सप्तानाम्॥ एषां मत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च। (d) the roots तॄ फल भज त्रप् and राध् when it means 'to kill' change their अ or आ to ए and drop the reduplicative syllable necessarily while जॄ भ्रम् त्रस् फण् राज भ्राज भ्राश्, भ्लाश स्यम् and स्वन् do it optionally before the weak terminations and इथ, the 2nd pers, singular of the

13 भुज् 7. P. to protect. Â. to eat. 6 P. to bend.

1. बुभोज	बुभुजिम	बुभुजे	बुभुजिमहे
2. बुभोजिथ	बुभुज	बुभुजिषे	बुभुजिध्वे
3. बुभोज	बुभुजुः	बुभुजे	बुभुजिरे

14 भ्रस्ज 6. P. Â. to fry.

Par. S	P.	Âtm. S.	P
1. बभर्ज-बभ्रज्ज	बभर्जिम, बभ्रज्जिम	बभर्जे, बभ्रज्जे	बभर्जिमहे, बभ्रज्जिमहे
2. बभर्जिथ बभ्रज्जिथ, बभर्ष्ठ बभ्रष्ठ *	बभर्ज, बभ्रज्ज	बभर्जिषे, बभ्रज्जिषे	बभर्जिध्वे, बभ्रज्जिध्वे
3. बभर्ज बभ्रज्ज	बभर्जु, बभ्रज्जु	बभर्जे, बभ्रज्जे	बभर्जिरे, बभ्रज्जिरे

15. मस्ज् 6 P. to purify; to immerse.

16 यज् 1 P Â. to worship a deity, to associate with; to sacrifice, to present or endow

1. ममज्ज	ममज्जिम	इयाज इयज	ईजिम	ईजे	ईजिमहे
2. ममज्जिथ ममङ्क्थ	ममज्ज	इयजिथ इयष्ठ	ईज	ईजिषे	ईजिध्वे
3 ममज्ज	ममज्जु	इयाज	ईजु	ईजे	ईजिरे

Perfect न शसददवादिगुणानाम् ॥ शसेर्ददे र्वकारादीनां गुणशब्देन भावितस्य च योऽकार
स्तस्यैत्वाभ्यासलोपौ न स्तः ॥ (c) The roots शस् दद् and those which begin
with व् and such roots as have an अ deduced from a guna element,
do not undergo this change (exception to 1 §)

12 + असंयोगाल्लिट् कित् ॥ असंयोगात्परोऽपिल्लिट् कित्स्यात् । The weak termi-
nations of the Perfect, subjoined to a root terminated by a conjunct con
sonant are strong, the root does not, therefore drop its nasal (see note°
page 2) 14 भ्रस्जो रोपधयोरमन्यतरस्याम् ॥ भ्रस्जे रेफस्योपधायाश्च स्थ न रमागमो
वास्यादार्धधातुके । मित्त्वादन्त्यादच परः ॥ स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः । र (रम)
may optionally be substituted for the penultimate स and the radical र् of
भ्रस्ज् before an Ardhadhatuke affix, thus it assumes two forms भर्ज and भ्रज्ज्
* बभ्रस्ज् + थ-बभ्रज् + थ (sect 3 26) बभ्रष् + थ (8 ‡) बभ्रष्ठ (102 b.)

15 मस्जिनशोर्झलि (मस्जेरन्त्यात्पूर्वो नुम् वाच्य) ॥ एतयो र्नुमागम स्याज्झलादौ.

17 युज् 7. P. Â to join 4. Â. to meditate. 1. P. to bind. 18 रुज् 6. P. to break

1. युयोज युयुजिम युयुजे युयुजिमहे रुरोज रुरुजिम
2. युयोजिथ युयुज युयुजिषे युयुजिध्वे रुरोजिथ रुरुज
3. युयोज युयुजुः युयुजे युयुजिरे रुरोज रुरुजुः

19 रञ्ज् 1. 4. P. A. to dye; to be intent. 20 विज् 3. P. Â. to divide.

	Par. S.	Par. P.	Âtm. S.	Âtm. P.	Par. S.	Par. P.	Âtm. S.	Âtm. P.
1	ररञ्ज	रराञ्जिम	ररञ्जे	ररञ्जिमहे	विवेज	विविजिम	विविजे	विविजिमहे
2	ररञ्जिथ / ररङ्क्थ	ररञ्ज	ररञ्जिषे	ररञ्जिध्वे	विवेजिथ	विविज	विविजिषे	विविजिध्वे
3.	ररञ्ज	ररञ्जु	ररञ्जे	ररञ्जिरे	विवेज	विविजुः	विविजे	विविजिरे

21 स्वञ्ज् 1. A. to embrace 22 सञ्ज् 1. P. to cling.

1. सस्वञ्जे-सस्वजे सस्वञ्जिमहे-सस्वजिमहे ससञ्ज ससञ्जिम
2. सस्वञ्जिषे-सस्वजिषे सस्वञ्जिध्वे-सस्वजिध्वे ससञ्जिथ-ससङ्क्थ ससञ्ज
3. सस्वञ्जे-सस्वजे सस्वञ्जिरे सस्वजिरे ससञ्ज ससञ्जुः

23 सृज् 4 Â to be abandoned; 6 P. to leave, to create 24 अद् 2. P. to eat.

1. ससर्ज ससृजिम ससृजे ससृजिमहे आद जघास-जघस आदिम जक्षिम†

प्रत्यये परे । मस्जेरन्त्यात्पूर्वोनुमस्यात् । न् is inserted before the last consonant of the verb मस्ज् and after the root नश् when they are followed by any consonant except a nasal or a semi-vowel ममज्ज्+थ ममम्न्ज्+थ-ममङ्क्थ sect 3 26)

21 श्रन्थिग्रन्थिदम्भिस्वञ्जीना लिटः कित्वेति व्याकरणान्तरम् । The roots श्रन्थ् 9.P. ग्रन्थ् 9 P दम्भ 5 P and स्वञ्ज् drop their nasal optionally before the weak terminations of the Perfect

22 विभाषा सृजिदृशो. ॥ आभ्या थल इड व स्यात् । (a) The roots सृज् and दृश् take ई optionally before थ. सृजिदृशोर्झल्यमकिति ॥ अनयो रमागमः स्या ज्झलादावकिति । (b) सृज् and दृश् substitute र for ऋ when followed by a strong termination beginning with any consonant except a nasal or a semi-vowel, or सृज and दृश् insert अ after ऋ when followed by &c.

24 लिट्यन्यतरस्याम् ॥ अदो घस्लृ वा स्याल्लिटि । घस् is optionally substituted for अद् in the perfect

2.	ससर्जिथ / सस्रष्ठ	ससृज	ससृजिषे	ससृजिध्वे	आदिथ*जघसिथ†	आद-जक्ष
3.	ससर्ज	ससृजुः	ससृजे	ससृजिरे	आद जघास	आदुः-जक्षुः

25 क्षुद् 7. P. A. to pound. 26 खिद् 4.7 Â. to be distressed 6. P. to distress.

	S.	P.	S	P.	S.	P.	S	P.
1.	चुक्षोद	चुक्षुदिम	चुक्षुदे	चुक्षुदिमहे	चिखेद	चिखिदिम	चिखिदे	चिखिदिमहे
2.	चुक्षोदिथ	चक्षुद	चुक्षुदिषे	चुक्षुदिध्वे	चिखेदिथ	चिखिद	चिखिदिषे	चिखिदिध्वे
3.	चुक्षोद	चुक्षुदुः	चुक्षुदे	चुक्षुदिरे	चिखेद	चिखिदुः	चिखिदे	चिखिदिरे

27 छिद् 7 P. Â. to divide, to split. 28 तुद् 6 A to inflict pain.

1.	चिच्छेद	चिच्छिदिम	चिच्छिदे	चिच्छिदिमहे	तुतोद	तुतुदिम	तुतुदे	तुतुदिमहे
2	चिच्छेदिथ	चिच्छिद	चिच्छिदिषे	चिच्छिदिध्वे	तुतोदिथ	तुतुद	तुतुदिषे	तुतुदिध्वे
3.	चिच्छेद	चिच्छिदुः	चिच्छिदे	चिच्छिदिरे	तुतोद	तुतुदुः	तुतुदे	तुतुदिरे

29 नुद् 6. P. Â. to drive and 6. P. 30 पद् 4. A. to go.

1.	नुनोद	नुनुदिम	नुनुदे	नुनुदिमहे	पेदे	पेदिमहे
2.	नुनोदिथ	नुनुद	नुनुदिषे	नुनुदिध्वे	पेदिषे	पेदिध्वे
3.	नुनोद	नुनुदुः	नुनुदे	नुनुदिरे	पेदे	पेदिरे

31 भिद् 7. P. Â. to tear to pieces. 32 विद् 4. Â. to be 33 विद् 7. Â to consider.

1.	बिभेद	बिभिदिम	बिभिदे	बिभिदिमहे	विविदे	विविदिमहे
2.	बिभेदिथ	बिभिद	बिभिदिषे	बिभिदिध्वे	विविदिषे	विविदिध्वे
3.	बिभेद	बिभिदुः	बिभिदे	बिभिदिरे	विविदे	विविदिरे

* इडत्त्यर्तिव्ययतानाम् ॥ अद्, ऋ व्येञ एभ्यस्थलो नित्य मिट् स्यात् । अद्, ऋ and व्ये admit इ necessarily before the termination थ

घसेस्तासावभावात्थले नित्यमिट् । †घस्, being the substitute for अद् admits इ necessarily before the same termination

† गमहनजनखनघसां लोप क्ङित्यनङि ॥ एषा मुपधाया लोपः स्यादजादौ क्ङिति न त्वङि । देभतु । सस्वजे । इतिभाष्योदाहरणादिन्देशानुनत्या इहाप्याश्रीयत । The radical vowel of गम्, हन्, जन्, खन्, and घस्, is dropped before the vowel weak terminations (not, however before the augment अ in the 2nd variety of the Aorist, as अगमत्, अघसत्) जघस् + इम-जघ्स् + इम-जक्षिम, घ् is changed to क् before the hard consonant स् which, being preceded by क् is changed to ष् (ch IV. 2. 85 b)

	34 शद् 1. 6. P. to perish gradually.		35 सद् 1. 6. P. to wither to destroy, to go. to be weary; 1. P. with आ to go.		36 स्विद् 4. P. to perspire.	
1.	शशाद-शशद	शेदिम	ससाद ससद	सेदिम	सिष्वेद	सिष्विदिम
2.	शेदिथ शशत्थ	शेद	सेदिथ ससत्थ	सेद	सिष्वेदिथ	सिष्विद
3.	शशाद	शेदुः	ससाद	सेदुः	सिष्वेद	सिष्विदुः

	37 स्कन्द् 1. P. to go, to be dry.		38 हद् 1. Â. to evacuate as fæce.		39 क्रुध् 4. P. to be angry.	
	S.	P.	S.	P.	S.	P
1.	चस्कन्द	चस्कन्दिम	जहदे	जहदिमहे	चुक्रोध	चुक्रुधिम
2.	चस्कन्दिथ-चस्कन्त्थ	चस्कन्द	जहदिषे	जहदिध्वे	चुक्रोधिथ	चुक्रुध
3.	चस्कन्द	चस्कन्दुः	जहदे	जहदिरे	चुक्रोध	चुक्रुधुः

	40 क्षुध् 4. P. to be hungry.		41 बुध् 4. Â. to be conscious.		42 बन्ध् 9. P. to bind.	
1.	चुक्षोध	चुक्षुधिम	बुबुधे	बुबुधिमहे	बबन्ध	बबन्धिम
2.	चुक्षोधिथ	चुक्षुध	बुबुधिषे	बुबुधिध्वे	बबन्धिथ बबन्द्ध*बबन्ध	
3.	चुक्षोध	चुक्षुधुः	बुबुधे	बुबुधिरे	बबन्ध	बबन्धुः

	43 युध् 4. A. to fight.		44 रुध् 7. P. Â. to oppose 4. Â. with अनु to desire.				45 राध् 4. P. intr. to grow 5. P. to accomplish.	
1.	युयुधे	युयुधिमहे	रुरोध	रुरुधिम	रुरुधे	रुरुधिमहे	रराध	रराधिम
2.	युयुधिषे	युयुधिध्वे	रुरोधिथ	रुरुध	रुरुधिषे	रुरुधिध्वे	रराधिथ	रराध
3.	युयुधे	युयुधिरे	रुरोध	रुरुधुः	रुरुधे	रुरुधिरे	रराध	रराधुः

	46 व्यध् 4. P. to strike.		47 शुध् 4. P. to be pure.	
1.	विव्याध विव्यध	विविधिम	शुशोध	शुशुधिम
2.	विव्यधिथ विव्यद्ध*	विविध	शुशोधिथ	शुशुध
3	विव्याध	विविधुः	शुशोध	शुशुधुः

* See 95 b 46 See notes 52 and 29 b. sect 5

45 राधोऽकर्मकाद्वृद्धावेव ॥ एवकारो भिन्नक्रमः। राधोऽकर्मकादेव श्यन्। उदाहरणमाह

48 साध् 5. P. to accomplish. 49 सिध् 4. P. to succeed.

1. ससाध	ससाधिम	सिषेध	सिषिधिम
2. ससाधिथ	ससाध	सिषेधिथ	सिषिध
3. ससाध	ससाधुः	सिषेध	सिषिधुः

50 मन् 4. Â to think. 51 हन् 2. P. to kill; to go (as well as its substitute वध्) 52 आप् 5. P. to pervade. 1 P to get (according to some Âtm)

	S.	P.	S.	P.	S.	P.
1.	मेने	मेनिमहे	जघान जघन	जघ्निम *	आप	आपिम
2.	मेनिषे	मेनिध्वे	जघनिथ जघन्थ	जघ्न	आपिथ	आप
3.	मेने	मेनिरे	जघान	जघ्नुः	आप	आपुः

53 क्षिप् 4. P. 6. P. Â. to throw. 54 छुप् 6. P. to touch.

1. चिक्षेप	चिक्षिपिम	चिक्षिपे	चिक्षिपिमहे	चुच्छोप	चुच्छुपिम
2. चिक्षेपिथ	चिक्षिप	चिक्षिपिषे	चिक्षिपिध्वे	चुच्छोपिथ	चुच्छुप
3. चिक्षेप	चिक्षिपुः	चिक्षिपे	चिक्षिपिरे	चुच्छोप	चुच्छुपुः

55 तप् 1. P. to heat. 4. Â. to have pre-eminent power. 1. P. to burn (of the 10th class.) 56 तिप् 1 Â. to drop. 57 तृप् 4. P. to please; to be satisfied.

1. ततप- } तेपिम तेपे तेपिमहे तितिपे तितिपिमहे ततर्प ततृपिम ततृम्प
ततप }

यद्राविनि । यन्मथमपराप्स्यति । दुगनीन्धर्य । विराप्यत्त शमेनरः । हुदन्तमित्यर्थ । राप्यत्योदनः । कृष्णाय राप्यति । 45 When राध् is intransitive it belongs to the fourth class

51 अभ्यासाच्च ॥ अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् । ह् of हन् is changed to घ् after its reduplicative syllable.

* note 24 † page 54.

57 The roots तृप् and दृप् are optionally set (sect III. 17. and 19.) i. e. they take इ optionally before a termination beginning with any consonant except य as ततृपिव, ततृप्व.

2. तेपिथ- तत्प्थ } तेप तेपिषे तेपिध्वे तितिपिषे तितिपिध्वे तत्रप्थ ¶ ततर्पिथ- ततर्प्थ } ततृप
3. तताप तेपु. तेपे तेपिरे तितिपे तितिपिरे ततर्प ततृपुः

58 दृप् 4. P. to rejoice; to be proud.

59 लिप् 6 P. Â to increase; to smear.

	S.	P.	S.	P.	S.	P.
1.	ददर्प	ददृपिम- ददृप्म	लिलेप	लिलिपिम	लिलिपे	लिलिपिमहे
2.	ददर्पिथ दद्रप्थ* ददर्प्थ	ददृप	लिलेपिथ	लिलिप	लिलिपिषे	लिलिपिध्वे
3.	ददर्प	ददृपुः	लिलेप	लिलिपुः	लिलिपे	लिलिपिरे

60 लुप् 6. P. Â. to cut.

61 वप् 1. P. Â. to sow seed; to procreate; to shave; to weave (according to Maitreya; Madhava; and Bopadeva)

1.	लुलोप	लुलुपिम	लुलुपे	लुलुपिमहे	उवाप उवप	ऊपिम	ऊपे	ऊपिमहे
2	लुलोपिथ	लुलुप	लुलुपिषे	लुलुपिध्वे	उवपिथ-उवप्थ	ऊप	ऊपिषे	ऊपिध्वे
3.	लुलोप	लुलुपुः	लुलुपे	लुलुपिरे	उवाप	ऊपुः	ऊपे	ऊपिरे

62 शप् 1. 4. P. Â to curse.

63 स्वप् 2. P. to sleep.

1.	शशाप शशप	शेपिम	शेपे	शेपिमहे	सुष्वाप-सुष्वप	सुषुपिम
2.	शेपिथ शशप्थ	शेप	शेपिषे	शेपिध्वे	सुष्वपिथ-सुष्वप्थ	सुषुप
3.	शशाप	शेपुः	शेपे	शेपिरे	सुष्वाप	सुषुपुः

64 सृप् 1. P. to go.

65 यभ् 1. P. to copulate.

66 रभ् 1. Â. to begin.

67 लभ् 1. Â. to obtain.

1.	ससर्प	ससृपिम	ययाभ-ययभ	येभिम	रेभे	रेभिमहे	लेभे	लेभिमहे
2.	ससर्पिथ	ससृप	येभिथ-ययब्ध	येभ	रेभिषे	रेभिध्वे	लेभिषे	लेभिध्वे
3.	ससर्प	ससृपुः	ययाभ	येभुः	रेभे	रेभिरे	लेभे	लेभिरे

¶ अनुदात्तस्यचर्दुपध यान्यतरस्याम् ॥ उपदेशेऽनुदात्तो य ऋदुपधस्तस्याम् वा स्यादझलादावकिति परे ॥ Anit roots, having ऋ for their penultimate, change it to र optionally before a strong termination beginning with any consonant except a nasal or a semivowel.

68 गम् 1. P. to go. | 69 नम् 1. P. to bow, to sound. | 70 यम् 1. P. to refrain.

1.	जगाम जगम	जग्मिम	ननाम-ननम	नेमिम	ययाम ययम	येमिम
2	जगमिथ-जगन्थ	जग्म	नेमिथ ननन्थ	नेम	येमिथ ययन्थ	येम
3.	जगाम	जग्मुः	ननाम	नेमुः	ययाम	येमुः

71 रम् 1. Â to sport. | 72 क्रुश् 1. P. to cry; to call. | 73 दंश् 1. P. to bite.

1.	रेमे	रेमिमहे	चुक्रोश	चुक्रुशिम	ददंश	ददंशिम
2	रेमिषे	रेमिध्वे	चुक्रोशिथ	चुक्रुश	ददंशिथ ददंष्ठ	ददंश
3.	रेमे	रेमिरे	चुक्रोश	चुक्रुशुः	ददंश	ददंशुः

74 दिश् 6. P. Â to give; to show. | 75 दृश् 1. P. to see.

1.	दिदेश	दिदिशिम	दिदिशे	दिदिशिमहे	ददर्श	ददृशिम
2	दिदेशिथ	दिदिश	दिदिशिषे	दिदिशिध्वे	ददर्शिथ दद्रष्ठ	ददृश
3.	दिदेश	दिदिशुः	दिदिशे	दिदिशिरे	ददर्श	ददृशुः

76 मृश् 6. P. to touch; to consider | 77 रिश् 6. P. to kill. | 78 रुश् 6. P. to kill.

1.	ममर्श	ममृशिम	रिरेश	रिरिशिम	रुरोश	रुरुशिम
2.	ममर्शिथ	ममृश	रिरेशिथ	रिरिश	रुरोशिथ	रुरुश
3.	ममर्श	ममृशुः	रिरेश	रिरिशुः	रुरोश	रुरुशुः

79 लिश् 6. P. to go. 4. Â. to decrease | 80 विश् 6 P. to enter.

1.	लिलेश	लिलिशिम	लिलिशे	लिलिशिमहे	विवेश	विविशिम
2.	लिलेशिथ	लिलिश	लिलिशिषे	लिलिशिध्वे	विवेशिथ	विविश
3.	लिलेश	लिलिशुः	लिलिशे	लिलिशिरे	विवेश	विविशुः

81 स्पृश् 6. P. to touch. | 82 कृष् 1. P. 6. P. Â to drag along; to plough.

1.	पस्पर्श	पस्पृशिम	चकर्ष	चकृषिम	चकृषे	चकृषिमहे
2.	पस्पर्शिथ	पस्पृश	चकर्षिथ	चकृष	चकृषिषे	चकृषिढ्वे
3.	पस्पर्श	पस्पृशुः	चकर्ष	चकृषुः	चकृषे	चकृषिरे

83 त्विष् 1. P. Â to shine. | 84 तुष् 4. P. to be satisfied.

1.	तित्वेष	तित्विषिम	तित्विषे	तित्विषिमहे	तुतोष	तुतुषिम

2	तित्वेषिथ	तित्विष	तित्विषिषे	तित्विषिध्वे	तुतोषिथ	तुतुष
3	तित्वेष	तित्विषुः	तित्विषे	तित्विषिरे	तुतोष	तुतुषुः

85 **द्विष्** 2. P. Â. to hate

86 **दुष्** 4. P. to act improperly; to blame.

1.	दिद्वेष	दिद्विषिम	दिद्विषे	दिद्विषिमहे	दुदोष	दुदुषिम
2	दिद्वेषिथ	दिद्विष	दिद्विषिषे	दिद्विषिध्वे	दुदोषिथ	दुदुष
3.	दिद्वेष	दिद्विषुः	दिद्विषे	दिद्विषिरे	दुदोष	दुदुषुः

87 **पुष्** 4. P. to nourish.

88 **पिष्** 7. P. to grind.

1	पुपोष	पुपुषिम	पिपेष	पिपिषिम
2	पुपोषिथ	पुपुष	पिपेषिथ	पिपिष
3	पुपोष	पुपुषुः	पिपेष	पिपिषुः

89 **विष्** 3 P Â to pervade (also 9. P. to separate)

1	विवेष	विविषिम	विविषे	विविषिमहे
2.	विवेषिथ	विविष	विविषिषे	विविषिध्वे
3.	विवेष	विविषुः	विविषे	विविषिरे

90 **शिष्** 7. P to distinguish, to separate (also 1. P. to leave a residue)

91 **शुष्** 4 P. to be dry.

92 **श्लिष्** 4 P. to embrace.

1.	शिशेष	शिशिषिम	शुशोष	शुशुषिम	शिश्लेष	शिश्लिषिम
2	शिशेषिथ	शिशिष	शुशोषिथ	शुशुष	शिश्लेषिथ	शिश्लिष
3	शिशेष	शिशिषु	शुशोष	शुशुषुः	शिश्लेष	शिश्लिषुः

93 **घस्** 1 P. to eat.

94 **वस्** 1. P. to dwell

95 **दह्** 1. P. to burn.

1.	*	उवास उवस	ऊषिम	ददाह ददह	देहिव	देहिम
2		उवसिथ उवस्थ	ऊष	देहिथ ददग्ध	देहथुः	देह
3		उवास	ऊषुः	ददाह	देहतुः	देहुः

---

* अथ न सार्वत्रिक । लिट्यन्यतरस्यामित्यदेर्घस्लादेशविधानात् ॥ घस् is not conjugated in all tenses and moods as it is stated to be an optional substitute for अद् in the Perfect (see 21) It is used in the conjugational tenses, in the Aorist and before such non conjugational terminations as do not begin with य् It is consequently wanting in the Perfect and Benedictive.

91 § see ch IV. 2. 85

96 दिह् 2 P Â. to grow, to smear.

1.	दिदेह	दिदिहिम	दिदिहे	दिदिहिमहे
2	दिदेहिथ	दिदिह	दिदिहिषे	दिदिहिध्वे ढ्वे
3	दिदेह	दिदिहु	दिदिहे	दिदिहिरे

97. दुह् 2 P A to milk (not दुह् 1. P to kill)

1	दुदोह	दुदुहिम	दुदुहे	दुदुहिमहे
2	दुदोहिथ	दुदुह	दुदुहिषे	दुदुहिध्वे ढ्वे
3	दुदोह	दुदुहु	दुदुहे	दुदुहिरे

98 नह् 4 P. A. to bind — 99 मिह् 1 P. to sprinkle — 100 रुह् 1 P to grow from seed, to become manifest

1	ननाह	ननह	नेहिम	नेहे	नेहिमहे	मिमेह	मिमिहिम	रुरोह	रुरुहिम
2	नेहिथ	ननद्ध	नेह	नेहिषे	नेहिध्वे ढ्वे	मिमेहिथ	मिमिह	रुरोहिथ	रुरुह
3	ननाह		नेहु	नेहे	नेहिरे	मिमेह	मिमिहु	रुरोह	रुरुहु

101 लिह् 2 P Â to taste. — 102 वह् 1 P A to convey.

1	लिलेह	लिलिहिम	लिलिहे	लिलिहिमहे	उवाह	उवह	ऊहिम	ऊहे	ऊहिमहे
2	लिलेहिथ	लिलिह	लिलिहिषे	लिलिहिध्वे ढ्वे	उवहिथ-उवोढ		ऊह	ऊहिषे	ऊहिध्वे ढ्वे
3	लिलेह	लिलिहु	लिलिहे	लिलिहिरे	उवाह		ऊहु	ऊहे	ऊहिरे

---

95 दादेर्धातोर्घः ॥ उपदेशे दादेर्धातो हस्य घः स्याज्झलि पदान्ते च । (a) The final ह् of a root beginning with द् is changed to घ् when followed by any consonant except a nasal, or a semivowel or by nothing as दद्ह्+थ ददघ्+थ । झषस्तथोर्धोऽधः ॥ झषः परयोस्तथयोर्धः स्यान्न दधातेः । (b) त् or थ् preceded by झ्, भ्, घ, ढ, or ध्, is changed to ध, except in the case of the root धा 3 P Â [धत्त] as ददघ्+थ-ददघ्+ध । झलां जश् झशि ॥ झलां स्थाने जशादेशः स्याज्झशि परे (c) Any consonant except a nasal or a semivowel substitutes the third letter of its class when followed by the third or fourth letter, ददघ्+ध-ददग्ध

98 नहो धः ॥ नहो हस्य धः स्याज्झलि पदान्ते च । नह् changes its final to ध् when followed by any consonant except a nasal or a semivowel

102 हो ढः ॥ हस्य ढः स्याज्झलि पदान्ते च । (a) The ending ह् of a root is changed to ढ् when followed by any consonant

SECTION III.

Roots which admit इ optionally before all non-conjugational terminations beginning with any consonant except य्

§ स्वादिः क्र्यादिश्च धूञ् सूते सूयते स्वरतिस्तथा ।
तनक्ति वृश्चति श्चान्ता वनक्ति मार्ष्टि मार्जति ॥ १ ॥
क्लिद्यतिः स्यन्दते रध्य सेधतिः शिवशास्त्रयोः ।
कल्पतेच गुपिस्त्राणे तृप्यति त्रपते तथा ॥ २ ॥
दृप्यतिः पञ्च पान्तेषु क्षाम्यति क्षमतेऽश्नुते ।
क्लिश्नाति नेश्यतिः शान्ता अक्षतिश्च निरः कुषिः ॥ ३ ॥
तक्षति त्वक्षति गाॅह गूहतिश्च गृहिस्तृहिः ।
तृंहति द्रुह्यति श्चैव बृहिर्मुह्य वृहिः स्तृहिः ॥ ४ ॥
स्निह्यतिः स्नुह्यति वेंटश्चत्वारिंशदमी स्मृताः ।
† विन्दति[1] वेपतिः[2] सेके शक्यतिः[4] शेपतिर्हितौ[3] ॥ ५ ॥
वेटस्त्वलिटि चत्वारो मतभेदाद्यतोऽनिटः ।
थलि शक्यत्यजन्तानां वेट् स्यादन्यत्र सर्वदा ॥ ६ ॥

1 धू 5 P. Â. and 2. धू 9 P. Â to shake.

1. दुधाव दुधव दुधुविव दुधुविम दुधुवे दुधुविवहे दुधुविमहे

---

except a nasal or a semivowel, or by nothing उवह्+थ उवद्+थ—उवद्+ध (95 b) ष्टुना ष्टुः ॥ स्तोः ष्टुना योग ष्टु स्यात् । (b) ष् or a consonant of the lingual class is substituted for स् or a consonant of the dental class when they two are brought together, उवढ्+ढ । ढो ढे लोपः ॥ ढस्य लोपः स्याड्ढे परे । (c) ढ् followed by ढ् is dropped उवढ् । सहिवहोरोदवर्णस्य ॥ अनयोरवर्णस्य ओत्स्याड्ढलोपे सति । (d) ओ is substituted for अ in the verbs सह् and वह् when ढ् is dropped उवोढ.

§This and the other Karikas of the Aorist, are composed by Mr. Chintamani Atmaram Kelkar, the present Shastri at the Ratnagiri High School.

1—5 These roots admit, इ necessarily in the Perfect before the terminations व,म,वहे,महे,से and ध्वे but the roots स्वृ and धू 5 9. P. and शक 4. P. take it optionally before the termination थ.

† These four roots also admit इ optionally before all non-conjugational terminations except in the case of Perfect, as some Grammarians call them Set and others Anit.

१ † विन्दतिश्चान्द्रदौर्गादेरिष्टो भाष्येऽपि दृश्यते ।

2. दुधविथ दुधोथ	दुधुवथु	दुधुव	दुधुविषे	दुधुवाथे	दुधुविध्वे-ढ्वे
3. दुधाव	दुधुवतु	दुधुवु	दुधुवे	दुधुवाते	दुधुविरे

3 सू 2 A and 4 सू 4 A to bring forth — 5 स्वृ 1 P to sound, to be diseased

1. सुषुवे	सुषुविवहे	सुषुविमहे	सस्वार-सस्वर	सस्वरिव	सस्वरिम
2. सुषुविषे	सुषुवाथे	सुषुविध्वे-ढ्वे	सस्वरिथ सस्वर्थ	सस्वरथु	सस्वर
3. सुषुवे	सुषुवाते	सुषुविरे	सस्वार	सस्वरतु	सस्वरु

6 तञ्चू 7 P to shrink or contract

1. ततञ्च	ततञ्चिव / ततञ्च्व	ततञ्चिम / ततञ्च्म
2. ततञ्चिथ / ततङ्क्थ	ततञ्चथु	ततञ्च
3. ततञ्च	ततञ्चतु	ततञ्चु

7 व्रश्च् 6 P to cut

वव्रश्च	वव्रश्चिम / वव्रश्म
वव्रश्चिथ / वव्रष्ठ	वव्रश्च
वव्रश्च	वव्रश्चु

8 अञ्ज् 7 P to make clear, to anoint, to be beautiful, to go

1. आनञ्ज	आनञ्जिम / आनञ्ज्म
2. आनञ्जिथ / आनङ्क्थ	आनञ्ज
3. आनञ्ज	आनञ्जु

9 मृज् 2 P and 10 मृज् 1 P. to purify, to adorn

1. ममार्ज	ममृजिव / ममार्जिव / ममृज्व	ममृजिम / ममार्जिम / ममृज्म
2. ममार्जिथ / ममार्ष्ठ	ममृजथु / ममार्जथु	ममृज / ममार्ज
3 ममार्ज	ममृजतु / ममार्जतुः	ममृजुः / ममार्जुः

व्याघ्रभूत्यादयस्त्वेनं नेह पेठुरिति स्थितम् ॥

२—३ अनिट्कारिकासु त्विषु विपु मिपु इति पठ्यन्ते शिषेतिच दण्डकद्वये पठितो भ्वादी अपि विपि शिषा माद्याविति माधवादय । नेति वोपदेवादय ।

४ शक विभाषितो मर्पणे । सकर्मकोऽयमिति चन्द्रगोमिप्रभृतय । सम्मतेनानिट्कारिकासु लृदित्पाठत । भाष्येतु अनुबन्धरहित पाठो दृश्यत इति हरदत्त ॥

5 † (see rule 10 ° d sect 5)

8 अत आद ॥ अभ्यासस्यादे रतो दीर्घं स्यात् । एकशेषापवाद । (a) अ beginning a reduplicative syllable is lengthened तस्मान्नुड् द्विहल ॥ द्विहलोधातार्दीर्घीभूतादकारात्परस्य नुट् स्यात् । (b) न is inserted after the long vowel of a root consisting of two consonants अञ्ज् अअञ्ज् अ अञ्ज् (a) आनञ्ज् + अ आनञ्ज

11. क्लिद् 4 P. to be wet

1. चिक्लेद चिक्लिदिम चिक्लिद्म

2. चिक्लेदिथ चिक्लेत्थ चिक्लिद

3. चिक्लेद चिक्लिदुः

12 स्यन्द् 1 Â. to distil, to go.

1. सस्यन्दे सस्यन्दिमहे सस्यन्द्महे

61, to 65 विन्मतोर्लुक् ॥ विनो मतुपश्च लुक् स्यादिष्ठेयसो । The possessive terminations विन् and मत् are dropped before the terminations ईयस् and इष्ठ

66 to 74 प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः ॥ प्रियादीनां क्रमात् प्रादय स्युरिष्ठादिषु । The words प्रिय, स्थिर, स्फिर, उरु, बहुल, गुरु, वृद्ध, तृप्र, दीर्घ and वृन्दारक assume the forms प्र, स्थ, स्फ, वर्, बंह, गर्, वर्ष्, त्रप्, द्राघ and वृन्द् respectively before the terminations इष्ठ, इमन् and ईयस्

75 अल्प Small. अल्पीयति, कनयति (अल्पमाचष्टे) Aor. अचीकनत्
76 अन्तिक Near. नेदयति (अन्तिकमाचष्टे) Aor अनिनेदत्
77 बाढ Firm, well. साधयति (बाढमाचष्टे) Aor. असीसाधत्
78 प्रशस्य Praiseworthy. प्रशस्ययति (प्रशस्यमाचष्टे) Aor. प्राशशस्यत्
79 वृद्ध Old. ज्यापयति, वर्षयति (वृद्धमाचष्टे) Aor. अजिज्यपत् अववर्षत्
80 स्व स्वापयति (स्वमाचष्टे)
81 युष्मत् (S.) Thou. त्वापयति-त्वादयति (त्वामाचष्टे)
82 युष्मत् (P.) You. युष्मयति (युवां युष्मान्वाचष्टे)
83 अस्मत् (S.) I. मापयति, मादयति (मामाचष्टे)
84 अस्मद् (P.) We. अस्मयति (आवामस्मान्वाचष्टे)
85 श्वन् A dog. शावयति, शुनयति (श्वानमाचष्टे)
86 विद्वस् A learned man. विद्वयति, विदावयति, विदयति (विद्वांसमाचष्टे)
87 उदच् Northern. उदीचयति (उदञ्चमाचष्टे) Aor. उदीचिचत्
88 प्रत्यच् Western. प्रतीचयति (प्रत्यञ्चमाचष्टे) Aor. प्रत्यचिचत्-प्रतिअचिचत्
89 सम्यच् Good. समीचयति (सम्यञ्चमाचष्टे) Aor. सम्यचिचत्-समिअचिचत्
90 तिर्यच् (Noun.) lower animal, (Adj) horizontal. तिराययति (तिर्यञ्चमाचष्टे) Aor. अतितिरायत्

---

76 77 अन्तिकबाढयोर्नेदसाधौ ॥ अन्तिकबाढयोर्यथासंख्यं नेदसाधइत्येतावादेशौ स्तोऽजादौ परत । अन्तिक and बाढ take the forms नेद and साध respectively before ईयस् and इष्ठ

78 प्रशस्यस्य श्रः ॥ ज्य च ॥ प्रशस्यस्य श्र आदेशो ज्यादेशश्च स्यादिष्ठेयसोः । प्रशस्य assumes the form श्र or ज्य before इष्ठ or ईयस्.

प्रकृत्यैकाच् ॥ इष्ठादिष्वेकाच् प्रकृत्या स्यात् । Monosyllabic words remain unchanged before ईयस् and इष्ठ

ज्यादादीयसः ॥ ज्यात्परस्येयस आदेरात्स्यात् । The ई of ईयस् is changed to आ after ज्य

79 वृद्धस्य च ॥ वृद्धस्य ज्यादेशः स्यादिष्ठेयसोः । वृद्ध assumes the form ज्य before ईयस् or इष्ठ

91 सध्रच् Associated with companion. सध्रापयति (सध्यञ्चमाचष्टे) Aor. असतध्रायत्

92 विश्वध्रच् All pervading. विश्वद्रायपति(विश्वद्र्यञ्चमाचष्टे) Aor. अविविश्वद्रायत्

93 देवद्यच् Adorning a deity. देवद्रायपति (देवद्र्यञ्चमाचष्टे) Aor. अदिदेवद्रायत्

94 अदद्यच् Going to that. अदद्रायपति (अदद्र्यञ्चमाचष्टे) Aor. अददद्रायत्

95 अदमुयच् Going to that. अदमुआययति (अदमुयञ्चमाचष्टे) Aor. आददमुआयत्

96 अमुमुयच् Going to that. अमुमुआययति (अमुमुयञ्चमाचष्टे

97 भू The earth. भावयति (भुवमाचष्टे) Aor. अबीभवत्

98 भ्रू An eyebrow. भ्रावयति (भ्रुवमाचष्टे) Aor. अबुभ्रवत्

99 श्री Wealth. श्रावयति (श्रियमाचष्टे) Aor. अशिश्रयत्

100 गो A cow. गावयति (गामाचष्टे) Aor. अजूगवत्

101 रै Wealth. राययति (रायमाचष्टे) Aor. अरीरयत्

102 नौ A boat. नाययति (नावमाचष्टे) Aor. अनूनवत्

103 स्वश्व Good horse or one who has a good horse स्वश्वयति (स्वश्वमाचष्टे) Aor स्वाशश्वत्

104 स्वर् Heaven. स्वयति (स्वरमाचष्टे) Aor. असिस्वत्

105 बहु Much; many. भावयति, बहयति (बहूनाचष्टे)

106 अनुकूल अनुकूलयति (अनुकूलं करोति) He conciliates.

107 अपहस्त अपहस्तयति (हस्तेनापसारयति) He abandons.

108 आकुल आकुलयति (आकुलं करोति) He confounds.

109 आविल आविलयति (आविलं करोति) He makes turbid.

110 उत्कलाप उत्कलापयति (उत्कलापं करोति) He takes leave or causes the peacock to spread its plumage

111 उदग्र उदग्रयति (उदग्रं करोति) He displays prominently.

112 उद्धूल उद्धूलयति (उद्धूलं करोति) He powders or sprinkles with powder or dust.

113	उल्लल	उल्ललयति (उल्लल करोति)	He jumps.
114	कदर्थ	कदर्थयति (कदर्थं करोति)	He despises.
115	कलङ्क	कलङ्कयति (कलङ्क करोति)	He defames.
116	कवल	कवलयति (कवल करोति)	He eats.
117	चिह्न	चिह्नयति (चिह्न करोति)	He marks.
118	छिद्र	छिद्रयति (छिद्र करोति)	He perforates.
119	जड	जडयति (जड करोति)	It benumbs.
120	जर्जर	जर्जरयति (जर्जर करोति)	It wounds.
121	तिमिर	तिमिरयति (तिमिर करोति)	It darkens.
122	तिरस्	तिरयति (तिर करोति)	He obstructs or conceals
123	तुच्छ	तुच्छयति (तुच्छ करोति)	He makes empty or despises.
124	तुला	तुलयति (तुलामारोहति)	He weighs.
125	पवित्र	पवित्रयति (पवित्र करोति)	He cleanses or purifies.
126	प्रकट	प्रकटयति (प्रकट करोति)	He manifests or proclaims.
127	प्रगुण	प्रगुणयति (प्रगुण करोति)	He arranges.
128	प्रतिकूल	प्रतिकूलयति (प्रतिकूल करोति)	He opposes.
129	प्रमाण	प्रमाणयति (प्रमाण करोति)	He regards as an authority.
130	मलिन	मलिनयति (मलिन करोति)	He spoils or makes dirty.
131	मुद्रा	मुद्रयति (मुद्रा करोति)	He stamps or makes an impression.
132	वितथ	वितथयति (वितथं करोति)	He makes false.

The following verses from आख्यातचन्द्रिका are given here to help the memory of the students, they contain the most important information given in this chapter.

सुपो मान्ताव्ययान्यस्मात्क्यचि काम्यचि कर्मण. ॥
आमनस्तत्तदिच्छायामर्थे स्यातामुभे क्रिये ॥ १ ॥
पुत्रकाम्यति पुत्रीयत्यृकाम्यत्यृच्यतीति दिक् ॥

एवं कर्मण आचार आधारादुपमानार्थकात् ॥ २ ॥
क्यचि पुत्रीयति च्छात्रं मञ्चे सौधीयतीति दिक् ॥
उपमानात्तथा कर्तुराचारार्थे क्यङि क्किपि ॥ ३ ॥
द्वे रूपे भवतो यद्वद्दर्दभोऽश्वायतेऽश्वति ॥
क्यङ्योजोऽप्सरसोर्नित्यं पयआदेस्तु वा सलुक् ॥ ४ ॥
कन्याऽप्सरायते त्वोजायते दधि पयायते ॥
पयस्यते तथाऽन्यस्मात्सलोपे वा दिगूह्यताम् ॥ ५ ॥
च्व्यर्थे भृशादेर्हल्लोपे भवत्यर्थे भृशायते ॥
सुमनायत इत्यादि रूपाण्यूह्यानि सर्वतः ॥ ६ ॥
तत्रैव डाज्लोहितादेः क्यषि वा चात्मनेपदम् ॥
दिग्लोहितायतीत्यादि डाचा पटपटायते ॥ ७ ॥
कष्टान्सत्राच्च कृच्छ्राच्च कक्षाद्गहनतोऽपि च ॥
कष्टायतेप्रभृतयः पापार्थे क्रमणे क्यङि ॥ ८ ॥
तं वर्तयति रोमन्थाद्रोमन्थायत इत्यदः ॥
बाष्पोष्मफेनादुद्वान्तौ पद बाष्पायतेमुखम् ॥ ९ ॥
सुखादेरनुभूत्यर्थे शब्दा दु खायतेमुखाः ॥
शब्दादिभ्य. कृतौ शब्दायतेवैरायतेमुखा १० ॥
शब्दादयस्तु सूत्रोक्ता वार्तिकोक्ता अटादय ॥
अटाट्टाशीकाकोटाश्च सोटा प्रुष्टा च दुर्दिनम् ॥ ११ ॥
पोटा प्लुष्टा च सुदिन नीहारश्चेत्यटादय. ॥
सुबन्ताण्णिच धात्वर्थे बहुलं भादि चेष्टवन् ॥ १२ ॥
तत्करोतीति मुण्डार्थे वटु मुण्डयतीति दिक् ॥
स्थूलादेस्तु तदाचष्टे स्थवयत्यादिक भवेत् ॥ १३ ॥
सत्यार्थवेदादापुक्च स्यात्सत्यापयतीति दिक् ॥
श्वेताश्वादश्वतरतो लोपोऽश्वतरयोर्णिचि ॥ १४ ॥
आलोडिताद्वरकयो र्लुप्येते तुतकौ यथा ॥
श्वेतयत्यश्वयत्यालोडयत्याहरयत्यपि ॥ १५ ॥
णिच कृतवर्णेभ्यस्तद्गृह्णात्यर्थ इष्यते ॥
अत्वं च हलिकल्योः स्याद्विष्याने रूपशब्दतः ॥ १६ ॥
विमोके त्वचमे पाशात्तूस्ताद्विहनने भवेत् ॥
भोजने तन्निवृत्तौ च व्रतशब्दाण्णिचो विधिः ॥ १७ ॥

परिधाने समाच्छादे वस्त्राल्लोम्नोऽनुमार्जने ॥
तेनातिक्रामतीत्यर्थेऽत्यतिहस्तयतीति दिक् ॥ १७ ॥
सेनाशब्दात्तृतीयान्तादभियाने तु शस्यते ॥
वीणाया उपगाने स्यात्सन्नाहे वर्मणो भवेत् ॥ १८ ॥
चूर्णादवध्वंसनेऽर्थे तूलान्निरवकोषणे ॥
श्लोकादुपस्तुतौ वा स्यात्परिच्छेदन इष्यते ॥ १९ ॥
णिङ्ङ्गतो निरसने दिग्घस्तयत आदिकम् ॥
पुच्छादुदसने णिङ्व्यसने पर्यसनेऽपि च ॥ २० ॥
चीवरात्सञ्चयेचार्थे परिधाने च णिङ् भवेत् ॥
भाण्डात्समाचिनोत्यर्थे णिङ् संभाण्डयते ऽथ यत् ॥ २१ ॥
निर्दिष्टार्थे दृश्यते तदुपसर्गादितो ऽपि च ॥
कंसं घातयतीत्यादिसिद्धये यो णिजुच्यते ॥ २२ ॥
प्रत्यक्षमिव कंसादेः साधनत्वाच्च सिध्यति ॥
उक्तं हि **भर्तृहरिणा** महाभाष्यानुसारिणा ॥ २३ ॥
शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान् ॥
प्रत्यक्षमिव कंसादीन्साधनत्वेन मन्यते ॥ २४ ॥

CHAPTER XII.

कण्ड्वादिप्रक्रिया. *

कण्ड्वादेर्यकि कण्डूयत्यात्मनेऽपि हृणीयते ॥
असूयतीत्यादिकं च प्राय प्रागेव कीर्तितम् ॥ १ ॥
आख्यातचन्द्रिका.

1 कण्डू U. गात्रविघर्षणे to rub gently, to scratch, to itch. कण्डूयति-ते

2 मन्तु P. अपराधे । रोषे इत्येके. to offend, to be angry. मन्तूयति according to चन्द्र this root is U; मन्तूयते

3 वल्गु P. पूजामाधुर्ययो to worship, to be lovely or gentle. वल्गूयति

4 असु P. } उपतापे to envy. असुयति
5 अस् P. } अस्यति
6 असू U. } असूयति-ते

7 लेट् P. } धौर्त्ये पूर्वभावे स्वप्ने च । दीप्तावित्येके । लेट्यति, लोट्यति
8 लोट् P. } P. F. लेटिता, लोटिता

9 लेला P. दीप्तौ to shine लेलायति

10 इरस् P. } ईर्ष्यायाम् to envy. इरस्यति, इरज्यति. ईर्यति-ते
11 इरज् P. }
12 इर् U. }

13 इयस् ऐश्वर्ये to rule इयस्यति

14 उपस् P. प्रभातीभावे to dawn. उपस्यति

---

* कण्ड्वादिभ्योयक्॥एभ्योधातुभ्यो नित्यं यक् स्यात्स्वार्थे । There are several roots wl ch are also Prâtipadikas These roots are classed under the head of कण्ड्वादिगण in Sanskrit Grammar These roots take य (यक्) before which the ending अ of the roots is dropped, आ remains unchanged, and उ is lengthened

These roots are conjugated like पुत्रायति in Parasmaipada and like पुत्रायते in Atmanepada

Form VII.

	11 दिश्			12 रुह्	13 गुह्	14 कृष्
1.	अदिक्षि	अदिक्षावहि	अदिक्षामहि	अरुक्षि	अघुक्षि	अकृक्षि
2.	अदिक्षथाः	अदिक्षाथाम्	अदिक्षध्वम्	अरुक्षथाः	अघुक्षथाः	अकृक्षथाः
3.	अदेशि	अदिक्षाताम्	अदिक्षन्त	अरोहि	अगूहि	अकर्षि

Form IV.

Roots ending in vowels.

	15 नी*			16 दा		
1.	अनायिषि	अनायिष्वहि	अनायिष्महि	अदायिषि	अदायिष्वहि	अदायिष्महि
	अनेषि	अनेष्वहि	अनेष्महि	अदिषि	अदिष्वहि	अदिष्महि
2.	अनायिष्ठाः	अनायिषाथाम्	-अनायिध्व	अदायिष्ठाः	अदायिषाथाम्	अदायिध्व ढ्वम्
	अनेष्ठाः	अनेषाथाम्	ढ्वम्-अनेढ्वम्	अदिथाः	अदिषाथाम्	अदिढ्वम्
3.	अनायि	अनायिषाताम्	अनायिषत	अदायि	†अदायिषाताम्	अदायिषत-
		अनेषाताम्	अनेषत		अदिषाताम्	अदिषत

	17 ग्लै			18. स्तु	19 स्तृ
1.	अग्लायिषि	अग्लायिष्वहि	अग्लायिष्महि	अस्ताविषि / अस्तोषि	अस्तारिषि-अस्तृषि- / अस्तारिषि
	अग्लासि	अग्लास्वहि	अग्लास्महि		
2.	अग्लायिष्ठाः	अग्लायिषाथाम्	-अग्लायिध्व- ढ्वम्	अस्ताविष्ठा / अस्तोष्ठा.	अस्तारिष्ठा.- / अस्तृथा. / अस्तरिष्ठा·
	अग्लास्थाः	अग्लासाथाम्	अग्लाध्वम्		
3.	अग्लायि	अग्लायिषाताम्	अग्लायिषत	अस्तावि	अस्तारि
		अग्लासाताम्	अग्लासत		

---

15 * स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ उपदेशेयोऽच् तदन्तानां हनादीनांच चिणीवाङ्गकार्यं वा स्यात्स्यादिषुपरेषु भावाकर्मणोर्गम्यमानयो । स्यादीनामिडागमश्च । चिण्वद्भावाद्वृद्धि । Roots ending in a vowel and in अय् (roots of the tenth class, Denom &c) and the roots हन्, ग्रह् and दृश् may optionally make up their Passive or impersonal forms of the Aorist, the two Futures, the Conditional and the Benedictive by adding इ to the root and undergoing such changes as the root requires before the इ substituted for तं in the third person singular of the Aorist This इ remains unchanged in the Aorist

16 † आतोयुक् चिण्कृतो ॥ आदन्तानां युगागम स्याच्चिणि ञिति णिति कृति च । Roots ending आ and in ए, ऐ and ओ (changeable to आ) take य् before the इ substituted for त.

Form V.

Roots ending in vowels.

20 भू with अनु			21 कारि (caus of कृ)	
1. अन्वभाविषि	अन्वभाविष्वहि	अन्वभाविष्महि	अकारयिषि-	अकारयिष्वहि- अकारयिष्महि
अन्वभविषि	अन्वभविष्वहि	अन्वभविष्महि	अकारिषि-	अकारिष्वहि- अकारिष्महि
2. अन्वभाविष्ठाः	अन्वभाविषाथाम्	अन्वभाविध्व-ढ्वम्	अकारयिष्ठाः	अकारयिषाथाम्- अकारयिध्वम्-ढ्वम्
अन्वभविष्ठाः	अन्वभविषाथाम्	अन्वभविध्व ढ्वम्	अकारिष्ठाः	अकारिषाथाम्- अकारिध्व-ढ्वम्
3. अन्वभावि	अन्वभाविषाताम्	अन्वभाविषत	अकारि	अकारयिषाताम् अकारयिषत
	अन्वभविषाताम्	अन्वभविषत		अकारिषाताम् अकारिषत

22 भावि (caus. of भू)	23 चुर्	
1. अभावयिषि	अचोरयिषि	अचोरयिष्महि
अभाविषि	अचोरिषि	अचोरिष्महि
2. अभावयिष्ठाः	अचोरयिष्ठाः	अचोरयिध्व-ढ्वम्
अभाविष्ठाः	अचोरिष्ठाः	अचोरिध्व-ढ्वम्
3. अभावि	अचोरि	अचोरयिषत- अचोरिषत

21—23 चिण्वदिट आभीयत्वेनासिद्धत्वाण्णिलोपः । In forming the optional forms of the Passive the इ (णिच्) of the Causal and of the tenth conjugation is dropped.

24 हन्

1.	अघानिषि	अघानिष्वहि	अघानिष्महि
	अहसि	अहस्वहि	अहस्महि
	अवधिषि	अवधिष्वहि	अवधिष्महि
2.	अघानिष्ठाः	अघानिषाथाम्	अघानिढ्वम्
	अहथाः	अहसाथाम्	अहध्वम्
	अवधिष्ठाः	अवधिषाथाम्	अवधिढ्वम्
3	अघानि	अघानिषाताम्	अघानिषत
	अवधि	अहसाताम्	अहसत
		अवधिषाताम्	अवधिषत

25 ग्रह् — 26 दृश्

	25 ग्रह्			26 दृश्		
1.	अग्राहिषि	अग्राहिष्वहि	अग्राहिष्महि	अदर्शिषि	अदर्शिष्वहि	अदर्शिष्महि
	अग्रहीषि	अग्रहीष्वहि	अग्रहीष्महि	अदृक्षि	अदृक्ष्वहि	अदृक्ष्महि
2.	अग्राहिष्ठाः	अग्राहिषाथाम्	अग्राहिध्व-ढ्वम्	अदर्शिष्ठाः	अदर्शिषाथाम्	अदर्शि-ध्वम्
	अग्रहीष्ठाः	अग्रहीषाथाम्	अग्रहीढ्वम्	अदृष्ठाः	अदृक्षाथाम्	अदृड्ढ्वम्
3.	अग्राहि	अग्राहिषाताम्	अग्राहिषत	अदर्शि	अदर्शिषाताम्	अदर्शिषत
		अग्रहीषाताम्	अग्रहीषत		अदृक्षाताम्	अदृक्षत

	27 शम्	28 चम् with आ	29 कम्
1.	अशमिषि	आचमिषि	अकामयिषि- अकामिषि- अकमिषि
2.	अशमिष्ठाः	आचमिष्ठाः	अकामयिष्ठाः- अकामिष्ठा. अकमिष्ठाः
3.	अशमि	आचामि	अकामि

---

24 हो हन्तेर्ञ्णिन्नेषु॥ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वं स्यात् । ह् of हन् is changed to घ् before न् and before an affix containing a mute ञ् or ण् (the passive इ is included in the affixes containing a mute ण्)

27 नोदात्तोपदेशस्यमान्तस्यानाचमेः ॥ उपधायावृद्धिर्नस्याच्चिणि ञिति णिति कृतिच । Set roots, ending in म् except the root चम् with आ, do not lengthen their penultimate vowel before the passive इ.

28—30 अनाचमिकमिवमीनामितिवक्तव्यम् ॥ चम् with आ, कम् and वम् though set, lengthen their penultimate vowel before the passive इ.

30 वम्	31 गम्
1. अवमिषि	1. अगंसि-अगसि
2. अवमिष्ठाः	2. अगंस्थाः-अगथाः
3. अवामि	3. अगामि

32 नम्	33 यम्	34 रम्	35 जन्	36 वध्	37 जागृ
1. अनंसि	अयंसि	अरंसि	अजनिषि	अवधिषि	अजागरिषि
2. अनंस्थाः	अयंस्थाः	अरंस्थाः	अजनिष्ठाः	अवधिष्ठाः	अजागरिष्ठाः
3. अनामि	अयामि	अरामि	अजनि	अवधि	अजागारि

38 रम् (Caus.)

1. अरमयिषि अरमिषि-अरामिषि	अरमयिष्महि-अरमिष्महि- अरामिष्महि
2. अरमयिष्ठाः अरमिष्ठाः-अरामिष्ठाः	अरमयिध्व-ढ्वम्-अरमिध्वम्-अरामिध्वम्
3. अरामि-अरमि	अरमयिषत-अरमिषत अरामित

39 रभ्	40 रध्	41 जभ्	42 भञ्ज्	43 लभ्
3. अरम्भि	अरन्धि	अजम्भि	अभञ्जि-अभाजि	अलम्भि- अलाभि प्रालम्भि

The Âtmanepadi forms of the 2 nd and 3 rd varieties are not used in the Passive. The first and the sixth have no Âtmanepadi forms; the roots of these varieties, therefore take the passive Form IV. or V. of the Aor. Âtm. according as they are anit or set.

31—34 These, being anit, lengthen their penultimate vowel (नेदात्तो &c.)
35—36 (ch IV. 5 41.° P. 130)
37 जागृ takes Vridhi before the passive इ

38 चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥ चिण् परे णमुल् परेच णौ मिता मुपधाया दीर्घो वा स्यात् । Roots mentioned in ch VIII. sections 2 3 and ज्ञप्, यम्, चह्, रप्, रह्, बल् and चि lengthen their radical vowel optionally before the passive इ. These roots are denominated मित् i. e. roots distinguished by a mute म्.

39 (ch. VIII. 1 3)

40—41 (ch. II. 1. 64).

42 भञ्जेश्च चिणि ॥ न लोपो वा स्यात् । भञ्ज् drops its nasal optionally.

43 विभाषा चिण्णमुलोः ॥ लभेर्नुमागमो वा स्यात् । व्यवस्थितविकल्पत्वात्प्रादेर्नित्य नुम् । लभ् inserts म् optionally before the passive इ but necessarily if joined with a preposition.

44 तप्	45 गॄ
अतप्त	† अगारिध्वम्-अगारिध्वम्- ‡ अगरीध्वम्

The forms of the two Futures, Conditional and Benedictive are the same as in the Âtmanepada.

Roots ending in vowels.

1 ज्ञा (anit.)

	I Fut.	II Fut.	Con.	Ben.
1.	ज्ञाताहे	ज्ञास्ये	अज्ञास्ये	ज्ञासीय
	ज्ञायिताहे	ज्ञायिष्ये	अज्ञायिष्ये	ज्ञायिषीय
2.	ज्ञातासे	ज्ञास्यसे	अज्ञास्यथाः	ज्ञासीष्ठाः
	ज्ञायितासे	ज्ञायिष्यसे	अज्ञायिष्यथाः	ज्ञायिषीष्ठाः
3.	ज्ञाता	ज्ञास्यते	अज्ञास्यत	ज्ञासीष्ट
	ज्ञायिता	ज्ञायिष्यते	अज्ञायिष्यत	ज्ञायिषीष्ट
2 दरिद्रा (set.)	दरिद्रिता	दरिद्रिष्यते	अदरिद्रिष्यत	दरिद्रिषीष्ट
	दरिद्रायिता	दरिद्रायिष्यते	अदरिद्रायिष्यत	दरिद्रायिषीष्ट
3 जि (anit.)	जेता-जायिता	जेष्यते	अजेष्यत	जेषीय
		जायिष्यते	अजायिष्यत	जायिषीष्ट
4 श्रि (set.)	श्रयिता	श्रयिष्यते	अश्रयिष्यत	श्रयिषीष्ट
	श्रायिता	श्रायिष्यते	अश्रायिष्यत	श्रायिषीष्ट

---

44 तुपोऽनुतापेच ॥ तपश्लेथिण् न स्यात्कर्मकर्तर्यनुतापेच । In the passive or *impersonal form when* तप् means ' to repent ' इ is not substituted for तें. In the reciprocal Passive too, तप् does not take इ.

45 The *forms of the* 2 nd pers. plu. Aorist of the root गॄ may be one hundred and four.

† The passive इ is not lengthened.

‡ See (ch IV. 5. 23-24 P. 127.) By (11. 3 21.) र् is optionally changed to ल्; thus we have six forms By optionally substituting ढ्व for ध्व we have twelve forms By doubling optionally द् and ध् in ढ्व and ध्व we have *twenty-four forms By doubling* ग् *we have forty--eight forms* By doubling म् in ध्वम् we have 96 forms By (ch. IV. 5 1) गॄ forms its Aorist अगीढ्वम्. By doubling ढ्, व् and म् we have eight forms thus 96 and eight make 104.

2 (ch. III. 5 29 †)

Root.	I Fut.	II Fut.	Con	Ben.
5 श्वि (set.)	श्वयिता	श्वयिष्यते	अश्वयिष्यत	श्वयिषीष्ट
	श्वायिता	श्वायिष्यते	अश्वायिष्यत	श्वायिषीष्ट
6 नी (anit.)	नेता	नेष्यते	अनेष्यत	नेषीष्ट
	नायिता	नायिष्यते	अनायिष्यत	नायिषीष्ट
7 डी (set.)	डयिता	डयिष्यते	अडयिष्यत	डयिषीष्ट
	डायिता	डायिष्यते	अडायिष्यत	डायिषीष्ट
8 शी ,,	शयिता	शयिष्यते	अशयिष्यत	शयिषीष्ट
	शायिता	शायिष्यते	अशायिष्यत	शायिषीष्ट
9 श्रु (anit.)	श्रोता	श्रोष्यते	अश्रोष्यत	श्रोषीष्ट
	श्राविता	श्राविष्यते	अश्राविष्यत	श्राविषीष्ट
10 क्षु (set.)	क्षविता	क्षविष्यते	अक्षविष्यत	क्षविषीष्ट
	क्षाविता	क्षाविष्यते	अक्षाविष्यत	क्षाविषीष्ट
11 स्नु ,,	स्नोता	स्नोष्यते	अस्नोष्यत	स्नोषीष्ट
	स्नाविता	स्नाविष्यते	अस्नाविष्यत	स्नाविषीष्ट
12 कु (कुटादि) A.	कुता	कुष्यते	अकुष्यत	कुषीष्ट
(anit.)	काविता	काविष्यते	अकाविष्यत	काविषीष्ट
13 ऊर्णु (set.)	ऊर्णविता	ऊर्णविष्यते	और्णविष्यत	ऊर्णविषीष्ट
	ऊर्णुविता	ऊर्णुविष्यते	और्णुविष्यत	ऊर्णुविषीष्ट
	ऊर्णाविता	ऊर्णाविष्यत	और्णाविष्यत	ऊर्णाविषीष्ट
14 भू ,,	भविता	भविष्यते	अभविष्यत	भविषीष्ट
	भाविता	भाविष्यते	अभाविष्यत	भाविषीष्ट
15 धू 5. 9.	धोता	धोष्यते	अधोष्यत	धोषीष्ट
(wet.)	धविता	धविष्यते	अधविष्यत	धविषीष्ट
	धाविता	धाविष्यते	अधाविष्यत	धाविषीष्ट
16 धू 6. (कुटादि)	धुविता	धुविष्यते	अधुविष्यत	धुविषीष्ट
(set.)	धाविता	धाविष्यते	अधाविष्यत	धाविषीष्ट

11 (ch IV 4 20)
12 –16 (ch IV 4, 10 b)
13 (ch III 5 6 °)

Root	I Fut.	II Fut.	Con	Ben
17 नू (कुटादि)	नुविता	नुविष्यते	अनुविष्यत	नुविषीष्ट
(set.)	नाविता	नाविष्यते	अनाविष्यत	नाविषीष्ट
18 सू (wet.)	सोता	सोष्यते	असोष्यत	सोषीष्ट
	सविता	सविष्यते	असविष्यत	सविषीष्ट
	साविता	साविष्यते	असाविष्यत	साविषीष्ट
19 कृ (anit.)	कर्ता	करिष्यते	अकरिष्यत	कृषीष्ट
	कारिता	कारिष्यते	अकारिष्यत	कारिषीष्ट
20 वृ (set.)	वरिता	वरिष्यते	अवरिष्यत	†वरिषीष्ट
	वरीता	वरीष्यते	अवरीष्यत	§वृषीष्ट
	‡वारिता	वारिष्यते	अवारिष्यत	वारिषीष्ट
21 स्तृ (anit.)	स्तर्ता	स्तरिष्यते	अस्तरिष्यत	स्तृषीष्ट
				°स्तरिषीष्ट
	स्तारिता	स्तारिष्यते	अस्तारिष्यत	स्तारिषीष्ट
22 स्वृ (wet.)	स्वर्ता	स्वरिष्यते	अस्वरिष्यत	स्वरिषीष्ट
	स्वरिता	स्वारिष्यते	अस्वारिष्यत	स्वृषीष्ट
	स्वारिता			स्वारिषीष्ट
23 जागृ (set.)	जागरिता	जागरिष्यते	अजागरिष्यत	जागरिषीष्ट
	जागारिता	जागारिष्यते	अजागारिष्यत	जागारिषीष्ट
24 पृ "	परिता	परिष्यते	अपरिष्यत	†परिषीष्ट
	परीता	परीष्यते	अपरीष्यत	‡पूर्षीष्ट
	पारिता	पारिष्यते	अपारिष्यत	पारिषीष्ट

17 (Ch IV 4 10 b)
20 † (ch VI note 7)
20 § (ch IV 4 23 P 110)
20 ‡ चिण्वदिटो न दीर्घत्वं प्रकृतस्य वलादिलक्षणस्यैवेटो वृतोवेत्यनेन दीर्घविकल्प विधानात् । In the optional forms of the Passive of वृ cl 5 9 and roots ending in long ॠ the augment ई is not lengthened
21 ° (ch IV 4 26 P 111)
23 (Ch III 4 11)
24 to 26 (Ch IV 5 23§)
24 † (Ch VI note 7)
24 ‡ (ch IV 4 23, 27)

Root.	I Fut.	II Fut.	Con.	Ben.
25 वॄ (set.)	वरिता	वरिष्यते	अवरिष्यत	† वरिषीष्ट
	वरीता	वरीष्यते	अवरीष्यत	‡ वूर्षीष्ट
	वारिता	वारिष्यते	अवारिष्यत	वारिषीष्ट
26 स्तॄ ,,	स्तरिता	स्तरिष्यते	अस्तरिष्यत	† स्तरिषीष्ट
	स्तरीता	स्तरीष्यते	अस्तरीष्यत	§ स्तीर्षीष्ट
	स्तारिता	स्तारिष्यते	अस्तारिष्यत	स्तारिषीष्ट
27 धे (anit.)	धाता	धास्यते	अधास्यत	धासीष्ट
	धायिता	धायिष्यते	अधायिष्यत	धायिषीष्ट
28 छो ,,	छाता	छास्यते	अच्छास्यत	छासीष्ट
	छायिता	छायिष्यते	अच्छायिष्यत	छायिषीष्ट
29 गै ,,	गाता	गास्यते	अगास्यत	गासीष्ट
	गायिता	गायिष्यते	अगायिष्यत	गायिषीष्ट
30 चुर् (set.)	चोरयिता	चोरयिष्यते	अचोरयिष्यत	चोरयिषीष्ट
	{ चोरयिता	चोरयिष्यते	अचोरयिष्यत	चोरयिषीष्ट
	{ चोरिता	चोरिष्यते	अचोरिष्यत	चोरिषीष्ट

31 भू (Caus.)

	I Fut.	II Fut.	Con.	Ben.
1.	भावयिताहे	भावयिष्ये	अभावयिष्ये	भावयिषीय
	भाविताहे	भाविष्ये	अभाविष्ये	भाविषीय
2.	भावयितासे	भावयिष्यसे	अभावयिष्यथाः	भावयिषीष्ठाः
	भावितासे	भाविष्यसे	अभाविष्यथाः	भाविषीष्ठाः
3.	भावयिता	भावयिष्यते	अभावयिष्यत	भावयिषीष्ट
	भाविता	भाविष्यते	अभाविष्यत	भाविषीष्ट

25 † (ch. VI. note 7)
25 ‡ (ch. IV 4 23, 27)
26 † (ch. VI. note 7)
26 § (ch. IV. 4. 23, 28)
27-28-29 (Ch. III. 5. 35 and note 15 P. 243.)
30 See note 21-23 P. 244

32 शम् (Caus)

	I Fut	II Fut	Con.	Ben.
1.	शमायिताहे	शमयिष्ये	अशमयिष्ये	शमयिषीय
	शमिताहे	शमिष्ये	अशमिष्ये	शमिषीय
	शामिताहे	शामिष्ये	अशामिष्ये	शामिषीय
2.	शमयितासे	शमयिष्यसे	अशमयिष्यथाः	शमयिषीष्ठाः
	शमितासे	शमिष्यसे	अशमिष्यथाः	शमिषीष्ठाः
	शामितासे	शामिष्यसे	अशामिष्यथाः	शामिषीष्ठाः
3.	शमायिता	शमयिष्यते	अशमयिष्यत	शमयिषीष्ट
	शमिता	शमिष्यते	अशमिष्यत	शमिषीष्ट
	शामिता	शामिष्यते	अशामिष्यत	शामिषीष्ट

Roots ending in consonants.

33 दिश्

	I Fut.	II Fut.	Con	Ben.
1.	देष्टाहे	देक्ष्ये	अदेक्ष्ये	दिक्षीय
2.	देष्टासे	देक्ष्यसे	अदेक्ष्यथाः	दिक्षीष्ठाः
3.	देष्टा	देक्ष्यते	अदेक्ष्यत	दिक्षीष्ट

34 बुध् (I Conj.)

	I Fut.	II Fut	Con.	Ben
1.	बोधिताहे	बोधिष्ये	अबोधिष्ये	बोधिषीय
2.	बोधितासे	बोधिष्यसे	अबोधिष्यथाः	बोधिषीष्ठाः
3.	बोधिता	बोधिष्यते	अबोधिष्यत	बोधिषीष्ट

35 हन्

	I Fut.	II Fut.	Con	Ben.
1.	हन्ताहे	हनिष्ये	अहनिष्ये	वधिषीय
	घानिताहे	घानिष्ये	अघानिष्ये	घानिषीय
2.	हन्तासे	हनिष्यसे	अहनिष्यथा	वधिषीष्ठाः
	घानितासे	घानिष्यसे	अघानिष्यथाः	घानिषीष्ठाः
3.	हन्ता	हनिष्यते	अहनिष्यत	वधिषीष्ट
	घानिता	घानिष्यते	अघानिष्यत	घानिषीष्ट

---

32 See note 38 P. 246

35 See note 24 P. 245

36 ग्रह्

	I Fut	II Fut.	Con	Ben
1.	ग्रहीताहे	ग्रहीष्ये	अग्रहीष्ये	ग्रहीषीय
	ग्राहिताहे†	ग्राहिष्ये	अग्राहिष्ये	ग्राहिषीय
2.	ग्रहीतासे	ग्रहीष्यसे	अग्रहीष्यथा.	ग्रहीषीष्ठा
	ग्राहितासे	ग्राहिष्यसे	अग्राहिष्यथा.	ग्राहिषीष्ठाः
3.	ग्रहीता	ग्रहीष्यते	अग्रहीष्यत	ग्रहीषीष्ट
	ग्राहिता	ग्राहिष्यते	अग्राहिष्यत	ग्राहिषीष्ट

37 दृश्

	I Fut	II Fut.	Con	Ben.
1.	दर्शिताहे	दर्शिष्ये	अदर्शिष्ये	दर्शिषीय
	द्रष्टाहे	द्रक्ष्ये	अद्रक्ष्ये	दृक्षीय
2.	दर्शितासे	दर्शिष्यसे	अदर्शिष्यथा.	दर्शिषीष्ठा.
	द्रष्टासे	द्रक्ष्यसे	अद्रक्ष्यथा	दृक्षीष्ठा.
3.	दर्शिता	दर्शिष्यते	अदर्शिष्यत	दर्शिषीष्ट
	द्रष्टा	द्रक्ष्यते	अद्रक्ष्यत	दृक्षीष्ट

36 (Ch IV. 5 3?)

36 † चिण्वदिटो न दीर्घत्व ग्रहनस्य वलादिलक्षणस्यैवेटो ग्रहोऽलिटीत्यनेन दी- धानात् । In the optional forms of the Passive of ग्रह् the augment इ is not lengthened

37 दृश् takes guna. See note ‡ P 242.

SECTION II.

Reflexive Passive *

(Karmakartari Prakriya)

1 पच्	पच्यते	(ओदन स्वयमेव)	Rice goes easy to be cooked.
2 भिद्	भिद्यते	(काष्ठ स्वयमेव)	Wood goes easy to be splintered
3 लू	लूयते	(केदार स्वयमेव)	The crop goes easy to be cut down
4 स्पृश्	स्पृशत	(अन्योन्यम्)	They touch each other.
5 नी	नयति	(अजा ग्रामम्)	She goat goes easy to be taken to a village
6 दुह्	दुग्धे	(गौ पय)	The cow goes easy to be milked. Aor. अदोहि, अदुग्ध, अधुक्षत

---

* यदा सौकर्यातिशय द्योतयितु कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृ सज्ञा लभन्ते स्वव्यापारे स्वतन्त्रत्वात् । कर्मणस्तु कर्तृत्वविवक्षायां प्राक्सकर्मका अपि प्रायेणाकर्मकास्तेभ्या भावे कर्तरिच लकारा । When extreme ease of the performance of an action is intended to be expressed without the direct mention of the subject the object and the other Karakas on account of their having absolute independant control over their movements are used as subject of the action and in this case (when object is used as subject) the original transitive verbs become generally intransitive and such intransitive verbs take impersonal and active forms

1 to 3 कर्मवत्कर्मणा तुल्यक्रिय ॥ कर्मस्थया क्रियया तुल्यक्रिय कर्ता कर्मवत्स्यात् । कार्यातिदेशोऽयम् । तेन यगात्मनेपदचिण्चिण्वदिट स्यु । कर्तुरभिहितत्वात्प्रथमा । In the कर्मकर्तरि (Reflexive Passive form) the roots are Atmanepadi and are conjugated as in the Passive and the subject (object in the active voice) is put in the nominative case

4 6 सकर्मकाणा प्रतिषेधो वक्तव्य ॥ The transitive verbs do not take the Reflexive Passive form

6 दुहश्च॥ दुहश्च्लेश्चिण् वा स्यात् कर्मकर्तरि तशब्दे परे। पक्षे क्स । लुग्वेति पक्षे लुक् । The root दुह takes इ (चिण्)optionally in the Reflexive Passive

6 7 दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम् ॥ न दुहस्नुनमा यक्चिणौ । एषा कर्मकर्तरि यक्चिणौ न स्त । दुहेरनेन यक एव निषेध । चिण् तु विकल्पनेष्यते । The root दुह् स्नु and नम् do not take the terminations य (यक्)and इ (चिण्) when they are used in the Reflexive Passive

7 पच् पच्यते (उदुम्बर फलम्) The उदुम्बर tree goes easy to be ripened

8 स्नु with प्र प्रस्नुते (गौ) It goes easy for a cow to pour forth her milk from the udder Aor. प्रास्नाविष्ट, प्रास्नोष्ट

9 नम् नमते (दण्ड) Aor. अनंस्त The rod bends easily.

10 कृ क्रियते Aor. अकृत, अकारि

11 सृज् सृज्यते (स्रज भक्त) श्रद्धया निष्पादयतीत्यर्थ A devotee makes a garland with devotion. Aor. असर्जि

12 युज् युज्यते (ब्रह्मचारी योगम्) A bachelor finds it easy to concentrate his mind

13 कृ with अलम् अलङ्कुरुते (कन्या) A girl goes easy to be adorned Aor अलमकृत

14 कृ with अव अवकिरते (हस्ती) The elephant scatters the dust Aor. अवाकीर्ष्ट

15 गृ गिरते Aor. अगीर्ष्ट

16 दृ with आ आद्रियते Aor. आदृत

17 कृ (desid.) चिकीर्षते (कट) The mat goes easy to be worked up Aor. अचिकीर्षिष्ट

18 रुध् रुध्यते (गौ) The cow goes easy to be confined. Aor. अवारुद्ध

---

10 अच कर्मकर्तरि ॥ अजन्तात् च्लेश्चिण् वा स्यात् कर्मकर्तरि तशब्दे परे । Roots ending in vowels take इ (चिण्) optionally in the 3rd pers sing of the Aorist

11 12 सृजियुजोः श्यंस्तु॥ अनयोः सकर्मकयोः कर्ता बहुलं कर्मवत् । यगपवादश्च श्यन्वा च्य इत्यर्थः । सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यम् । The subject of the transitive verbs सृज् and युज् is treated as the object and the subject in the case of the root सृज् must be a man of piety, in the Reflexive Passive. These roots take य (श्यन्) instead of य (यक्)

13 to 17 भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात् । भूषावाचिनां किरादीनां सन्नन्तानां च यक्चिणौ चिण्वदिट् च नेति वाच्यमित्यर्थः । Roots expressing ornaments and the roots कृ गृ दृ धृ and प्रच्छ् and the Desideratives do not take य (यक्) and the augment इ which is treated as चिण् in the Reflexive Passive

18 न रुधः ॥ अस्मात्च्लेः चिण् न कर्मकर्तरि । The root रुध् does not take इ (चिण्) in the Reflexive Passive.

19 तप् तप्यते (तपस्तापम) अर्जयतीत्यर्थ । The ascetic practises penance Aor अतप्त

20 कृ (caus.) कार्यते Aor. अचीकरत II Fut कारिष्यते

21 श्रि with उद् उच्छ्रयते (दण्ड) The rod rises up easily. Aor. उदशिश्रियत II Fut उच्छ्रायिष्यते

22 ब्रू ब्रूते (कथा) The story goes easy to be told. Aor. अवोचत

23 पुच्छ with उद् (णिङ्) उत्पुच्छयते (गौ) The cow raises her tail up Aor. उदपुपुच्छत

24 ग्रन्थ् ग्रन्थते (ग्रन्थ) The book goes easy to be written Aor. अग्रन्थिष्ट

25 श्रन्थ् श्रन्थते (मेखलां देवदत्त) Dewadatta makes a string. Aor. अश्रन्थिष्ट

26 कृ with वि विकुर्वते (सैन्धवा) वल्गन्तीत्यर्थ The horses neigh. Aor. व्यकारिष्ट, व्यकृत

27 कुप् कुप्यति ते (पाद स्वयमेव) It is easy to draw the leg

28 रञ्ज् रज्यति ते (वस्त्रम्) The cloth goes easy to be dyed.

---

19 तपस्तप कर्मकस्यैव ॥ कर्ता कर्मवत्स्यात् । तपोनुतापे चेति चिणनिषेधात्सिच । The root तप takes the Reflexive Passive when it has तपस् for its object

20 to 22 यकचिणो प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानम् । The Causals and the roots श्रि and ब्रू do not take य (यक्) and इ (चिण)

20 to 26 भारद्वाजीया पठन्ति ॥ णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानम् । According to भारद्वाजीय the roots ending in इ (णि) श्रन्थ ग्रन्थ and ब्रू when intransitive and Âtmanepadi do not take य (यक and इ (चिण)

27, 28 कुषिरञ्जो प्राचा श्यन्परस्मैपदञ्च ॥ अनयो कर्मकर्तरि न यक् किन्तु श्यन्परस्मैपद च॥ आत्मनेपदापवाद । The roots कुप् and रञ्ज do not take य (यक) and Atmanepada but take य (श्यन्) and Parasmaipada in the conjugational tenses when they are used in the Reflexive Passive

CHAPTER XIV.

Substitution of ष् and ण् for स् and न्

Section 1.

Substitution of ष् for स्.

1 सुद् सुषुदे
2 स्वद् with अनु; अनुस्वदते
3 सिध् with नि निषेधति.
4 सु ,, अभि अभ्युषुणोत्

---

1 Here स् is changed to ष् after the reduplicative syllable सु
आदेशप्रत्ययो: ॥ इण्कवर्गाभ्यां परस्यापदान्तस्यादेश प्रत्ययावयवस्य. सकारस्तस्यष.
स्यात् । ष् is substituted for स् (not final), contained in a substitute or a
termination if it is preceded by any vowel except अ or आ or by a semi-
vowel, ह or a guttural (ch III 1 8)
2 सात्पदाद्यो: ॥ साते पदादेश्च सस्य षत्वं न स्यात् ॥ स् is not changed to ष् if it
be the initial of an inflected word or any form (exception to ch III. 3
23 c d) स् begins the form स्वदते while ष् in सुषुदे does not.
3 उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्, ॥
उपसर्गस्थान्निमित्तादेषां सस्य ष. स्यात् । (a) सदिरप्रते ॥ प्रतिभिन्नादुपसर्गात्सदे: सस्य
ष स्यात् । (b) स्तम्भे ॥ स्तम्भे सौत्रस्य सस्य ष स्यात् । (c) अवाच्चालम्बनाविदूर्य-
यो ॥ आवात्स्तम्भेतयोरर्थयो षत्वस्यात् । (d) After a preposition containing इण्
(i. e an vowel except अ or आ a semi vowel or ह्) ष is substituted for स्
in the verbs सु 5, सु 6 P, सो, स्तु, स्तुभ, स्था सेनय, सिध् । P सिच , सञ्ज्,
स्वञ्ज्, सद् (without प्रति, प्रतिसीदति) and स्तम्भ् (even with अव meaning
to depend upon or to be near) वेश्च स्वनोभोजने ॥ व्यवाभ्यां स्वनते सस्य ष स्यात्भो-
जने । (e) परिनिविभ्य सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ॥ परिनिविभ्य परेषामेषां
सस्य ष स्यात् । (f) After अव and वि, ष is substituted for स् in स्वन्
when it means to eat, and after परि, वि, and नि in सेव्, सित्, सह्, स्तु,
स्वञ्ज्, the terms सित्, सय and the prefix सु अभिषुणोति, परिषुवति, अभि-
ष्यति, परिष्टौति परिष्टवीति, विष्टोभते, अधिष्ठाना, अभिषेणयति; अभिषिञ्चति, अभि-
षजति, परिष्वजते, निषीदति, विष्टभ्नोति विष्टभ्नाति, अवष्टभ्नोति अवष्टभ्नाति (leans rests
upon or is near), अवष्वणति विष्वणति (makes a noise in eating); परि-नि-
विषेवते, परि-नि वि-षहते, परि नि-वि षीव्यति, परि नि-विष्टौति ष्टवीति, परि-नि-वि ष्वजते
परिष्करोति (exception to 2 अनुस्वदते All these roots change their initial
स् to ष्.)
4 प्राक्सितादड्व्यवायेऽपि ॥ सेवसितेत्यत्र सितशब्दात्प्राग्ये सुनोत्यादयस्तेषां
सड् व्यवायेऽपि षत्वस्यात् ॥ ष् is substituted for स in the fifteen verbs begin-
ning with सु and ending with सेव् even though the prefix अ intervene
पर्यषुवत्; अभ्यषवत्; अभ्यष्टौत्; व्यष्टोभिष्ट (Aor.), अभ्यष्ठात् (Aor) अभ्यषा-
पयत्; अभ्यषवत्; अभ्यष्टौत्; व्यष्टोभिष्ट (Aor.), अभ्यष्ठात् (Aor) अभ्यष्ठा-
स्यत् (Cond.) अभ्यषेणयत्, न्यषेधत्, न्यषीत्, न्यषेधिष्यत्; अभ्यषिञ्चत्; अभ्य-

5 सिव् with	नि न्यषेवीत न्यसेवीत्	9 स्तम्भ् ,,	अव अवातस्तम्भत्
6 सिच ,,	अभि अभिषिषेच, अभिषिषिक्षति	10 सिध् ,,	नि निसेधति
		11 सह्	with परि परिसोढा
7 सद् ,,	नि निषसाद्	12 सु 4. P A. ,,	नि निसोस्यति
8 स्वञ्ज् ,,	परि परिषस्वजे परिसस्वजे	13 स्यन्द् with	अनु अनुष्यन्दते अनुस्यन्दते

षजत्, प्रत्यष्वदृक्त, न्यषीदत्, व्यष्टभत्, न्यष्टम्भीत्, अवाष्टभत्, अवाष्टम्भीत्; अव-न्य-ष्वाणत्, अव-न्यष्वनीत्, परिनिव्यषेवत

5 सिवादीनावाड्व्यवायऽपि ॥ परिनिविभ्य परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेऽपि ॥ After परि and वि the change takes place optionally in the verbs beginning with सिव (i e सिव्, सह्, स्तु, स्वञ्ज and the prefix सु) even though the prefix अ intervene परि नि व्यषेवीत् परि नि-व्यसेवीत्, परि नि व्यषहत परि नि-व्यसहत, परि नि-व्यष्टौत् परि नि-व्यस्तौत्, परि नि व्यष्वङ्क्त, परि-नि-व्यस्वङ्क्त पर्यष्कार्षीत्, पर्यस्कार्षीत्

6 स्थादिष्वभ्यासेनचाभ्यासस्य ॥ प्राक् सितादस्थादिष्वभ्यासेन व्यवायेऽपि षत्वं स्यादेषामेव चाभ्यासस्य नतु सुनोत्यादीनाम् । ष् is substituted for स् in the ten verbs from स्था to सञ्ज् (both inclusive) notwithstanding the intervention of a reduplicative syllable and even in the reduplicative syllable itself अधितष्ठौ अभिषिषेणयिषति निषिषेध अभिषिषेधयिषति अभिषिषङ्क्ते, अभिषिष्वङ्क्ते निषिषमति अभितष्टम्भ अवतष्टम्भ, विषष्वाण अवषष्वाण, परि नि विविषेवे

7—8 सदेः परस्य लिटि ॥ सदेरभ्यासात्परस्य षत्वं न स्याल्लिटि । (स्वञ्जेरुपसङ्ख्यानम्) स्वञ्जे रभ्यासा परस्य षत्वं न स्या लिटि । स् of सद् and स्वञ्ज is not changed to ष् after the reduplicative syllable in the perfect exception to 6 स्थादिष्व

9 स्तन्भुसिवुसहा चङि ॥ उपसर्गस्थान्निमित्तादेषां सस्य षो न स्याच्चङि । स् of these roots is not changed to ष् in the third variety of Aorist पर्यसीषिवत्, न्यसीषहत् (exception to 4 and 5)

10 सेधतेर्गतौ ॥ गत्यर्थस्य सेधतेः षत्वं न स्यात् । स् of सिध is not changed to ष् when it means to go (exception to 3)

11 सोढः ॥ सोढ् रूपस्य सहेः सस्य षत्वं न स्यात् ॥ The स् of the form सोढ is not changed (exception to 3 f)

12 सनोतेः स्यसनोः ॥ स्ये सनि च परे सुनः षो न स्यात् ॥ स् of सु 5 P A is not changed to ष् in the Future Conditional and the Desiderative (exception to 3)

13 अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥ एभ्यः परस्याप्राणिकर्तृकस्यन्दतेः सस्य षो वा स्यात् ॥ The substitution of ष् for स् in स्यन्द with अनु वि, परि, अभि, or नि takes place optionally if it has no living being for its subject. अनु-वि परि अभि निष्यन्दते स्यन्दते वा जलम् (exception to 2) अनुस्यन्दते हस्ती

14 स्कन्द् with वि	विष्कन्ता विस्कन्ता	19 स्कन्भ् with वि	विष्कभ्नोति. विष्कभ्नाति
15 ,, परि	परिष्कन्दति परिस्कन्दति	20 अस् (to be) with नि	निष्यात् निषन्ति
16 स्वप् ,, सु	सुषुषुपतु	,, ,, प्रादुस्	प्रादु ष्यात् प्रादु षन्ति
17 स्फुर् ,, निर्	नि स्फुरति नि ष्फुरति	21 तप् ,, निस्	निष्टपति
18 स्फुल् ,, ,,	नि स्फुलति- नि ष्फुलति		

14—1, वे स्कन्देरनिष्ठायाम्॥ वे परस्य स्कन्दे षत्व वा स्यान्निष्ठाभिन्ने कृत्प्रत्यये परे। (a) परेश्च (b), अस्मात्परस्य स्कन्दे सस्य षो वा स्यात्। ष् is optionally substituted for स् in स्कन्द् with वि (but not before the affixes त and तवत् विस्कन्न) and परि (even before those affixes परिस्कन्न परिष्कण्ण)

16 सुविनिर्दुर्भ्य सुपिसूतिसमा॥ एभ्य सुप्यादे सस्य ष स्यात्। After सु वि निर् and दुर् ष् is substituted for स् in सुप् (deduced from स्वप) and in the terms सूति and सम, सस्वप् + अनुस सुषुप सुषुप् (here स् in सुप् is changed to ष् after the preposition सु) सुषुषुपतु (here सुप् is reduplicated) सुसुष्वाप 3rd sing

17 स्फुरनिस्फुलत्योर्निर्निविभ्य॥ निर्निविभ्य परयो स्फुरतिस्फुलत्यो सस्य षत्व वा स्यात्। After निर् नि or वि, स् of स्फुर् 6 P and स्फुल् 6 P is changed to ष् optionally

19 वे स्कभ्नातेर्नित्यम्॥ वे परस्य स्कभ्नाते सस्य ष स्यात्। स् of स्कन्भ् with वि is necessarily changed to ष्

20 उपसर्गप्रादुर्भ्यामस्तिर्यच्पर॥ उपसर्गेण प्रादुसश्च परस्यास्ते सस्य ष स्याद्यकारेऽचि च परे। After a preposition containing इण् or after प्रादुस ष is substituted for स in अस् 'to be' provided it be immediately followed by य or a vowel

21 निसस्तपतावनासेवने॥ निस परस्य तपते सस्य ष स्यादासेवनादन्यस्मिन्विषये। स् of the preposition निस् joined to the root तप् is changed to ष् when there is no constant repetition of the action

SECTION II.

Substitution of ण् for न्

1 चक्षण्म	5 प्रभणाणि	8 प्राणिति	11 प्रहण्मि or प्रहन्मि
2 प्रणनाद	6 प्रणिगदति	9 प्राणिणत्	प्रहण्व or प्रहन्वः
3 प्रहिणोमि	7 प्रणिभरति		12 प्रनष्टा, प्रनङ्क्ष्यति
4 प्रमीणाति	or प्रनिभरति	10 प्रहण्यात्	

---

1 See ch III 3 20 21 b c   2 (ch III 5 36)

3—4 हिनुमीना ॥ उपसर्गस्थान्निमित्तात्परस्यैतयो र्नस्य ण स्यात् । After a preposition containing ऋ or र् न् in हि cl 5 and मी is changed to ण्

5 आनिलोट् ॥ उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानान्यस्य नस्य ण स्यात् । After such a preposition न् in आनि (1st sing) is changed to ण् The preposition दुर् is excepted and अन्तर् is included in the list of preposition, दुर्भवानि, अन्तर्भवाणि

6 नेर्गद नद पत पद घु मा स्यति हन्ति याति वाति द्राति प्साति वपति वहति शाम्यति चिनोति देग्धिषु च ॥ उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्या द्गदादिषु परेषु । (a) After such a preposition ण् is necessarily substituted for न् in the preposition नि before the following roots—गद्, नद्, पत्, पद् घु verbs दा धा &c see ch IV I I मा 3 Â म, सो, हन्, या, वा द्रा प्सा वप्, वह् शम् 4 P चि. 5 and दिह् 2 P प्रणिनदति, प्रण्यपप्तत्, प्रण्यपादि प्रणिददाति, प्रणिदधाति, प्रणियच्छति प्रणिदाता (fr दो) &c प्रण्यमास्त, प्रणिमयते प्रणिष्यति, प्रणिहन्ति, प्रणियाति, प्रणिवाति, प्रणिद्राति, प्रणिप्साति, प्रणिवपति, प्रणिवहति, प्रणिशाम्यति, प्रणिचिकाय, and प्रणिदेग्धि चि 1 P A प्रणिचयति प्रनिचयति

7 शेषे विभाषाऽकखादावषान्त उपदेशे ॥ उपदेशे कादि खादिषान्तवर्जे गदनदादे रन्यस्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा स्यात् । But optionally before such roots as do not begin with क् or ख् and before those that have no ष् for their final consonant प्रणिमाति or प्रनिमाति (fr मा 2)

8 अनितेः ॥ उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य ण स्यात् । न् in अन् 2 P is changed to ण् (The term after such a preposition must be taken in connection with every rule)

9 उभौ साभ्यासस्य ॥ साभ्यासस्यानिते रुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति । Both the nasal consonants in अन् with its reduplicative syllable are changed to ण

10 हन्तेरत्पूर्वस्य ॥ वमोर्वा ॥ उपसर्गस्थान्निमित्तात्परस्य हन्ते र्नस्य णत्वं वा स्या द्वमयोः परयोः ॥ न् in हन् is changed to ण if अ precede the nasal consonant न् (otherwise प्रघ्नन्ति) and optionally terminations व and म

12 नशेः षान्तस्य ॥ षान्तस्य नशेः णत्वं न स्यात् । अन्तःप्रहण भूतपूर्वप्रतिपत्त्यर्थम् । न् in नश् is not changed to ण् if the radical श् be converted into ष्

CHAPTER XV.

Participles, Gerunds, and Infinitives.

SECTION I

Participles

I Present Participles Parasmaipada

1 पच cl I.	पचत (†पचन्त चत्र पश्य.)	11 बुध् (Freq)	बोबुध्यत्
		12 क्षिप् ,,	चेक्षिपत्
2 अस् ,, 2	सत (सन्ब्राह्मण)	13 या	यात्
3 पुष्	पुष्यत् (हे पुष्यन्)	14 अद्	अदत्
4 क्रम्	क्राम्यत् क्रामत्	15 जक्ष्	जक्षत्
5 दिव्	दीव्यत्	16 जागृ	जाग्रत्
6 क्षिप्	क्षिपत	17 दरिद्रा	दरिद्रत्
7 चुर्	चोरयत्	18 शास्	शासत्
8 बुध् (Caus.)	बोधयत	19 चकास्	चकासत्
9 बुध् (Desid.)	बुबोधिषत्	20 दीधी	दीध्यत्
10 दा (Desid)	दित्सत्	21 वेवी	वेव्यत्

---

1 † लटः शतृशानचावप्रथमासमानाधिकरणे ॥ अप्रथमान्तेन सामानाधिकरण्ये स धातो लेटः शतृशानचौस्तः । The present participles (active) are formed by adding the termination अत् (शतृ) to Parasmaipadi roots and आन (शानच्) to the Atmanepadi roots when the participles so formed do not agree with a substantive in the nominative case

The conjugational sign is first added to the root and then the terminations

2 लडित्यनुवर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम् । तेन प्रथमासामानाधिकरण्ये अप्रथमान्तेन सामानाधिकरण्याभावेऽपि क्वचित् । (Sometimes however they do agree with the nouns in the nominative case also)

3 सबोधने च । The Present participle is used with a noun in the vocative case

20 21 दीधीवेव्योरिदित्वेऽपि छान्दसत्वाभ्युपगमेन परस्मैपदम् ।

22 स्तु स्तुवत्
23 दा ददत्
24 हु जुह्वत्
25 सु सुन्वत्
26 रुध रुन्धत्
27 तन् तन्वत्
28 कृ कुर्वत
29 क्री क्रीणत्
30 मुष् मुष्णत्
31 विद् विदत् विद्वस्
32 इ with अधि अधीयत् learning easily, but कृच्छ्रेणाधीते
33 धृ धारयत् holding with ease, but कृच्छ्रेण धारयति

34 द्विष् द्विषत् (an enemy) but द्वेष्टि भार्या पतिम् ।
35 सु सुन्वन्त सर्वे सुन्वन्त. सर्वे यजमाना सत्रिण उच्यन्ते but सुनाति सुराम् ।
36 अर्ह् cl. 1 अर्हत् but (अर्हति चोरो वधम्)
37 जीव् जीवत् (माजीवन् य परावज्ञाद् दुःख दग्धोऽपि जीवति)
38 अर्ज् cl. 10 अर्जयत् (अर्जयन्वसति)
39 दृश् पश्यत् (हरिपश्यन् मुच्यते)
40 गम् गच्छत् (गच्छन् भक्षयति)
41 स्था तिष्ठत् (तिष्ठन् मूत्रयति)

---

31 विदे शतुर्वसु ॥ वेत्ते परस्य शतु र्वसुरादेशो वा स्यात् । वस् is substituted for अत् optionally in the case of the root विद्

32,33 इङ्धार्योः शत्रकृच्छ्रिणि॥आभ्या शतृप्रत्यय स्यादकृच्छ्रिणि कर्तरि। The termination अत् (शतृ) is added to the root ई (इङ्) and धारि to express ease on the part of the agent.

34 द्विषोऽमित्रे ॥ अमित्र शत्रु । अमित्रे कर्तरि द्विषे शतृप्रत्यय स्यात् । The termination अत् (शतृ) is added to the root द्विष् to express an enemy

35 सुञो यज्ञसयोगे ॥ यज्ञेन सयोगो यज्ञसयोग । यज्ञसयुक्तेऽभिधेये वर्तमानात्सुनोतेः शतृप्रत्यय स्यात् । The termination अत् (शतृ) is added to the root सु when its subject is the sacrificer

36 अर्हः प्रशसायाम् ॥ प्रशसा स्तुति । अर्हते प्रशसायां शतृप्रत्यय स्यात् । The termination अत् (शतृ) is added to the root अर्ह् when it expresses praise.

37 माङ्याक्रोश इति वाच्यम् । The present participle is used with the prohibitive particle मा to imply a curse.

38 to 40 लक्षणहेत्वोः क्रियायाः ॥ क्रियायाः परिचायके हेतौ चार्थे वर्तमानाद्धातोर्लट शतृशानचौ स्त । हेतु फल कारण च । The present participle is used to express the manner, the cause and the effect of an action

II Participles of the Present

Âtmanepada *

1 पच् cl I.	पचमान† (पचमान चैत्र पश्य)	14 आस्	आसीन
2 एध्	एधमान	15 शी	शयान (शयाना भुञ्जते यवना) the Yavanas take their meals (by) lying down
3 वन्द्	वन्दमान		
4 क्रम्	क्रममाण		
5 पू	पवमान		
6 यज्	यजमान	16 स्तु	स्तुवान
7 दाप्	दीप्यमान	17 हन् with आ	आघ्नान
8 तुद्	तुदमान	18 दा	ददान
9 चुर्	चोरयमाण	19 धा	दधान
10 बोधि (Caus of बुध)	बोधयमान	20 सु	सुन्वान
11 बुध् (Desid)	बुभुत्समान	21 रुध्	रुन्धान
12 भू(Freq A)	बोभूयमान	22 तन्	तन्वान
13 द्विष्	द्विषाण	23 क्री	क्रीणान

III Participles of the future Parasmaipada

1 दा दास्यत्	4 श्रु श्रोष्यत्	7 हन् हनिष्यत्	10 चुर् चोरयिष्यत्
2 जि जेष्यत्	5 कृ कारिष्यत्	8 तद् तोत्स्यत्	
3 भू भविष्यत्	6 गम् गमिष्यत्	9 नृत् नर्त्स्यत्	

(II) Participles ending in अ should be declined in the Masculine Feminine and neuter like नृप शाला and वन

* See note 1 † Page 2 0

† आने मुक्॥अङ्गस्यात मुमागम स्यादाने परे। म् (मुक्) is added on to the base ending in अ before the termination आन

5 6 पूङ्यजो शानन् ॥ पूङ् यजोर्वर्तमाने शानन् प्रत्यय स्यात् । The termination आन् (शानन्) is added to the root पू and यज् to form the present participle before this termination the conjugational sign is added to the root.

14 ईदास ॥ आस परस्यानस्याद ईत्स्यात् । The आ of आस् is changed to ई when it is added to the root आस्

III लृटः सद्वा ॥ लृटस्तृशानचौ वास्तःसद्वा ॥ व्यवस्थितविभाषेयम् । तेनात्रय मासामानाधिकरण्य प्रत्ययोत्तरपदयो संबोधने लक्षण हेत्वोश्चनित्यम् । प्रथमासामानाधिकरण्येऽपि क्वचित् । The termination अत् (शतृ) आन (शानच्) are used to form the future participle before which the termination स्य is added to the root

Declension of the Present and Future Participles Active

*Masculine.

	भवत्			पुष्यत्	चोरयत्	बोधयत्	बुबोधिषत्
N.	भवन्	भवन्तौ	भवन्तः	पुष्यन्	चोरयन्	बोधयन्	बुबोधिषन्
Acc	भवन्तम्	भवन्तौ	भवतः	पुष्यन्तम्	चोरयन्तम्	बोधयन्तम्	बुबोधिषन्तम्
V.	भवन्	भवन्तौ	भवन्त	पुष्यन्	चोरयन्	बोधयन्	बुबोधिषन्

Neuter †

Nom.	S.	भवत्-द्	पुष्यत्-द	चोरयत्-द्	बोधयत्-द्	बुबोधिषत् द्
	D.	भवन्ती	पुष्यन्ती	चोरयन्ती	बोधयन्ती	बुबोधिषन्ती
	P.	भवन्ति	पुष्यन्ति	चोरयन्ति	बोधयन्ति	बुबोधिषन्ति

¶ Feminine.

Nom.	S.	भवन्ती	पुष्यन्ती	चोरयन्ती	बोधयन्ती	बुबोधिषन्ती
	D.	भवन्त्यौ	पुष्यन्त्यौ	चोरयन्त्यौ	बोधयन्त्यौ	बुबोधिषन्त्यौ
	P.	भवन्त्यः	पुष्यन्त्यः	चोरयन्त्यः	बोधयन्त्यः	बुबोधिषन्त्यः

Masculine

		क्षिपत्	यान्	करिष्यत्
Nom.	S.	क्षिपन्	यान्	करिष्यन्
	D	क्षिपन्तौ	यान्तौ	करिष्यन्तौ
	P.	क्षिपन्तः	यान्तः	करिष्यन्तः

‡ Neuter.

		क्षिपत्	यात्	करिष्यत्
N. Acc V.	S.	क्षिपत्-द्	यात्-द्	करिष्यत् द्
	D.	क्षिपती | क्षिपन्ती	याती | यान्ती	करिष्यती | करिष्यन्ती
	P.	क्षिपन्ति	यान्ति	करिष्यन्ति

---

* Participles of the Present tense Par of roots of the ten classes (except those of the roots of the 3 rd class) and of causal and desiderative verbs are declined in the masculine like भवत् In the Nom. Sing the penultimate अ is not lengthened

† शप्श्यनोर्नित्यम् ॥ शप्श्यनो रात्परोय. शतुरवयवस्तदन्तस्य नित्य नुम् स्याच्छीनद्योः परत । Participles of the Present tense Par. of roots of the first fourth and tenth classes and of causal and desiderative verbs keep न् in the Nom. Acc and Voc. Dual Neut.

¶ The feminine base is identical in form with the Nom Dual Neut.

‡ आच्छीनद्योर्नुम् ॥ अवर्णान्तादङ्गात्परोय. शतुरवयवस्तदन्तस्याङ्गस्य नुम् वा स्याच्छीनद्यो. परत. । Participles of the Present tense Par. of roots of the sixth class, and of roots of the 2nd class ending in आ and of the Fut. Par. in स्यत् may not insert न् in the Nom Acc. Voc Dual Neut.

Feminine ‡‡

Nom S	क्षिपती-क्षिपन्ती	याती यान्ती	करिष्यती-करिष्यन्ती

Masculine

		अदत्	सुन्वत्	रुन्धत्	तन्वत्	क्रीणत्
Nom	S	अदन्	सुन्वन्	रुन्धन्	तन्वन्	क्रीणन्
	D	अदन्तौ	सुन्वन्तौ	रुन्धन्तौ	तन्वन्तौ	क्रीणन्तौ
	P.	अदन्तः	सुन्वन्तः	रुन्धन्तः	तन्वन्तः	क्रीणन्तः

Neuter.

N. Acc. V.	S	अदत्-द्	सुन्वत्-द्	रुन्धत्-द्	तन्वत्-द्	क्रीणत्-द्
	D	अदती	सुन्वती	रुन्धती	तन्वती	क्रीणती
	P	अदन्ति	सुन्वन्ति	रुन्धन्ति	तन्वन्ति	क्रीणन्ति

Feminine ‡‡

Nom S	अदती	सुन्वती	रुन्धती	तन्वती	क्रीणती

Masculine *

		ददत्	जक्षत्	जाग्रत्	दरिद्रत्	शासत्	चकासत्
Nom	S.	ददत्-द्	जक्षत्-द्	जाग्रत्-द्	दरिद्रत्-द्	शासत्-द्	चकासत्-द्
	D.	ददतौ	जक्षतौ	जाग्रतौ	दरिद्रतौ	शासतौ	चकासतौ
	P.	ददतः	जक्षतः	जाग्रतः	दरिद्रतः	शासतः	चकासतः

‡ Neuter

N. Acc. V.	S.	ददत्	जक्षत्	जाग्रत्	दरिद्रत्	शासत्	चकासत्
	D.	ददती	जक्षती	जाग्रती	दरिद्रती	शासती	चकासती
	P.	ददति } ददन्ति	जक्षति } जक्षन्ति	जाग्रति } जाग्रन्ति	दरिद्रति } दरिद्रन्ति	शासति } शासन्ति	चकासति } चकासन्ति

Feminine. ‡‡

ददती	जक्षती	जाग्रती	दरिद्रती	शासती	चकासती

---

* वा नपुंसकस्य ॥ अभ्यस्तात्परोय शता तदन्तस्य क्लीबस्य नुम् वा स्यात्सर्वनामस्थाने परे । Participles of the Present tense Pa of roots of the 3rd class and जक्षत् जाग्रत् दरिद्रत्, शासत्, चकासत्, दीध्यत् and वेव्यत्, are declined in the masculine like महत्, they insert न् optionally before त् in the Nom Acc. and Voc Plur Neut

‡ Participles of all other roots must reject the न् in the Nom, Acc. and Voc. Dual Neuter

‡‡ The feminine base is identical in form with the Nom Dual Neut.

IV Participles of the Present Passive.

क्रियमाण   नीयमान   बोध्यमान   चोर्यमाण

V Participles of the Future Âtm .

कृ	नी	बुध् caus	चुर् cl 10.
करिष्यमाण	नेष्यमाण	बोधयिष्यमाण	चोरयिष्यमाण

VI Participles of the Future Passive.

दा	भू	बुध्	चुर्
{ दास्यमान	भविष्यमाण	बोधिष्यमाण	चोरयिष्यमाण
{ दायिष्यमाण	भाविष्यमाण		चोरिष्यमाण

VII Participles of the Reduplicated Perfect Active Parasmaipada.

Root	Base	Nom S	Acc P	Loc P.
1 दा	ददिवस्	ददिवान्	ददुष *	ददिवत्सु
2 धा	दधिवस्	दधिवान्	दधुष	दधिवत्सु
3 पा	पपिवस्	पपिवान्	पपुष	पपिवत्सु
4 स्था	तस्थिवस्	तस्थिवान्	तस्थुष	तस्थिवत्सु
5 इ	ईयिवस्	ईयिवान्	ईयुष	ईयिवत्सु

IV The Present Passive Participles are formed by adding य (यक्) to the root and then appending the termination आन (शानच्) with the augment म् (मुक्) See note † Page 262

VI The Future Passive Participles are formed by adding स्य to the root and then appending the termination आन (शानच्) with the augment म् (मुक्) to it See note † Page 262

VII क्वसुश्च ॥ छन्दसि लिट् कसुर्वा स्यात् । The Participle of the Perfect Active of Par roots are formed by adding वस् (क्वसु) to that form of the root *which it assumes before the weak termination of the perfect such as that* of the 3rd pers Plural

1 to 6 वस्वेकाजाद्घसाम् ॥ कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च वसोरिट् नान्येषाम् । The reduplicated weak base, consisting of one syllable, the roots ending in आ and the verb घस् admit the intermediate इ before the affix वस् Other roots do not admit it

* The 3 rd Pers. Plu form of the Perfect should be taken as the base of the Participle before the vowel terminations of the cases beginning with the Accusative Plural and before the ई of the Feminine and of the dual Nom and Acc of the neuter

5, 6 उपेयिवाननाश्वाननूचानश्च ॥ एते निपात्यन्ते । उपपूर्वादिणो भाषायामपि भूतमात्रे

Root.	Base	Nom S.	Acc P.	Loc. P.
6 इ	ईयिवस्	ईयिवान्	ईयुषः	ईयिवत्सु
7 श्रि	शिश्रिवस्	शिश्रिवान्	शिश्रियुषः	शिश्रिवत्सु
8 क्री	चिक्रीवस्	चिक्रीवान्	चिक्रियुषः	चिक्रीवत्सु
9 नी	निनीवस्	निनीवान्	निन्युषः	निनीवत्सु
10 श्रु	शुश्रुवस्	शुश्रुवान्	शुश्रुवुषः	शुश्रुवत्सु
11 सु	सुषुवस्	सुषुवान्	सुषुवुषः	सुषुवत्सु
12 स्तु	तुष्टुवस्	तुष्टुवान्	तुष्टुवुषः	तुष्टुवत्सु
13 भू	बभूवस्	बभूवान्	बभूवुषः	बभूवत्सु
14 ऋ	आरिवस्	आरिवान्	आरुषः	आरिवत्सु
15 कृ	चकृवस्	चकृवान्	चक्रुषः	चकृवत्सु
16 कृ with सम्	सञ्चस्कृवस्	सञ्चस्कृवान्	सञ्चस्क्रुषः	सञ्चस्कृवत्सु
17 जागृ	जजागृवस्	जजागृवान्	जजागृुषः	जजागृवत्सु
	जजागर्वस्	जजागर्वान्	जजागरुषः	जजागर्वत्सु
18 स्मृ	सस्मृवस्	सस्मृवान्	सस्मरुषः	सस्मृवत्सु
19 तॄ	तितीर्वस्	तितीर्वान्	तितिरुषः	तितीर्वत्सु

लिट् । तस्य नित्य क्वसु । उपेयिवाननाश्वाननूचानश्च । नञ्पूर्वादश्नाते. क्वसुरिडभावश्च । अनुपूर्वाद्वचेः कर्तरि कानच् । The perfect participle of इ (इण्) is formed by adding वस् (क्वसु) with the augment इ The termination वस् is added to the root अश् with अ (नञ्) without the augment इ आन (कानच्) is added to the root वच् with अनु in the active sense

10, 34, 47 भाषायां सदवसश्रुवः ॥ सदादिभ्यो भूतसामान्ये भाषायां लिट् स्यात् । तस्य च नित्य क्वसु । The roots सद्, वस् and श्रु take the termination वस् to form the Perfect Participle

14—22 ऋतश्च संयोगादेर्गुण इति सूत्रेऽरैव सिद्धे गुणग्रहण मिरलक्षणत्वेन किति चेति निषेधाय । क्वसा कित्वसामर्थ्यान्निषेधविषयस्यापि तस्य गुणस्य निषेधाङ्गीकारात् । Before the termination वस् (क्वसु) roots ending ऋ or ॠ do not take गुण

14 23 24 27 28 29 34 see note 1 to 6 Page 265

17 जागर्तीतिसूत्रे वृत्तौ केचिदिकार मुच्चारणार्थं वर्णयन्ति । तत्र क्वसावपि वकारादौ गुणो न भवति । जागृवान्सो अनु मन् । इत्युक्तम् ॥ आत्रेयस्तु तथात्वे सति शासि जजागरुषइतित्यादिति वृत्त्युक्त मिद मत दूषयन्ना "असंयोगाल्लिट्कित्" इति क्वसो कित्त्वे सिद्धे पुनस्तकरणा प्रतिषेधविषयारब्धस्यापि गुणस्य निषेध इति जजागुष इति भवितव्यमित्याह । कैयटेऽपि यत्नेो भाषायामपवत्त्वादिना कित्वसामर्थ्याद्गुणत्वमुक्तम् । अत्र वर्धमान. "क्वसावगुणत्वमाह । जजागृवानिति" इत्याह ।

माधवीयधातुवृत्ति

Root.	Base	Nom. S.	Acc P.	Loc P.
20 पॄ	पुपूर्वस्	पुपूर्वान्	पुपुरुषः	पुपूर्वत्सु
21 वॄ	ववूर्वस्	ववूर्वान्	ववुरुषः	ववूर्वत्सु
22 शॄ	शिशीर्वस्	शिशीर्वान्	शिशीरुषः	शिशीर्वत्सु
23 पच्	पेचिवस्	पेचिवान्	पेचुषः	पेचिवत्सु
24 वच्	ऊचिवस्	ऊचिवान्	ऊचुषः	ऊचिवत्सु
25 ऋच्छ्	आनृच्छ्वस्	आनृच्छ्वान्	आनृच्छुषः	आनृच्छ्वत्सु
26 प्रच्छ्	पपृच्छ्वस्	पपृच्छ्वान्	पपृच्छुषः	पपृच्छ्वत्सु
27 यज्	ईजिवस्	ईजिवान्	ईजुषः	ईजिवत्सु
28 राज्	रराजिवस्	रराजिवान्	रराजुषः	रराजिवत्सु
	रेजिवस्	रेजिवान्	रेजुषः	रेजिवत्सु
29 अञ्ज्	आजिवस्	आजिवान्	आजुषः	आजिवत्सु
30 भञ्ज्	बभञ्ज्वस्	बभञ्ज्वान्	बभञ्जुषः	बभञ्ज्वत्सु
31 तुद्	तुतुद्वस्	तुतुद्वान्	तुतुदुषः	तुतुद्वत्सु
32 भिद्	बिभिद्वस्	बिभिद्वान्	बिभिदुषः	बिभिद्वत्सु
33 विद् Cl. 6.	विविद्वस्	विविद्वान्	विविदुषः	विविद्वत्सु
	विविदिवस्	विविदिवान्	विविदुषः	विविदिवत्सु
34 सद्	सेदिवस्	सेदिवान्	सेदुषः	सेदिवत्सु
35 रुध्	रुरुध्वस्	रुरुध्वान्	रुरुधुषः	रुरुध्वत्सु
36 बन्ध्	बबन्ध्वस्	बबन्ध्वान्	बबन्धुषः	बबन्ध्वत्सु
37 खन्	चखन्वस्	चखन्वान्	चख्नुषः	चखन्वत्सु
38 तन्	तेनिवस्	तेनिवान्	तेनुषः	तेनिवत्सु
39 हन्	जघन्वस्	जघन्वान्	जघ्नुषः	जघन्वत्सु
	जघ्निवस्	जघ्निवान्	जघ्नुषः	जघ्निवत्सु
40 क्रम्	चक्रन्वस्	चक्रन्वान्	चक्रमुषः	चक्रन्वत्सु
41 गम्	जग्मिवस्	जग्मिवान्	जग्मुषः	जग्मिवत्सु
	जगन्वस्	जगन्वान्	जग्मुषः	जगन्वत्सु

29, 30, 36 (ch IV 11. 51 Page 89)

33 39, 41 विभाषा गमहनविदविशाम् ॥ एभ्यो वसोरिड्वा । विदिना साहचर्याद् विन्दतेर्ग्रहणम् । The roots गम्, हन्, विद् cl. 6. and विश् admit इ *optionally before* the affix वस्.

38 see note 1 to 6, Page 265.

Root	Base	Nom S	Acc P	Loc. P
42 अश्	अनाश्वस्	अनाश्वान्	अनाशुष	अनाश्वत्सु
43 दश्	ददशिवस्	ददशिवान्	ददशुष	ददशिवत्सु
	ददश्वस्	ददश्वान्	ददशुष	ददश्वत्सु
44 विश्	विविशिवस्	विविशिवान्	विविशुष	विविशिवत्सु
	विविश्वस्	विविश्वान्	विविशुष	विविश्वत्सु
45 द्विष्	दिद्विष्वस्	दिद्विष्वान्	दिद्विषष	दिद्विष्वत्सु
46 घस्	जक्षिवस्	जक्षिवान्	जक्षुष	जक्षिवत्सु
47 वस् with अधि	अध्यूषिवस्	अध्यूषिवान्	अध्यूषुष	अध्यूषिवत्सु

VIII Participles of the Reduplicated Perfect Active Atmanepada

1 दा	ददान	13 तॄ	ततिराण तितिराण
2 धा	दधान	14 पॄ	पपुराण पुपुराण
3 क्री	चिक्रियाण	15 वॄ	ववुराण वुवुराण
4 नी	निन्यान	16 शॄ	शशिराण शिशिराण
5 श्रु with सम्	सशुश्रुवाण	17 पच्	पेचान
6 सु	सुषुवाण	18 वच्	ऊचान
7 स्तु	तुष्टुवान	19 वच् with अनु	अनूचान
8 भू	बभूवान	20 प्रच्छ् with आ	आपप्रच्छान
9 कृ	चक्राण	21 यज्	ईजान
10 कृ with अप	अपचस्किराण	22 राज्	रराजान रेजान
11 कृ with सम्	सञ्चस्काण	23 तुद्	तुतुदान
12 कॄ	चाकिराण चिकिराण	24 भिद्	बिभिदान

42 see note 5, 6 page 266

43 दशेश्च ॥ दश क्वसो रिड्वास्यात् । The root दश् admits इ optionally before the affix वस् (क्वसु).

44 see note 33 39 41 page 267

45, 47 see note 5 to 6 page 265

VIII लिट कानज्वा ॥ छन्दसि लिट कानच् वा स्यात् । The Participles of the Perfect Active of Âtm roots are formed by adding आन (कानच्) to that form of the root which it assumes before the weak terminations of the Perfect such as that of the third person plural

19 see note 5, 6 page 265

25 विद्	विविदान	31 क्रम्	चक्रमाण
26 रुध्	रुरुधान	32 गम् with सम्	सजग्मान
27 खन्	चख्नान	33 दृश् with सम्	सददृशान
28 तन्	तेनान	34 विश्	विविशान
29 जन्	जज्ञान	35 द्विष्	दिद्विषाण
30 हन् with आ	आजघ्नान		

IX Participles of the Periphrastic Perfect Active.

1 दय्	दयाञ्चक्राण	5 उन्द्	उन्दाञ्चकृवस्
	दयाम्बभूवस्		उन्दाम्बभूवस्
	दयामासिवस्		उन्दामासिवस्
† चर् with आ also takes य when the participle thus formed does not mean a preceptor.

As.—आचर्य means गन्तव्यः but
आचार्यः means गुरुः

‡ यम् with नि takes this य. As.—नियम्यम् but
‡ प्रयाम्यम्.

---

6. **हनो वा यद्वधश्च वक्तव्यः** ॥ हन्ते र्वा यत्प्रत्ययः स्यात्। यति परे हन्ते र्नित्यं वधादेशः स्यात्। पक्षे घात्यः।

7. **पोरदुपधात्** ॥ पवर्गान्तादुपधायत् स्यात्। ण्यतोऽपवादः।

* **आङो यि** ॥ आङः परस्य लभेर्नुम् स्याद्यादौ प्रत्यये विवक्षिते। नुमि कृतेऽदुपधत्वाभावाण्ण्यदेव। Before the termination beginning with य, लभ् with आ becomes आलम्भ्.

* **उपात्प्रशंसायाम्** ॥ उपः परस्य लभेर्नुम् स्याद्यादौ प्रत्यये विवक्षिते प्रशंसायां गम्यमानायाम्। Before the terminations beginning with य, लभ् with उप becomes उपलम्भ् *to express praise.*

8. **गदमदचरयमश्चानुपसर्गे** ॥ अनुपसृष्टाद्गदमदचरयमो यत्स्यात्।

† **चरे राङि चागुरौ** ॥ † निपूर्वात्स्यादेव. "तेन तत्र भवेद्विनियम्यमिति" वार्तिकप्रयोगात्। ‡ पोरदुपधादित्यनेनैव सिद्धे नियमार्थं यमो ग्रहणम्। सोपसर्गान्माभूदिति।

9. The following roots take this य in particular senses –

(1) ऋ–अर्य, a lord and a man of the वैश्य caste) but आर्य (प्राप्तव्य. to be sought, a Brahmin).

(2) क्री–क्रय्यम् (*exposed for sale*) but क्रेयम् (fit to be sold)

(3) क्षि–क्षय्यम (what can be reduced)–क्षेयम् (fit to be reduced as क्षेय पापम्).

(4) जि–जय्यम् (what can be conquered)–जेयम् (what is fit to be conquered, as जेय मन)

(5) जॄ–with अ (नञ्)–अजर्यम् (what does not decay or grow old) This word must qualify सगत. *but if it does not qualify* सगत it would take the termination तृ, as अजरिता कम्बल (a blanket which never wears out)

(6) पण्–पण्यम् (a marketable article). पाण्य (स्तुत्य, *deserving praise*)

(7) वद्–with अ (नञ्)–अवद्यम् (censurable). अनुद्यम् (not to be spoken out of respect as अनुद्य गुरनाम).

---

9. (1) **अर्य स्वामिवैश्ययोः** ॥ ऋगतावस्माद्यन् स्वामिवैश्ययोरभिधेययो । (2) **क्रय्यस्तदर्थे** ॥ तस्मै प्रकृत्यर्थायेद तदर्थम् । क्रयार्थे वस्तुनि क्रय्य इति निपात्यते । (3, 4) **क्षय्यजय्यौ शक्यार्थे** ॥ यान्तादेशनिपातनार्थमिदम् । यादो प्रत्यये परे क्षि क्षये जि जय इत्यनयोरेकारस्यायादेश स्याच्छक्यार्थे गम्यमाने । (5) **अजर्यं संगतम्** ॥ नञ्पूर्वाज्जीर्यते कर्तरि यत्सगत चेद्विशेष्यम् । न जीर्यतीत्यजर्यम् । भावे तु सगतकर्तृकेऽपि ण्यदेव । अजार्य सगतेन । (6, 7, 9) **अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु**॥ वद नञ्युपपदे " वद सुपीति " यत्यपो प्राप्तयोर्यदेव । सोऽपिगर्ह्यायामेवत्युभयार्थे निपातनम् । व्यवहारार्थकात्पणधातोर्यत्स्यात् । अनिरोधोऽप्रतिबन्धस्तस्मिन्विषये वृङो यत् । कन्याया वरणे वरयितृणा नियमो नास्तीत्यप्रतिबन्ध इत्यर्थ ।

१८४८

5856

(8) वह्-वह्यम् (वहत्यनेनेति—a waggon),
वाह्यम्-(what can be borne).

(9) वृ-वर्या (a girl that can be sought after for marriage by many men)
वृत्या (a girl that can be sought after only by a particular man)

(10) सृ with उप—उपसर्या a cow fit to be covered by a bull,) but उपसार्या काशी (प्राप्तव्येत्यर्थः, *Kashi should be resorted to*)

10 Roots ending in ऋ and those ending in a consonant *take the termination* य (ण्यत्) *Before this* य (ण्यत्), *the final* vowel and the penultimate अ take their वृद्धि substitute; As-कार्यम्, वर्ष्यम्.

11. (a) The च् *or* ज् *of a root which is* anit *in* निष्ठा (*i. e.* before the terminations त and तवत् are changed to क् and ग् respectively *before* the termination having a mute घ्, and the termination ण्यत् when it does not express necessity. As.-मृज्—मार्ग्य, पच्-पाक्यम्; but अवश्य पाच्यम्.

(b) The च् of वञ्च् when it means 'to go' is not changed to क् under the above mentioned circumstances As —वञ्च्यम् (that can be approached), but वङ्क्यम् (that can be bent).

(c) The roots यज्, याच्, रुच्, प्रवच्, ऋच्, त्यज्, and पूज् do not change their final to क् or ग् before ण्यत् As —याज्यम्, या-

---

9. (8) वह्यं करणम् ॥ वहधातोः करणे यत् । (10) उपसर्या काल्या प्रजने ॥ उपोपसृष्टात्सरतेर्यद्गर्भग्रहणे प्राप्तकालाया गम्यमानायाम् ।

10. ऋहलोर्ण्यत् ॥ ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्स्यात् ।

11. (a) चजोः कु घिण्ण्यतोः ॥ चस्य जस्य च कुत्वं स्याद्घिति ण्यति च परे । निष्ठायामनिट इति वक्तव्यम् ॥ तेनेह न । गर्ज्-गर्ज्यम् । ण्य आवश्यके ॥ चस्य जस्य च कुत्वं न स्यादावश्यके ण्यति परे ।

11 (b) वञ्चेर्गतौ ॥ गत्यर्थकस्य वञ्चतेश्चस्य कुत्वं न ।

11. (c) यजयाचरुचप्रवचर्चश्च ॥ त्यजिपूज्योश्च ॥ इति काशिका । एषां चस्य जस्य च कुत्वं न ।

5856

च्यम्, रोच्यम्, प्रवाच्यम्, (a particular kind of literary work) * अर्च्यम्, त्याज्यम्, पूज्यम्.

(d) The root वच् does not change its final to क् before ण्यत् unless when it means a sentence. As:--वाच्यम् what is to be said); but वाक्यम् *a sentence.*

(e) The root युज् with प्र or नि does not change its final to ग् before ण्यत् when the words denote capability. As:-प्रयोज्यः=प्रयोक्तुं शक्यः to be used. नियोज्यः=नियोक्तुं शक्यः; one charged with any duty, but प्रयोग्यः— a horse; नियोग्यः—a lord.

(f) The root भुज् does not change its ज् to ग् when it means 'food' As:-भोज्यम्. But भोग्यम् (what is fit to be enjoyed)

12. Roots ending in उ short or long take this य (ण्यत्) *in the sense of what ought necessarily to be done.* As:—लाव्यम्, पाव्यम्.

13 The roots सु with आ, यु, वप्, रप्, लप्, त्रप्, चम्, and दभ् take this termination. As:-आसाव्यम्, याव्यम्, वाप्यम्, राप्यम्, लाप्यम्, त्राप्यम्, चाम्यम् and दाभ्यम्.

14. The root सृज् along with पाणि or preposition समव takes this termination. As:- पाणिसर्ग्या (पाणिभ्यां सृज्यते, रज्जुः a rope); समवसर्ग्या.

15. The following words are derived irregularly by means of ण्यत् in particular senses.

(1) वस् with अमा—अमावास्या or अमावस्या (अमा सह वसतोऽ

* ऋदुपधत्वेऽप्यत एव ज्ञापकाण्ण्यत्।

11. (d) वचोऽशब्दसंज्ञायाम्॥ वचः कुत्वं न स्यादशब्दसंज्ञायाम्।

11. (e) प्रयोज्यनियोज्यौ शक्यार्थे॥

11 (f) भोज्यं भक्ष्ये॥

12. ओरावश्यके॥ उवर्णान्ताद्धातोर्ण्यत्स्यादवश्यंभावे द्योत्ये।

13. आसुयुवपिरपिलपित्रपिचमश्च॥ दभेश्चेति वक्तव्यम्॥

14. पाणौ सृजेर्ण्यद्वाच्यः॥ समवपूर्वाच्च॥ ऋदुपधलक्षणस्य क्यपोऽपवादः।

15. (1) अमावस्यदन्यतरस्याम्॥ अमोपपदाद्वसेरधिकरणे ण्यत्। वृद्धौ सत्यां पाक्षिको ह्रस्वश्च निपात्यते।

स्या चन्द्रार्कौ The day when the sun and the moon come together)

(2) नी with आ–आनाय्य (दक्षिणाग्निविशेष सोऽनित्य सततमप्रज्वलनात्, what ought to be brought from गार्हपत्य) but आनेय (घटादि or वैश्यकुलादानीतो दक्षिणाग्निश्च).

(3) नी with प्र–प्रणाय्य (चोर , प्रीत्यनर्ह).
प्रणाय्य (अन्तेवासी, विरक्त one disgusted with worldly pleasures)
but प्रणेय) प्रणेतु योग्य –fit to be carried.

(4) मा–पाय्यम् (मीयतेऽनेन a measure),
but मेयम् मातु योग्यम्–capable of being estimated).

(5) नी with सम्–सानाय्यम् (हविर्विशेष , सम्यङ्नीयते होमार्थमग्निं प्रतीति Any substance mixed with clarified butter and offered as an oblation to the sacrificial fire), but सनेय – (सनेतु योग्य – to be brought together)

(6) चि with नि–निकाय्यम् (निचीयतेऽस्मिन्धान्यादिकम्, a house, but निचेयम् (fit to be stored).

(7) धा–धाय्या (सामिधेनी, धीयतेऽनया समिदिति.) a particular kind of ऋक् after reciting which the stick समित is thrown into the sacrificial fire) but, धेयम् धातु योग्यम्–fit to be pleased).

---

15. (2). **आनाय्योऽनित्ये** ॥ आङ्पूर्वान्नयतेर्ण्यदायादेशश्च निपात्यते।

15 (3). **प्रणाय्योऽसंमतौ** ॥ समति प्रीतिविषयीभवन कर्म [illegible]। तथा भोगेष्वादरोऽपि समति । प्रपूर्वान्नयतेर्ण्यदायादेशश्च निपात्यतेऽसमतौ [illegible] मानायाम्।

15. (4 to 7) **पाय्य सान्नाय्य निकाय्य धाय्या मानहविर्निवास सामिधेनीषु** ॥ माधातोर्ण्यत । धात्वादे पत्व च । [illegible] सपूर्वान्नयतेर्ण्यदायादेश समो दीर्घश्च निपात्यते । निपूर्वाच्चिनोतेर्ण्यत् [illegible] आय् धात्वाद कुत्व च निपात्यते । धाधातोः करणे ण्यत् ।

(8) कुण्ड+पा–कुण्डपाय्य (क्रतु, कुण्डेन पीयतेऽस्मिन्सोम इति. a particular sacrifice) but कुण्डपानम् (अधिकरणे ल्युट्)

(9) चि with सम्–सचाय्य (सचीयतेऽस्मिन्सोम इति a particular sacrifice) but सचेय (सञ्चेतुं योग्य - what is fit to be stored)

(10) चि with परि–परिचाय्य
(11) „ „ उप–उपचाय्य
(12) वह् „ सम्–समूह्य
These three denote particular places for sacrificial fire.

but परिचेय, उपचेय, सवह्य.

(13) चि–चित्य (चीयतेऽसौ sacrificial fire) but चेय..

(14) चि with अग्नि–अग्निचित्या।

THE TERMINATION य (क्यप्)

16 Before the (कृत्) termination with a mute प् the short vowel of a root takes त् after it This termination is weak

17 The root वद् along with a noun without a preposition takes य (क्यप् or यत्) to express abstract notion As— ब्रह्मोद्यम् or ब्रह्मवद्यम् (ब्रह्म वेदस्तस्य वदन विवरणम्, the exposition of the vedas) सत्योद्यम् or सत्यवद्यम्. But वाद्यम्, प्रवाद्यम्. वद् takes सम्प्रसारण before this weak termination.

18 The root भू under the same circumstances as वद्

---

15. (8 9) क्रतौ कुण्डपाय्यसंचाय्यौ॥ कुण्डपाय्य सचाय्य इत्येतौ शब्दौ निपात्येते क्रतावभिधेये।

(10 to 12) अग्नौ परिचाय्योपचाय्यसमूह्याः॥ अग्निधारणार्थे स्थलविशेष एते साधव।

(13, 14) चित्याग्निचित्ये च॥ अग्निचयनमेवाग्निचित्या।

16 ह्रस्वस्य पिति कृति तुक्॥ ह्रस्वस्य तुगागम स्यात्पिति कृति परे।

17. वदः सुपि क्यप् च॥ उपसर्गादेव भाव इत्याकृष्यते। वदधाते क्यप्स्याद्यच्चानुपसर्गे सुप्युपपदे।

18. भुवो भावे॥ भुवो भावे क्यप् स्यादनुपसर्गे सुप्युपपदे।

above takes क्यप् As —ब्रह्मभूयम् (ब्रह्मणो भवनम्, becoming ब्रह्म) but भव्यम्, प्रभव्यम्, देवभूयम्.

19 The root हन् under the same circumstances takes क्यप् and its न् is changed to त्. As.—ब्रह्महत्या (ब्रह्मणो हननम्), अश्वहत्या.

20 The roots इ, स्तु, शास्, वृ 5th conj. दृ and जुष् take क्यप्. As—इत्य:, स्तुत्य:, * अवश्यस्तुत्य:, शिष्य:, वृत्य:, आदृत्य:, जुष्य:, According to काशिका, शस्, दुह् and गुह् take क्यप् optionally. As—शास्—शास्य (by क्यप्) but शस्य: by ण्यत्.

दुह्—दुह्य: (by क्यप्) but दोह्य: (by ण्यत्)

गुह्—गुह्य. ,, गाह्य ,,

21. अञ्ज् with आ takes this क्यप् to signify ghee. आज्यम् (अज्यतेऽनेन, ghee).

22. Roots with penultimate ऋ short except कृप् and चृत् take क्यप्. As —वृत्यम् But कल्प्यम्, चर्त्यम्.

23. The root खन् takes this termination before which the final न् is changed to ई. As —खेयम्.

24. The root भृ 1st conj takes this termination when it

---

19. **हनस्त च** ॥ अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप्स्यात्तकारश्चान्तादेश. । ब्रह्महत्या । स्त्रीत्व लोकात् ।

20. **एतिस्तुशास्वृदृजुषः क्यप्** ॥ एभ्यः क्यप्स्यात् । वृ इति वृञो ग्रहणम् । न वृङ । वृत्य. । वृङस्तु वार्या ऋत्विज । * पुन. क्यपुक्ति परस्यापि ण्यतो बाधनार्था । **शंसिदुहिगुहिभ्यो वा** । इति **काशिका** ।

21. **आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम्** ॥ अञ्जू व्यक्तिम्रक्षणादिषु । बाहुलकात्करणे क्यप् । अनिदितामिति नलोप ।

22. **ऋदुपधाच्चाक्लृपिचृतेः** ॥ ऋकारोपधाच्च धातोः क्यप्प्रत्ययो भवति क्लृपिचृती वर्जयित्वा ।

23. **ई च खनः** ॥ खनधातो. क्यप् । अन्त्यस्येकारादेशश्च । आद्गुण. ।

24. **भृञोऽसंज्ञायाम्** ॥ भृञातो. क्यप् स्यादसंज्ञायां गम्यमानायाम् । **समवश्चतुलम्** ॥ अमज्ञायामेव विकल्पार्थ मिद वार्त्तिकम् ।

does not expre s a name As.–भृत्या (भर्तव्या इत्यर्थ) but भार्या नाम क्षत्रिया . The word भार्या meaning a wife is derived from भृ 3rd conj or भृ 9th conj by termination ण्यत्

भृ with a preposition takes क्यप् optionally. As –सम्भृत्या , सभार्या .

25 The roots मृज्, कृ & वृष् take this termination optionally As मृज्य or मार्ग्य , कृत्यम् or कार्यम्, वृष्यम् or वर्ष्यम्.

26 Some of the following words are formed by क्यप् irregularly and are used in particular senses

(1) राजसूय or राजसूयम् a kind of sacrifice (राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्य , यद्वा लतात्मक सोमो राजा स सूयते कण्डातेऽत्राधिकरणे क्यप् । निपातनाद्दीर्घ) राजन्+सु+क्यप्.

(2) सूर्य –सृ or सू 6th conj +क्यप्

(a) सरत्याकाशे सूर्य . The क्यप here denotes the agent and the ऋ of सृ is changed to उर् and we get सूर्य.

(b) सुवति कर्मणि लोक प्रेरयति सु+क्यप् In this case र् is added to the root.

(3) मृषो द्यम् or द्या–a lie

(4) रुच्य –Tasty. रोचतेऽसौ रुच्य । कर्तरि क्यप्

(5) कुप्यम्–सुवर्णरजतभिन्न धन कुप्यम्=Wealth which does

---

25 मृजेर्विभाषा ॥ मृजे क्यब्वा स्यात् । ऋदुपधत्वाभिये प्राप्ते विभाषेयम् । पक्ष ण्यत् । मृज्य ।

26 राजसूय सूर्य मृषोद्य रुच्य कुप्य कृष्टपच्याव्यथ्या ॥ एत सप्त क्यबन्ता निपात्यन्ते ।

(2) (a) कर्तरि क्यप् । निपातनादुत्वम् । (b) षू प्रेरणे तुदादि । क्यपो रुट् ।

(3) मृषोपपदाद्वदे कर्मणि नित्य क्यप् । विशेष्यनिघ्नोऽयम् ।

(5) गुपेरादेः कुत्वं च सज्ञायाम् ॥

not include gold or silver. But गोप्यम्-what is to be concealed.

(6) कृष्टपच्यम्–कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः. That which grows spontaneously in a field. But,

कृष्टपाक्या·–Produced by labour in a field

(7) अव्यथ्य –न व्यथते (कर्तरि क्यप्) one senseless to pain.

(8) भिद्य –भिनत्ति कूलं भिद्यः–a river.

(9) उद्ध्यः–उज्झत्युदकमुध्य·—a river. उज्झेर्धत्वं निपात्यते but भेत्ता, उज्झिता In both the cases भिद्य and उध्य, the termination क्यप् denotes the agent which must necessarily be a river

(10) पुष्य. & (11) सिध्य – The roots पुष् and सिध् take क्यप् in the sense of अधिकरण, when the whole word expresses a constellation.

पुष्यन्त्यस्मिन्नर्था इति पुष्यः ।

सिध्यन्त्यस्मिन्निति सिध्य. but पोषणम्, सेधनम्, (अधिकरणे ल्युट्).

(12) विपूय – (वि+पू+क्यप्) मुञ्जः (रज्ज्वादिकरणाय शोधयितव्यो दर्भविशेष । A kind of grass (मुञ्ज) to be prepared for a rope. क्यप् here denotes the object of an action; otherwise विपव्य (by यत्).

(13) विनीय –वि+नी+यः (कल्क, sin or a kind of medical preparation made by grinding drugs between the slabs of stone). Otherwise विनेय ।

(14) जित्यः–जि+त्य (क्यप्); (a kind of wooden apparatus to level a ploughed field·) कृष्टसमीकरणार्थं स्थूलकाष्ठम्) otherwise जेयम् ।

(8—9) **भिद्योद्ध्यौ नदे** ॥ भिदेरुज्झेश्च क्यप् । उज्झेर्धत्वं च ।

(10—11)· **पुष्यसिध्यौ नक्षत्रे** ॥ अधिकरणे क्यप् निपात्यते ।

(12) **विपूय विनीयजित्या मुञ्जकल्कहलिषु** ॥ विपूय विनीय जित्य इत्येते शब्दा निपात्यन्ते यथासंख्य मुञ्ज कल्क हलि इत्यर्थेषु वोध्येषु।

27 The root ग्रह् takes य (क्यप्) to express the senses of पद, अस्वैरी, बाह्या, and पक्ष्य As - अवगृह्यम्, प्रगृह्यम्. (पदम्), (These signify two technical terms for words in grammar)

(अस्वैरी) गृह्यका (शुका. पञ्जरादिबन्धनेन परतन्त्रीकृता., parrots confined in a cage)

(बाह्या) ग्रामगृह्या– (सेना ग्रामाद्बहिर्भूता an army stationed outside a village)

स्त्रीलिंगनिर्देशात्पुनपुंसकयोर्न भवति.

(पक्ष्य) आर्यगृह्य –(आर्यैर्गृह्यत इति तत्पक्षाश्रित, one on the side of the noble)

28 The roots कृ and वृष् take य (क्यप्) optionally कृत्यम्, वृष्यम् (by क्यप्), कार्यम्, वर्ष्यम् by (ण्यत्)

(a) The root युज् takes य (क्यप्) and its ज् is changed to ग् when the word thus formed expresses a conveyance

29 भव्य, जन्य, आप्लाव्य, आपात्य express active and impersonal senses, and गेय, प्रवचनीय, उपस्थानीय, express active and passive sense

भव्य =भवतीति or भव्यमनेनेति

जन्य =जायतेऽसौ or जन्यमनेनेति

आप्लाव्य =आप्लवतेऽसौ or आप्लाव्यमनेनेति.

आपात्य =आपतत्यसौ or आपतत्यनेनेति.

गेय.=गायतीति (साम्नामयम्)

=गेयम् (समानेन).

प्रवचनीयः=प्रवचतीति (गुरु स्वाध्यायस्य), प्रोच्यते (गुरुणा स्वाध्याय)

उपस्थानीय =उपतिष्ठतीति (अन्तेवासी गुरो) or उपस्थीयते (गुरु शिष्येण).

---

27. **पदास्वैरिबाह्यापक्ष्येषु च** ॥ एष्वर्थेषु ग्रहे क्यप् स्यात् ॥

28. **विभाषा कृवृषोः** ॥ क्यप्स्यात्पक्षे ण्यत्। कृत्यम्। कार्यम् वृष्यम्। वर्ष्यम्। (a) **युग्यं च पत्रे** ॥ युजधातोः क्यप् कुत्वं च निपात्यते पत्रे (वाहने) गम्यमाने। योग्यमन्यत्।

29. **भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा।** एते कृत्यप्रत्ययान्ता कर्तरि वा निपात्यन्ते। पक्षे तयोरेवेति सकर्मकात्कर्मणि अकर्मकात्तु भावे ज्ञेया।

CHAPTER XVII.

UPA-PADA-PRAKRIYÀ (उपपदप्रक्रिया.)

(a) TERMINATIONS DENOTING AGENT IN GENERAL.

1. *Roots take the termination* अ (अण्) *when the objects* are with them

Before this अ (अण्) the final vowel and the penultimate अ *of roots take their* वृद्धि *susbstitute and the penultimate* short vowel takes its guna substitute, and य is added on to the roots ending in आ. As:—कुम्भकारः (कुम्भं करोतीति, a potter), गोसन्दायः. The words गङ्गाधर and भूधर are genitive तत्पुरुष compounds. As- गङ्गाया धरः and भुवो धरः The word धर is formed by the root धृ taking the termination अ (अच्). As.—धरतीति धरः.

2. The roots शील्, काम्, भक्ष्, चर् with आ, ईक्ष् and क्षम् take अ (ण and not अण्) As—मांसशील:, मांसकाम:, मांसभक्षः, कल्याणाचार:, सुखप्रतीक्षः, बहुक्षमः.

The difference between अण् and ण is that the feminine forms of the former are made up by adding ई while those of the latter are made up by adding आ. As.— कुम्भकारी, मांसशीला.

3 The roots ह्वे, वे and मा take अण् when the object is prefixed to them As:—स्वर्गह्वायः, तन्तुवायः, धान्यमायः.

(a) कर्तरिकृत् ॥ कृत्प्रत्ययः कर्तरि स्यात् ।

1. कर्मण्यण् ॥ कर्मण्युपपदे धातोरण्प्रत्ययः स्यात् । उपपदसमासः । आदित्यं पश्यतीत्यादावनभिधानान्न । कथं तर्हि गङ्गाधरभूधरादयः । कर्मणः शेषत्वविवक्षायां भविष्यन्ति ।

2. शीलिकामिभक्षाचरिभ्यो णः ॥ ईक्षिक्षमिभ्यां च ॥ अणो ऽपवादार्थं वार्तिकद्वयम् ।

3. ह्वावामश्च ॥ कर्मण्युपपदे ह्वावामोऽण् स्यात् । आतोऽनुपसर्गे कः इति विहितस्य कस्यापवादः ।

4 Roots ending in आ not preceded by a preposition take अ (क) when the object is prefixed to them Before this अ (क) the ending आ of a root is dropped As —गोद, पार्ष्णिग्रम् But गासन्दाय (by अण्)

5 Roots capable of taking सम्प्रसारण take अ (ड) instead of अ (क) under the same circumstances as above Before अ (ड) the final vowel or the final consonant with the preceding vowel is dropped As —ब्रह्मज्य (ब्रह्म जिनातीति).

6 Roots ending in आ take अ (क) when a सुबन्त (word with a case termination) is prefixed to it As —द्विप: (elephant, द्वाभ्यां पिबतीति), समस्थ, विषमस्थ, प्रष्ठ .*

7 The root स्था takes अ (क) when it is preceded by a सुबन्त and expresses an abstract notion As —आखूत्थ (आखूनामुत्थानम्)

† N B In the following rules, the transitive verbs are preceded by an object while the intransitive ones are *preceded* by a सुबन्त

8 The roots मृज् with परि and नुद् with अप take अ (क) when they are preceded by तुन्द and शोक respectively, to express idleness and giver of comfort.

---

4. **आतोऽनुपसर्गे कः** ॥ आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे क स्यात् । माण् ।

5. **कविधौ सर्वत्र प्रसारिणिभ्यो डः** ॥

6. **सुपि स्थः** ॥ सुपीति योगो विभज्यते । सुप्युपपद आदन्तात्क स्यात् ।

7 **स्थ** ॥ सुपि तिष्ठते क स्यादारम्भसामर्थ्याद्भावे ।

* **प्रष्ठोऽग्रगामिनि** ॥ The स् of स्था is changed into ष् in the word प्रष्ठ when it expresses a leader, *otherwise* प्रस्थ

† इत ऊर्ध्वं कर्मणि सुपीति द्वयमप्यनुवर्तते । तत्र सकर्मकेषु कर्मणेत्यस्य सबन्ध । अकर्मकेषु सुपीत्यस्य सबन्ध ।

8. **तुन्दशोकयोः परिमृजापनुदोः ॥ आलस्यसुखाहरणयोरिति वक्तव्यम्** ॥ तुन्दशोकयो कर्मणोरुपपदयो परिमृजापनुदो क स्यात् । यथासङ्ख्यमालस्यसुखाहरणयोर्गम्यमानयो ।

As—तुन्दपरिमृज: (an idle man) but
तुन्दपरिमार्ज (तुन्द परिमार्ष्टीति) one who rubs his belly.
शोकापनुद (शोकमपनुदतीति, सुखस्याहर्ता, one that brings happiness) but
शोकापनोद (संसारासारत्वोपदेशेन शोकमपनुदतीति, one that removes grief by advising that there is *nothing substantial in this world*)

9 The following words are derived by adding अ (क) to the roots मूलविभुज (रथ), नखमुचानि (धनूंषि), काकगुहा (तिला) कुमुदम् (कौ मोदते), महीध्र , कुध्र , गिल , and others of the same sort, प्रलम्बघ्न , शत्रुघ्न , कृतघ्न *&c*

10. The roots दा and ज्ञा both with प्र take अ (क) when preceded by an object As —सर्वप्रद , पथिप्रज्ञ but गोसप्रदाय (by अण्).

11 The root ख्या preceded by सम् takes अ (क) when the object is prefixed to it As —गोसंख्य (गा. संचष्टे, one who counts cows)

12 The roots गै and पा not *preceded by a preposition* take अ (टक्) when an object is prefixed to गै, and सुरा and शीधु to पा.

As —सामग (fem. सामगी), सुराप (fem. सुरापी), and शीधुप (fem शीधुपी), but क्षीरपा (by क, ब्राह्मणी).

13. The root हृ takes अ (अच्) when an object is prefixed to

9. मूलविभुजादिभ्यः कस्योपसंख्यानम् ॥ मूलविभुजादिराकृतिगण ।

10. प्रे दाज्ञः ॥ दाज्ञाभ्यां जानातेश्च प्रोपसृष्टात् कर्मण्युपपदे क स्यात् । अणोऽपवाद । आतोऽनुपसर्गे इति सूत्रेऽनुपसर्ग इत्युक्ते प्राप्त्यभिन्नतुपि न प ।

11. समि ख्यः ॥ कर्मण्युपपदे समुपसृष्टात्ख्यातो क स्यात ।

12. गापोष्टक् ॥ अनुपसृष्टाभ्यामाभ्या टक् स्यात् कर्मण्युपपदे । स्त्रियां ङीप् । सामगी । पिबतेःसुराशीध्वोरिति वाच्यम् ॥

13—14 हरतेरनुद्यमनेऽच ॥ कर्मण्युपपदे हरतेरच्प्रत्यय स्यादनुद्यमने गम्यमाने । शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुःषु ग्रहेरुपसंख्यानम् ॥

it and when हृ has not the sense of 'lifting up'. As:—अंशहरः (one entitled to a share) but भारहारः (by अण् one who bears a load.).

14. The root ग्रह takes this अ (अच्) when the words शक्ति, लाङ्गल, अङ्कुश, तोमर, यष्टि, घट, घटी, and धनुस् are prefixed to it. As.—शक्तिग्रहः, लाङ्गलग्रहः, अङ्कुशग्रहः, यष्टिग्रहः, तोमरग्रहः, घटग्रहः, घटीग्रहः, धनुर्ग्रहः.

15. The root ग्रह् takes अ (अच्) when it is preceded by सूत्र, when it expresses the sense of wearing. As:—सूत्रग्रह (one who wears a thread), but सूत्रग्राहः (one who takes a thread in his hands).

16 The root हृ takes अ (अच्) when the object is prefixed to it and when it expresses age. As:—कवचहरः (क्षत्रियकुमारः); अस्थिहरः (श्वा).

17. हृ with आ takes अ (अच्) when the object is prefixed to it and when it expresses a habit As:—पुष्पाहर (पुष्पाण्याहरति तच्छील.) फलाहरः but भाराहारः (one who bears a load).

18. The root अर्ह् takes अ (अच्) when the object is prefixed to it पूजार्हः (fem. पूजार्हा).

19. The roots रम् and जप् preceded by a सुबन्त take अ (अच्) when the whole word thus formed means 'an elephant' and 'a back-biter' respectively.

---

15. **सूत्रे च धार्यर्थे ॥** यस्तु सूत्रं केवलमुपादत्ते न तु धारयति तत्राणेव ।

16. **वयसि च ॥** वयसि गम्यमाने हरतेः कर्मण्युपपदेऽच्प्रत्ययो भवति । उद्यमनार्थोऽयमारम्भ । कालकृता शरीरावस्था यौवनादिर्वयः । यदुद्यमनं क्रियमाणं संभाव्यमानं वा वयो गमयति तत्राय विधिः ।

17. **आङि ताच्छील्ये ॥** आङ्पूर्वाद्धरतेः कर्मण्युपपदेऽच्प्रत्ययो भवति ताच्छील्ये गम्यमाने । ताच्छील्यं तत्स्वभावता ।

18. **अर्हः ॥** अर्हतेरच् स्यात्कर्मण्युपपदे । अणोऽपवादः ।

19. **स्तम्बकर्णयो रमिजपोः ॥** हस्तिसूचकयोरिति वक्तव्यम् ॥

sense of cause habit or obedience, but it takes अ (अण्)
As —शब्दकार, &c

26 With the words स्तम्ब and शकृत् as objects, the root कृ takes the termination इ (इन्) to express rice and a young one respectively As — स्तम्बकरि (व्रीहि), शकृत्करि (वत्स); but स्तम्बकार, शकृत्कार (by अण्)

27 With the words दृति & नाथ as objects the root हृ takes the termination इ (इन्) to express a beast as agent of the action

As —दृतिहरि (दृतिं हरतीति).

नाथहरि ,(नाथ नासारज्जु हरतीति) but दृतिहार , नाथहार ,by अण्.

28 The root ग्रह् with the word फल (changeable into फले) as an object and the root भृ with the words आत्मन्, कुक्षि, or उदर as an object take इ (इन्); As —फलेग्रहि , आत्मंभरि , कुक्षिंभरि , उदरंभरि . Here म् is added to आत्मन्, कुक्षि and उदर.

THE TERMINATION अ (खश्)

29 Before this termination, conjugational sign is added on to the root and the ending long vowel if any, of the preceding word except an indeclinable is shortened and म् is added on to the words ending in a vowel, अरुष् and द्विषत्

30 With the words expressive of an object the causal of एज् takes अ (खश्). As —जनमेजय (जनमेजयतीति).

---

26 स्तम्बशकृतोरिन् ॥ व्रीहिवत्सयोरिति वक्तव्यम् ॥ स्तम्ब शकृत् इत्येतयो कर्मणोरुपपदयोरिन्प्रत्ययो भवति व्रीहिवत्सयोर्गम्यमानयो ।

27· हरतेर्दृतिनाथयो पशौ ॥ दृतिनाथयोरुपपदयोर्हञ इन्स्यात्पशौ कर्तरि ।

28· फलेग्रहिरात्मंभरिश्च ॥ उपपदस्यैदन्तत्वं ग्रहेरिन्प्रत्ययश्च निपात्यते । फलानि गृह्णातीति फलेग्रहि । आत्मनो मुमागम । भृञ इन् । आत्मानं बिभर्तीति—आत्मंभरि । चात्कुक्षिंभरि । चाद्रास्तु "आत्मोदरकुक्षिषु" इति पेठु ।

29· खित्यनव्ययस्य ॥ खिदन्ते परेऽनव्ययस्य पूर्वपदस्य ह्रस्व स्यात् । अरुर्द्विषदजन्तस्य मुम् ॥ अरुषो द्विषतोऽजन्तस्य च मुमागम स्यात्खिदन्त उत्तरपदे । नत्वव्ययस्य । शिन्त्वा छमादि ।

30 एजेः खश् ॥ ण्यन्तादेजते खश् स्यात् ।

31 The root अज with the word वात, the root धे with the word शुनी, the root तुद् with the word तिल, and the root हा (in the causal sense) with the word शर्ध take अ (खश्). As - वातमजा (deer facing the wind), शुनिंधय (शुनीं धयतानि a whelp), तिलंतुद (an oilman), शर्धंजहा (a kind of bean, because they produce flatulence)

32 The root धे with the word स्तन and the root ध्मा with words नासिका and स्तन expressive of objects take अ (खश्). As - स्तनंधय (स्तन धयतीति, a child at the breast) Fem स्तनंधया.
नासिकंधम (नासिका धमतीति) Blowing through the nose.
नासिकंधय (नासिका धयतीति). Drinking through the nose

33 The roots ध्मा and धे when compounded with नाडी, मुष्टि, घटी, खारा and खरी, take अ (खश्). As - नाडिंधम (a gold smith) नाडिंधय , मुष्टिंधम , मुष्टिंधय , घटिंधम , घटिंधय , खारिंधम , खारिंधय , खरिंधम , खरिंधय

34 The roots रुज् and वह् with the preposition उद् when compounded with the word कूल take अ (खश्) कूलमुद्रुज. (कूलमुद्रुजतीति) , कूलमुद्वह (कूलमुद्वहतीति).

35 The root लिह् with the wods वह and अभ्र as objects

---

31. **वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्य उपसंख्यानम्** ॥ शर्धोऽपानशब्द । त जहतीति विग्रह । जहातिरन्तर्भावितण्यर्थ ।

32 **नासिकास्तनयोर्ध्माधेटोः ॥स्तने धेटो नासिकायां ध्मश्चेति वाच्यम्** ॥ धेटष्टित्वान्ङीप् । स्तनंधयी ।

33 **नाडीमुष्ट्योश्च ॥ घटी खारी खरीषूपसंख्यानम्** ॥ कर्मण्येष्वेतेषूपपदेषु ध्माधेटो खश् स्यात् ।

34. **उदि कूले रुजिवहो** ॥ उत्पूर्वाभ्या रुजिवहिभ्या कूले कर्मण्युपपदे खश् स्यात् ।

35. **वहाभ्रे लिहः** ॥ एतयो रुपपदयो कर्मणोर्लिह खश् स्यात् । वहः स्कन्ध । त लेढीति वहंलिहो गो । अदादित्वाच्छपो लुक् । खशो ङित्वान्न गुण ।

takes अ (खश्) As:—

वहलिहः (वह लेढीति a bull licking his hump)

अभ्रंलिहः (अभ्रं लेढीति, wind).

36. The root पच् with the words expressive of measure and with words मित and नख takes अ (खश्). As - प्रस्थंपचा (स्थाली); द्रोणपच. खारिंपचः, मितंपचा (ब्राह्मणी); *नखपचा (यवागू.)

37. The root तुद् with the words विधु and अरुष् expressive of objects अ (खश्)

As:—विधुंतुदः (विधुं तुदतीति, राहुः the afflictor of the moon.)

अरुंतुदः (अरूंषि तुदतीति, piercing the vital parts.)

38 The root दश with the word असूर्य, and the root तप् with the word ललाट take अ (खश्).

As:—असूर्यपश्याः (सूर्यं न पश्यन्तीति, राजदाराः); ललाटंतपः (सूर्यः, scorching the fore-head).

39. The root दश् with उग्र, the root मद् with इरा, and the root ध्मा with पाणि take अ (खश्) As:—उग्रपश्यः (उग्र पश्यतीति) इरम्मदः (इरया-उदकेन माद्यति दीप्यतेऽबिन्धनत्वादिति, मेघज्योतिः), पाणिंधमः (पाणयो ध्मायन्तेऽस्मिन्निति, a road, so full of darkness that a person when passing through it, claps his hands to drive off reptiles).

---

36. **परिमाणे पचः** ॥ परिमाणवाचकेषु कर्मसूपपदेषु पचः खश् स्यात्। **मितनखे च** । * पचिरत्र तापवाची.

37. **विध्वरुषोस्तुदः** ॥ एतयो रुपपदयोः कर्मणोस्तुदः खश् स्यात्। अरुन्तुदः । मुमि कृते संयोगान्तस्य लोपः ।

38. **असूर्यललाटयोर्दृशितपोः** ॥ एतयोरुपपदयोः कर्मणोर्दृशितपोः खश् स्यात् । असूर्यमित्यसमर्थसमासः । दृशिना नञः सम्बन्धात् ।

39. **उग्रंपश्येरंमदपाणिंधमाश्च** ॥ एते निपात्यन्ते । उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश् । इरंमद इत्यत्र निपातनाच्छ्यन्न । पाणिंधमः । पाणयो ध्मायन्तेऽस्मिन्निति । अध्वाऽन्धकाराद्यावृत इत्यर्थः । तत्र हि सर्पापनोदनाय पाणयः शब्द्यन्ते ।

40 The root वद् after the words प्रिय, and वश takes अ (खच्). As — प्रियवदः, वशवदः.

41. The root गम् with nouns takes अ (खच्) As:- मितगमो हस्ती. (fem. मितंगमा) *विहङ्गम, विहङ्गः, विहग (विहायसा गच्छतीति. a bird). Here विह is substituted for विहायस् and अम् of गम is dropped optionally.

42. The root तप् (causal) after the words द्विषत् and पर takes अ (खच्). As - द्विषन्तप, परन्तपः, (द्विषन्तं परं वा तापयतीति) N B §The penultimate vowel is shortened before अय् (णि) of the causal, when it is followed by अ (खच्).

43 The root यम् after the word वाच् expressive of object takes अ (खच्) to express a vow. As — †वाचंयमः, (मौनव्रती) but वाग्याम (वाचं यच्छतीति one who cannot speak through weakness)

44. The root दृ (in the causal) after the words पुर and भग, and the root सह् after the word सर्व, take अ (खच्) As:- पुरन्दरः (पुराणि दारयतीति, इन्द्रः), भगदर (भगं दारयतीति fistula), सर्वसहः (राजा).

---

40. प्रियवशे वदः खच् ॥ एतयोः कर्मणोरुपपदयोर्वदेः खच् ।

41. गमेः सुपि वाच्य. ॥ असंज्ञार्थमिदम् । संज्ञायां तु गमश्चेति सूत्रेण सिद्धम् ।

* विहायसो विह इति वाच्यम् ॥ खच्च डिद्वा वाच्यः ॥ विहायस् इत्यस्य विहादेशो भवति । गमश्चोपधाया वा लोपः ।

42. द्विषत्परयो स्तापेः ॥ द्विषपरयोरुपपदयोः कर्मणोस्तापेः खच् स्यात् ।

§ खचि ह्रस्वः ॥ खच्परे णा वुपधाया ह्रस्व. स्यात् ।

43. वाचि यमो व्रते ॥ वाक्शब्द उपपदे यमेः खच् स्याद्व्रते गम्ये ।

† वाचंयमपुरन्दरौ च ॥ वाक्पुरोरमन्तत्वं निपात्यते ।

44. पूः सर्वयोर्दारिसहोः ॥ मह्यिग्रहणमसंज्ञार्थम् । 'भगे च दारेः' इति काशिका ॥ बाहुलकेन लब्धमिदमित्याहुः ।

45 The root कष after the words सर्व, कूल, अभ्र, and करीष takes अ (खच्) As—सर्वंकष (सर्वं कषतीति, खल , destroying all), कूलंकषा (नदी, destroying the bank), अभ्रंकष (वायु), करीषंकषा (वात्या a gale scattering dried cowdung).

46 The root कृ after the words मेघ, ऋति, भय and words ending in भय takes अ (खच्). As—मेघंकर, ऋतिंकर, भयंकर अभयंकर.

47 The root कृ after the words क्षेम, प्रिय, मद्र, takes अ (खच् and अण also) to express cause (हेतु) &c As—क्षेमंकरः क्षेमकार, प्रियंकर, प्रियकार, मद्रंकर मद्रकार

48 The root भू after the words आशित takes अ (खच्) to express an instrument or an abstract idea As—(करणे) आशितंभव (ओदन आशितो भवत्यनेन), (भावे) आशितंभवम् (आशितस्य भवनम्).

49 The roots भृ, तृ वृ, जि, धृ, सह्, तप्, and दम्, after any सुबन्त take अ (खच्) to express a proper name As— विश्वंभरः (विश्वं बिभर्तीति). विश्वंभरा (पृथ्वी) * रथंतरम् (साम), पतिंवरा (a bride), शत्रुंजय (an elephant), युगंधर (a mountain) शत्रुंतप; शत्रुंसह, †अरिंदम, but कुटुम्बभार (one who supports one's family).

---

45 सर्वकूलाभ्रकरीषेषु कषः ॥ एषूपपदेषु कषः खच् ।

46. मेघर्तिभयेषु कृञः ॥ एषूपपदेषु कर्मसु कृञः खच् स्यात् । भयशब्देन तदन्तविधिः ।

47. क्षेमप्रियमद्रेऽण् च ॥ एषु कृञोऽण् स्यात् । चात्खच् । वेति वाच्येऽण्ग्रहणं हेत्वादिषु टो माभूदिति । कथं तर्हि " अहारम्भाः क्षेमकराः " इति । कर्मणः शेषत्वविवक्षायां पचाद्यच् ।

48. आशिते भुवः करणभावयोः ॥ आशितशब्द उपपदे भवतेः खच् करणभावयोः ।

49. संज्ञायां भृतृवृजिधारिसहितपिदमः ॥ कर्मणीति सुपीति च संज्ञावशाद्यथासम्भवं सम्बध्यते । एभ्यो धातुभ्यः संज्ञायां विषये खच् स्यात् ।

* इह रथेन तरतीति व्युत्पत्तिमात्रम् । न त्वयवार्थनियमः ।

† दाम शमनाद्याम् । तेन सकर्मकः । सत्तान्तर्भावितण्यर्थोऽत्र दमिः ।

50. The root गम् after a सुबन्त takes अ (खच्) to express a proper name As —सुतंगमः.

51. The root गम् preceded by उरस्, अन्त, अत्यन्त, अध्वन्, दूर, पार, सर्व, अनन्त, विहायस, सर्वत्र and पन्न takes अ (ड). Before this अ (ड) the final vowel or the final consonant with the preceding vowel is dropped. As:— *उरगः (उरसा गच्छतीति, a serpent); अन्तग, अत्यन्तग, अध्वग, दूरग, पारग, सर्वग, अनन्तगः, +विहगः (विहायसा गच्छतीति a bird); ×सर्वत्रगः, पन्नगः (पन्न पतितं गच्छतीति a serpent).

(a) When compounded with गम्, उरस् and विहायस् become उर and विह. As—उरगः, विहगः.

(b) With the preposition सु and दुर्, the root गम् takes अ (ड) to express the place. As:—सुगः (सुखेन गच्छत्यस्मिन्निति); दुर्गः.

(c) With some other words also गम् takes this termination As:—ग्रामगः, स्त्र्यगारगः, गुरुतल्पगः.

52. With words expressive of objects the root हन् takes अ (ड) when a blessing is implied. As:- शत्रुहः (शत्रुं वध्यादिति); but शत्रुघातः.

---

50. गमश्च ॥ सुबन्ते कर्मण्युपपदे गमः खच् ।

51. अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ॥ संज्ञायामिति निवृत्तम् । एषु गमेर्डः स्यात् । डित्वसामर्थ्यादभस्यापि टेर्लोपः ।

* उरसो लोपश्च ॥

+ डे च विहायसो विहादेशो वक्तव्यः ॥

× सर्वत्रपन्नयोरुपसंख्यानम् ॥ पन्नमिति पद्यतेः क्तान्तं क्रियाविशेषणम् ।

(b) सुदुरोरधिकरणे ॥

(c) अन्यत्रापि दृश्यत इति वक्तव्यम् ॥

52. आशिषि हनः ॥ आशिषि गम्यमानायां हन्तेर्धातोः कर्मण्युपपदे डप्रत्ययो भवति ।

53, The *root* हन् *with* आ *when* compounded with दारु takes अण् and then the final न् of हन् is changed to द् . As:- दारुघाटः, but when हन् is compounded with चारु the final न् of हन् is changed to द् optionally. As:—चारुघाटः, or चारुघातः.

(a) The root हन् with the preposition सम् and preceded by words expressive of an object take अ (ड) and the final न् is changed to द् optionally. As:-वर्णसंघाट or वर्णसंघातः (वर्णान्संहन्तीति) पदसंघाटः or पदसंघातः.

(b) With the preposition अप, the root हन् preceded by क्लेश and तमस् takes अ (ड), even when the sense of blessing is not implied. As:—क्लेशापहः (पुत्रः); तमोपहः (सूर्यः).

(c) The root हन् compounded with कुमार, शीर्ष (for शिरस्) takes इन् (णिनिः); before this termination हन् is changed to घात् As -कुमारघाती, शीर्षघाती.

(d) The *root* हन् *with words* जाया *and* पति takes the termination अ (टक्) when the whole word expresses an *individual bearing an inauspicious mark* As:— जायाघ्नः (ना) पतिघ्नी (स्त्री). Before this termination हन् becomes घ्.

---

53. दाराचाहनोऽणन्तस्य च टः संज्ञायाम् ॥ दारुशब्द उपपद आङ् पूर्वाद्धन्तेरण् । टकारश्चान्तादेशो वक्तव्य इत्यर्थः । चारौ वा ॥ आङ् पूर्वाद्धन्तेश्चारावुपपदेऽण् । अन्तस्य वा टकारादेशः ।

(a) कर्मणि समि च ॥ कर्मण्युपपदे संपूर्वाद्धन्तेरण्प्रत्ययोऽन्तस्य च टकारादेशः ।

(b) अपे क्लेशतमसोः ॥ अपपूर्वाद्धन्तेर्डः स्यात् । अनाशीरर्थमिदम् ।

(c) कुमारशीर्षयोर्णिनिः ॥ कुमार शीर्ष इत्येतयोरुपपदयोर्हन्तेर्णिनिप्रत्ययः स्यात् । शिरसः शीर्षभावो निपात्यते ।

(d) लक्षणे जायापत्योष्टक् ॥ हन्तेर्जायापत्योः कर्मणोरुपपदयोर्लक्षणवति कर्तरि टक् प्रत्ययो भवति ।

(e) The root हन् preceded by an object takes अ (टक्) when the whole word expresses an agent other than man जायाघ्न (तिलकालक) पतिघ्ना (पाणिरेखा), पित्तघ्नम् (घृतम्), श्लेष्मघ्नम् (मधु), but आखुघात (शूद्र, by अण्).

(f) The root हन् preceded by शक्ति and कपाट or कवाट takes अ (टक्) when strength is implied As — हस्तिघ्न (नर), कपाटघ्न (चौर).

(g) The root हन् preceded by पाणि, ताड or राज takes अ (टक्) to express the sense of skill In this case हन् is changed to घ् As —पाणिघ, ताडघ, राजघ, but पाणिघात, ताडघात. (by अण्)

54 The root कृ with the words आढ्य, सुभग, स्थूल पलित, नग्न, अन्ध, and प्रिय, expressing the being of what it was not before, takes अन (ख्युन) to express an instrument As — आढ्यंकरणम् (अनाढ्यमाढ्यं कुर्वन्त्यनेन, that which makes one rich who was not so before) सुभगंकरणम्, स्थूलंकरणम्, पलितंकरणम्, नग्नंकरणम्, अन्धंकरणम्, प्रियंकरणम्. Before this termination म् is added on to the preceding word

55 The root भू takes इष्णु (खिष्णुच्) and उक (खुकञ्) to

(e) अमनुष्यकर्तृके च ॥ अमनुष्यकर्तृके वर्तमानाद्धन्तेर्धातोः कर्मण्युपपदे टक् प्रत्ययो भवति ।

(f) शक्तौ हस्तिकपा(वा)टयोः ॥ शक्तौ द्योत्यायां हस्तिकपाटयोः कर्मणोरुपपदयोर्हन्तेष्टक् प्रत्ययो भवति । मनुष्यकर्तृकार्थमिदम् ।

(g) पाणिघताडघौ शिल्पिनि ॥ हन्तेष्टक् टिलोपो घत्वं च निपात्यते पाणिताडयोरुपपदयोः । राजघ उपसंख्यानम् ॥

54 आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥ एषु च्व्यर्थेष्वच्व्यन्तेषु कर्मसूपपदेषु कृञः ख्युन् स्यात् ।

55. कर्तरि भुवः खिष्णुच्खुकञौ ॥ आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु भवतेः कर्तरि कारके खिष्णुच् खुकञ् इत्येतौ प्रत्ययौ भवतः ।

express an agent under the same circumstances as mentioned before As — आढ्यंभविष्णु. (अनाढ्य आढ्यो भवतीति, becoming rich, not being so before.); आढ्यंभावुक Before इष्णु (खिष्णुच्) the ending vowel of भू takes guna and before उक (खुकञ्) it takes वृद्धि, and म् is added to the preceding word

56 The root स्पृश् preceded by any सुबन्त except उदक takes क्विन् which leaves nothing to add to the root, but it effects some changes in the final letter of the root As —घृतस्पृक् (घृत स्पृशतीति), मन्त्रस्पृक् (मन्त्रेण स्पृशतीति one who touches any thing by repeating a मन्त्र), but उदकस्पर्श (by अण्, one who touches water.)

57. The words ऋत्विक् (ऋतु+यज्), दधृक् (धृष्), स्रक् (सृज्), दिक् (दिश्), उष्णिक् (उत्+स्निह्), अञ्च्, युज्, क्रुञ्च् are formed by the termination क्विन् Of these the first five are irregular. The root अच् preceded by any सुबन्त and the root युज् and क्रुञ्च् both without any word with them take क्विन्.

As — प्राङ्, प्रत्यङ्, उदङ्, युङ्, क्रुङ्.

---

56. **स्पृशोऽनुदके क्विन्** ॥ स्पृशेर्धातोरनुदके सुबन्त उपपदे क्विन् प्रत्ययो भवति कर्तरि ।

57. **ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च** ॥ ऋत्विगादयः पञ्च शब्दाः क्विन् प्रत्ययान्ता निपात्यन्ते । अपरे त्रयो धातवो निर्दिश्यन्ते । (1) ऋतुशब्द उपपदे यजे धातो. क्विन्प्रत्ययो निपात्यते । ऋतौ यजति । ऋतुं वा यजति । ऋतुप्रयुक्तो वा यजति । ऋत्विक् । रूढिरेषा यथाकथञ्चिदनुगन्तव्या । (2) धृषे. क्विन्प्रत्यय. । द्विर्वचनमन्तोदात्तत्वं च निपात्यते । धृष्णोतीति दधृक् । (3) सृजे कर्मणि क्विन् । अमागमश्च निपात्यते । सृजन्ति तामिति स्रक् । (4) दिशे कर्मणि क्विन्निपात्यते । दिशन्ति तामिति दिक् । (5) उत्पूर्वात्स्निहः क्विन्नुपसर्गान्तलोपः षत्वं च निपात्यते । (6) अञ्चतेः सुबन्तमात्र उपपदे क्विन्प्रत्ययो भवति । युजे. क्रुञ्चेश्च केवलादेव । सोपपदात्तु सत्सूद्विषेत्यादिना क्विप्

58 The root दृश् (not meaning ' to see ') preceded by the pronouns त्यद and others, समान and अन्य takes अ (कञ्) क्विन् and स (क्स). The final of the pronouns is then changed to आ As -तादृश , तादृक्, तादृक्ष , सदृश , सदृक्, सदृक्ष , अन्यादृश , अन्यादृक्, अन्यादृक्ष

59 The roots सद्, सू (2nd conj), द्विष् , द्रुह , दुह , युज् , (both 4th & 7th conj) विद् (2nd 4th, and 7th conjugation) भिद्, छिद्, जि, नी, राज् combined with a सुबन्त whether preceded by a preposition or not take क्विप् *to form verbal nouns* As —द्युसत्, उपनिषत्, अण्डसू, प्रसू, मित्रद्विट्, प्रद्विट्, मित्रध्रुक् , प्रध्रुक्, गोधुक्, प्रधुक्, अश्वयुक्, प्रयुक्, वेदवित्, प्रवित्, काष्ठभिद्, प्रभिद् , रज्जुच्छिद्, प्रच्छिद्, शत्रुजित्, प्रजित्, सेनानीः, × ग्रामणी , अग्रणी , राट्, सम्राट्.

59 (a) This क्विप् is added to all roots to form verbal nouns As – कामधुक् (काम+दुह्), लिट् (लिह्), ध्रुक् (द्रुह्), पर्णध्वत् (पर्ण+ध्वस्), उपानत् (उप+आ+नह्), प्राण् (प्र+अन्), मित्रशी (मित्र+शास्),*आशी (आ+शास्), गी (गृ), पू (पृ), भू (भू), धू (धुर्वी), अक्षद्यू (अक्ष+दिव्), जू (ज्वर्), तू (त्वर्), स्रू (स्रिव्), जनौ (जन+अव्), मू , मुवौ, मुवः (मव्), सुमू , सुम्वौ, सुम्वः (सु+मव्), मू , मुरौ, मुरः (मुर्छा), †अङ्गगत्, (अङ्ग+गम्), तनुच्छद् (तनु+

---

58 त्यदादिषु दृशोऽनालोचने कञ्च ॥ त्यदादिषूपपदेषु दृशोर्धातोरनालोचनेऽर्थे वर्तमानात् कञ्प्रत्ययो भवति । चकारात् क्विन्नपि । समानान्ययोश्चेति वाच्यम् ॥ क्सोऽपि वाच्यः ।

59 सत्सूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजा मुपसर्गेऽपि क्विप् ॥ एभ्यः क्विप्स्यादुपसर्गे सत्यसति च सुप्युपपदे ।

× अग्रग्रामाभ्यां नयतेर्णो वाच्यः ॥

59. A. क्विप्च ॥ सर्वधातुभ्यः सोपपदेभ्यो निरुपपदेभ्यश्च छन्दसि भाषायां च क्विप् प्रत्ययो भवति । *आशासः क्वावुपधाया इत्वं वाच्यम्॥

† गमः क्वौ ॥ अनुनासिकलोपः स्यात् ।

उद्), प्रशान् (प्र+शम्), प्रतान् (प्र+तम्), अग्रेग् *, (अग्रे+गम्), अग्रेभ्र् ‡ (अग्र+भ्रम), परीतत् § (परि+तन्), सयत् (स+यम्), सुनत् (सु+नम्).

60 The root भज् preceded by a सुबन्त takes the termination ण्वि leaving nothing to add, but the penultimate अ is lengthened As —अशभाक् , प्रभाक् .

61 The root अद् preceded by a सुबन्त except अन्न takes the termination विट. As —आमात् (आममत्तीति one who eats row food) सस्यात् क्रव्याद् (eating raw flesh) This termination also leaves nothing to add to the root But क्रव्याद (eating cooked flesh) by अण्

62 The root दुह् with a सुबन्त takes अ (क) and then the ending ह् is changed to घ् As —कामदुघा, अर्धदुघा.

63 The terminations मन् (मनिन्), वन् (क्वनिप्), वन् (वनिप्) विच् (nothing) are added to the roots to form nouns. As —

सुशर्मा (by मनिन्)

प्रातरित्वा (by) क्वनिप् one going out every morning).

*विजावा (विजन्+वनिप् one being born).

अवावा (ओण्+वनिप् a Brahmin woman)

---

‡ गमादीनामितिवक्तव्यम् ॥

§ ऊङ् च गमादीना मिति वक्तव्यम् ॥ लोपश्च ॥

60. भजो ण्वि. ॥ सुप्युपसर्गेचोपपदे भजेण्वि स्यात् ।

61. अदोऽनन्ने ॥ अदेर्धातोरनन्न सुप्युपपदे विट् प्रत्ययो भवति । क्रव्येच । क्रव्यशब्दे उपपद अदेर्धातोर्विट् प्रत्ययो भवति । अणबाधनार्थ मिदम् । कथ तर्हि " क्रव्यादोस्रपआशर " इति । पक्वमासशब्द उपपदेऽण् । उपपदस्य क्रव्यादेश ।

62. दुहे कब्घश्च ॥ दुहेर्धातो. सुप्युपपदे कप्प्रत्ययोभवति । घकारश्चान्तादेश ।

63. अन्येभ्योऽपि दृश्यन्ते ॥ अन्येभ्योऽपि धातुभ्योऽनाकारान्तेभ्यो मनिन् क्वनिप् वनिप् विच् एते प्रत्यया. स्यु ।

* विड्वनोरनुनासिकस्यात् ॥ अनुनासिकस्यात्स्यान् ।

रोट (from रुह् by विच् , one growing), रेट् (from रिश् by विच् , one shining) सुगण् ,(by विच् one counting well).

64. The root स्था preceded by a सुबन्त takes अ (क) and also क्विप् . As:— शंस्थः (by क). शंस्थाः (by क्विप्).

65 Roots with a सुबन्त except जाति (class-names) take इन् (णिनि) to express habit. As:-उष्णभोजी, शीतभोजी, अनुशायी, अनुजीवी, त्रिसारी, * साधुकारी, साधुदायी, ब्रह्मवादी.

Before this termination the final vowel and the penultimate अ take वृद्धि and the penultimate short vowel takes गुण, य is added to roots ending in आ.

66 Roots with words expressing comparison take इन् (णिनि). As: — उष्ट्रक्रोशी, (उष्ट्र इव क्रोशति one who roars like a camel) ध्वाङ्क्षरावी (one who crows like a crow.)

67. The roots with a सुबन्त take इन् (णिनि) (a) to express a vow. As: — स्थण्डिलशायी, अश्राद्धभोजी; (b) to express a repetition. As:—क्षीरपायी, कषायपायी, सौवीरपायी; but कुल्माषखादः (by अण्)

---

64. **स्थः कच** ॥ ' स्था ' इत्येतस्माद्धातोः सुप्युपपदे क प्रत्ययो भवति क्विप्च । **शमि धातोः संज्ञायामित्यचं** बाधितुं सूत्रम् ।

65. **सुप्यजातौ णिनिस्ताच्छील्ये** ॥ अजात्यर्थे सुपि धातोर्णिनिः स्यात्ताच्छील्ये द्योत्ये । ***साधुकारिण्युपसंख्यानम्** ॥ **ब्रह्मणि वदः** ॥ अताच्छील्यार्थं वार्तिकद्वयम् ।

66. **कर्तर्युपमाने** ॥ कर्तृवाचिन्युपमानोपपदे धातोर्णिनिः प्रत्ययो भवति। उपपदार्थः कर्ता प्रत्ययार्थस्य कर्तुरुपमानम् । अताच्छील्यार्थं जात्यर्थं च सूत्रम् ।

67. **व्रते** ॥ व्रत इति शास्त्रतो नियम उच्यते । व्रते गम्यमाने सुबन्त उपपदे धातो णिनिः प्रत्ययो भवति । समुदायोपाधिश्चायम् । धातूपपदप्रत्ययसमुदायेन व्रतं गम्यते । अताच्छील्यार्थं आरम्भः । जात्यर्थो वा । (b) **बहुलमाभीक्ष्ण्ये** ॥ आभीक्ष्ण्ये गम्यमाने धातोर्बहुलं णिनिः प्रत्ययो भवति । आभीक्ष्ण्यं पौनःपुन्यं तात्पर्यमासेवा ताच्छील्या दन्यत् । बहुलग्रहणात्कुल्माषखाद इत्यत्र न भवति ।

68 The root मन् (4 th conj) with a सुबन्त takes इन् (णिनि) As —दर्शनीयमानी, शोभनमानी.

69 The root मन् (4th conj) with a सुबन्त takes इन् (णिनि) or अ(खश्) to express one's-elf as the object of the root (vide rule 29 above) अम् is added on to the monosyllabic words ending in any vowel except अ or आ when they are followed by a verbal form made up by a termination with a mute ख् Before this अम् words undergo the same change as before the अम् of the accusative singular.

As —पण्डितमन्य:=पण्डितमानी कालिमन्य, * गांमन्य , श्रियमन्य = स्त्रीमन्य , नरमन्य , भुवमन्य , श्रिमन्यम. §

70 The root यज् with a noun in the instrumental case (करण) takes इन (णिनि) to express past actions As — सोमयाजी, (सोमेनेष्टवान् one who performed a सोम sacrifice).

71. The root हन् with an object takes इन् (णिनि) to express past actions by way of censure As - पितृव्यघाती, (one who murdered an uncle,) मातुलघाती (one who murdered a maternal uncle) but चोरं हतवान्

72 The root हन् with ब्रह्म, भ्रूण and वृत्र takes क्विप् only to

---

68. मनः ॥ सुपि मन्यतेर्णिनिः स्यात् ।

69. आत्ममाने खश्च ॥ स्वकर्मके मनने वर्तमानान्मन्यते सुपि खश् स्यात् । चाण्णिनि * भाष्यकारवचनाच्छ्रब्दस्य ह्रस्वो मुममोरभावश्च ।

§ इच एकाचोऽम्प्रत्ययवच्च ॥ इगन्तादेकाचोऽम् स्यात् स च स्वाद्यम्वत्खिदन्ते परे ।

70. करणे यजः ॥ करण उपपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्तरि ।

71. कर्मणि हनः ॥ कर्मण्युपपदे हन्तेर्धातोः णिनि प्रत्ययो भवति भूतकाले । कुत्सितग्रहणं कर्तव्यम् ॥

72. ब्रह्मभ्रूणवृत्रेषु क्विप् ॥ एषु कर्मसूपपदेषु हन्तेर्भूते क्विप् स्यात् । ब्रह्मादिष्वेव क्विबेवेति द्विविधोऽत्र नियमः ।

denote past actions As — ब्रह्महा, भ्रूणहा, वृत्रहा. But with other words it does not take क्विप्). As—पुरुषं हतवान्. This is a restrictive rule, that is, no other termination but क्विप् is added to हन् after these words only Thus this rule has two restrictions

73 The root कृ with सु, कर्म, पाप, मन्त्र and पुण्य takes क्विप् only to express past actions As—सुकृत्, कर्मकृत्, पापकृत्, मन्त्रकृत् and पुण्यकृत्. But कर्म कृतवान् where no अण् is added Also भाष्यकृत्. Other roots than कृ with these words do not take क्विप् but अण. As—मन्त्राध्याय, (मन्त्रमधीतवान्) This क्विप् is restricted to the past tense मन्त्र करोति करिष्यति वा here there cannot be क्विप्. Thus this rule has three restrictions

74 The root सु (5th. conj) preceded by सोम takes क्विप्. As—सोमसुत्. This is a restrictive rule, that is no other termination but क्विप् is used after सु only to express past tense in composition with this word alone Thus there are four restrictions here

75 The root चि with अग्नि takes क्विप्. As—अग्निचित्. This rule also has four restrictions as above.

76 The root चि with a word expressive of an object takes क्विप् in the past tense in the passive sense when the whole

---

73. **सुकर्मपापमन्त्रपुण्येषु कृञः** ॥ सौ कर्मादिषु च कृञः क्विप् स्यात। कालोपपदप्रत्ययनियम। स्यादिष्वेवेति नियमाभावादन्यस्मिन्नप्युपपदे क्विप।

74. **सोमे सुञः** ॥ सोमे कर्मण्युपपदे सुनोतेर्धातो क्विप् प्रत्यय स्यात् चतुर्विधश्चात्र नियम इष्यते। धातुकालोपपदप्रत्ययविषय।

75. **अग्नौ चेः** ॥ अग्नौ कर्मण्युपपदे चिनोतेर्धातो क्विप् प्रत्यय स्यात् अत्रापि पूर्ववच्चतुर्विधो नियम इष्यते।

76. **कर्मण्यग्न्याख्यायाम्** ॥ कर्मण्युपपदे कर्मण्येव कारके चिनोते क्विप् स्यात्। अग्न्याधारस्थलविशेषस्याख्यायाम्।

noun is the name of a sacrificial fire place, as—श्येनचित् (श्यन इव चित), कङ्कचित्.

77 The root क्री with वि, in composition with an object takes इन (इनि) in the sense of censure, as.—सोमविक्रयी, तैलविक्रयी, घृतविक्रयी, but धान्यविक्राय (by अण्)

78 The root दृश् with its object takes the termination वन् (क्वनिप्); as — पारदृश्वा (पार दृष्टवान्) परलोकदृश्वा (परलोक दृष्टवान्).

79 The roots युध् and कृ preceded by the word राजन् as an object and सह take वन् (क्वनिप्), as —राजयुध्वा (one who made the king fight) राजकृत्वा, सहयुध्वा, सहकृत्वा

80 The root सु 5th conj and यज् take वन् (क्वनिप्) to express the past tense, as —सुत्वा, सुत्वानौ, सुत्वान, यज्वा, यज्वानौ, यज्वान.

81 The root जॄ 4th conj takes अत (अतृन्) to express past tense, as —जरत्, old जीर्णवान् also are derived.

The termination अ (ड)

82 Before this termination the final vowel or the final consonant with the preceding vowel is dropped

---

77. कर्मणीनि विक्रियः ॥ कर्मण्युपपदे विपूर्वात्क्रीणाते रिनि स्यात्। कुत्सितग्रहणं कर्तव्यम् ॥

78. दृशेः क्वनिप् ॥ दृशतेर्नि कर्मण्युपपदे क्वनिप्प्रत्यय स्याद्भूते ।

79. राजनि युधि कृञः ॥ राजन्शब्दे कर्मण्युपपदे युध्यते करोतेश्च क्वनिप् प्रत्यय स्यात । युधिरन्तर्भावितण्यर्थत्वात्सकर्मक । सहे च ॥ सहशब्दे चोपपदे युधिकृञोर्धात्वो क्वनिप्प्रत्यय स्यात्। असत्त्ववाचित्वात्तोपपद कर्मणा विशिष्यते ।

80. सुयजोर्ङ्वनिप् ॥ सुनोतेर्यजतेश्च ङ्वनिप् स्याद्भूते ।

81. जीर्यतेरतृन् ॥ जीर्यतेरतृन्प्रत्ययो भवति भूते । वासरूपन्यायेन निष्ठाऽपि ।

83 The root जन् takes अ (ड) when compounded with a word in the locative case, or in the ablative case not expressive of class names, as —सरसिजम् , मन्दुरज., सस्कारज., अदृष्टज , but हस्तिनो जात , अश्वाज्जात .

84 The root जन् with a preposition takes अ (ड) to express a name, as —प्रजा, (offspring or people in general)

85 The root जन् with अनु preceded by a word in the objective case takes अ (ड), as —पुमनुजा (पुमासमनुरुध्य जाता, a woman born after a man), स्त्र्यनुजा (one born after a woman).

86 The root जन् with other words also takes अ (ड), as – अज (न जायत इति), द्विज (द्विर्जात), ब्राह्मणज (ब्राह्मणाज्जात), अभिज (अभितो जात), अनुज (अनु जात)

87 This termination is applied to other roots also and in the sense of other cases, as —परिखा (परित खाता).

88 The termination अ (अण्) is added on to the roots along with their objects to express futurity and dependence of one action upon another No other termination expresses this sense, as —काण्डलावो व्रजति, अश्वदायो व्रजति.

---

83. सप्तम्यां जनेर्डः ॥ सप्तम्यन्त उपपदे जनेर्धातोर्ड स्यात् । पञ्चम्या मजातौ ॥ जातिशब्दवर्जिते जनेर्ड. स्यात्पञ्चम्यन्त उपपदे ।

84 उपसर्गे च संज्ञायाम् ॥ उपसर्गे चोपपदे जने र्ड स्यात्संज्ञाया विषये । समुदायोपाधि संज्ञा ।

85 अनौ कर्मणि ॥ अनुपूर्वाज्जने कर्मण्युपपदे ड स्यात् । इह जनि सकर्मक । अनुरोधविशिष्टजननवृत्तित्वात् ।

86. अन्येष्वपि दृश्यते ॥ अन्येष्वप्युपपदेषु कारकेषु जनेर्डप्रत्ययो दृश्यते ।

87. अपिशब्द सर्वोपाधिव्यभिचारार्थ । तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित ।

88 अण् कर्मणि च ॥ भविष्यतीत्येव । चकार सनियोगार्थ । धातोरण प्रत्ययो भवति भविष्यति काले कर्मण्युपपदे क्रियाया च क्रियार्थायाम् । ण्वुलोऽपवाद । परत्वाद्य कादीन बाधते । काण्डलावो व्रजति (काण्ड लविष्य इति व्रजति) । अश्वदायो व्रजति (अश्व दास्य इति व्रजति)

CHAPTER XVIII.

ताच्छीलिकप्रक्रिया.

TÂCHCHHÎLICA-PRAKRIYÂ.

1. The terminations under this head signify (1) तच्छील (disposition) (2) तद्धर्म (sense of obligatory duty) (3) तत्साधुकारी (signifying agents performing the action indicated by the verb in a good manner).

2. Roots take तृ in the above-mentioned senses. This is a strong termination and governs the accusative; as:-कर्ता कटम् (one who is in the habit of making mats).

3. कृ with अलम् or निर् and आ, जन् with प्र, पच् with उत्, पत् with उत्, मद् with उत्, रुच्, त्रप् with अप, वृत्, वृध्, सह् and चर् take इष्णु (इष्णुच्); as:—अलंकरिष्णुः, निराकरिष्णुः, प्रजनिष्णुः, उत्पचिष्णुः, उत्पतिष्णुः, उन्मदिष्णुः, रोचिष्णुः, अपत्रपिष्णुः, वर्तिष्णुः, वर्धिष्णु, सहिष्णुः, चरिष्णुः.

Besides these भविष्णुः (भू), भ्राजिष्णुः (भ्राज्), and क्षयिष्णुः (क्षि), are met with occasionally.

---

1. आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥ क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलतद्धर्मतत्साधुकारिषु कर्तृषु । तदितिधात्वर्थं शीलादिविशेषणत्वेन निर्दिश्यते । तच्छीलो य स्वभावतः फलनिरपेक्षस्तत्र प्रवर्तते । तद्धर्मस्तदाचारः । यः स्वधर्मे ममायमिति प्रवर्तते विनापि शीलेन । तत्साधुकारी यो धात्वर्थं साधु करोति ।

2. तृन् ॥ सर्वधातुभ्यस्तृन्प्रत्ययो भवति तच्छीलादिषु कर्तृषु ।

3. अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ॥ अलंकृञादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृष्विष्णुच् प्रत्ययः स्यात् ।

4. Roots ग्लै, जि, स्था and भू take स्नु (क्स्नु:); as:-ग्लास्नु:, जिष्णु:, ×स्थास्नु:, भूष्णु:. This termination is weak.

5. Roots त्रस्, गृध्, धृष् and क्षिप् take नु (क्नु); as:-त्रस्नु:, गृध्नु:, धृष्णु:, क्षिप्नु:. This termination is weak.

6. The following words are thus formed by the termination इन् (घिनुण्).

(1) शम्–शमी.	(3) दम्–दमी.	(5) भ्रम्–भ्रमी.
(2) तम्–तमी.	(4) श्रम्–श्रमी.	(6) क्षम्–क्षमी.

(7) क्लम्–क्लमी.
(8) मद्–with प्र–प्रमादी.
(9) *मद् with उत्–उन्मादी.
(10) पृच् 7th conj. with सम्-सपर्की.
(11) रुध् with अनु–अनुरोधी.
(12) यम् with आ–आयामी.
(13) यस् with आ–आयासी.
(14) सृ with परि–परिसारी.
(15) सृज् with सम्–ससर्गी.
(16) देव् 1st conj with परि परिदेवी.
(17) ज्वर् with सम्–संज्वारी.
(18) क्षिप् 4th and 6th conj. with परि परिक्षेपी.
(19) रट् with परि–परिराटी.
(20) वद् with परि–परिवादी.
(21) दह् with परि–परिदाही.
(22) मुह् with परि–परिमोही.
(23) दुष्–दोषी.
(24) द्विष्–द्वेषी.

---

4. **ग्लाजिस्थश्च क्स्नुः** ॥ ग्ला जि स्था इत्येतेभ्यो धातुभ्यश्चकाराद्भुवश्च तच्छीलादिषु क्स्नुः प्रत्ययः स्यात् । ×गिदयम् । न तु कित् । तेन स्थ ईत्व न ।

5. **त्रसिगृधिधृषिक्षिपेः क्नुः** ॥ त्रसादिभ्यो धातुभ्यस्तच्छीलादिषु क्नुः स्यात् ।

6. (1 to 9) **शमित्यष्टाभ्यो घिनुण्** ॥ इतिशब्द आद्यर्थे । शमादिभ्यो धातुभ्योऽष्टाभ्यस्तच्छीलादिषु घिनुण् स्यात् । **नोदात्तोपदेशस्येति** वृद्धिनिषेधः । * उत्पूर्वान्मदेरलंकृञादिसूत्रेणेष्णुजुक्तो वासरूपविधिना घिनुणपि ।
(10 to 36) **संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिप परिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च** ॥ संपृचादिभ्यो धातुभ्यो घिनुण् स्यात्तच्छीलादिषु कर्तृषु ।

(25) द्रुह्–द्रोही.
(26) दुह्–दोही.
(27) युज्–4th and 7th conj. योगी.
(28) क्रीड् with आ–आक्रीडी
(b) The termination अक (ण्वुल्) is also used to denote futurity when one action depends upon another. This sense is expressed by तुम् (तुमुन्), the terminations forming abstract nouns such as अ (घञ्) and others, the 2nd future, and अ (अण्). This sense is expressed *only* by these-and no other-terminations. The termination अ (अण्) is applied only when the object is with the verb; as—याजको याति । यष्टुं याति । यक्ष्य इति याति । काण्डलावो याति ।

---

(24) विवृत्सिता—" **न वृद्भ्यश्चतुर्भ्यः** " इत्यत्र परस्मैपदग्रहणं तङानयो रभावं लक्षयति । The roots वृत् and others do not take the augment इ before an Ardhadhatuka suffix beginning with स् when it is not followed by Atmanepada terminations [तङ् and आन (शानच्)].

(25) पापचकः—यङन्ताण्ण्वुल् । अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः । Here the penultimate अ of पापच्, the frequentative (Atmanepada) base of पच्, does not take वृद्धि.

पापाचकः—यङ्लुगन्ताण्ण्वुल् । Here the penultimate अ of पापच् does take वृद्धि.

(b) **तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्** ॥ भविष्यतीत्येव । क्रियार्थायां क्रियायामुपपदे धातोर्भविष्यति काले तुमुन्ण्वुलौ प्रत्ययौ स्तः । अथ किमर्थं ण्वुल्विधीयते । यावता ण्वुल्तृचाविति सामान्येन विहित एव । सोऽस्मिन्नपि विषये भविष्यति । लृटा क्रियार्थोपपदेन बाध्येत । वासरूपविधिना सोऽपि भविष्यति । एवं तर्ह्येतज्ज्ञाप्यते । क्रियायामुपपदे क्रियार्थायां वासरूपेण तृजादयो न भवन्तीति । तेन कर्ता व्रजति । विक्षिपो व्रजतीत्येवमादि निवर्त्यते ।

2. Roots नन्द् and others take अन (ल्यु) to form nouns denoting agent; as:—

(1) नन्द् (causal)-नन्दनः; (नन्दयतीति).
(2) वस् („)-वासनः.
(3) मद् („)-मदनः.
(4) दुष् („)-दूषणः.
(5) साध् („)-साधनः.
(6) वृध् („) वर्धनः
(7) शुभ् („)-शोभनः.
(8) रुच् (रुप्) („)-रोचन (रोपणः).
(9) सह्—सहनः.
(10) तप्—तपन .
(11) दम्—दमनः
(12) जल्प्—जल्पन.
(13) रम्—रमण.
(14) दृप्—दर्पण.
(15) क्रन्द् with सम्-संक्रन्दनः.
(16) कृष् „ सम्-संकर्षणः.
(17) हृष् „ सम्-संहर्षणः.
(18) अर्द् „ जन-जनार्दनः. (जनमर्दयतीति).
(19) यु—यवनः.
(20) सूद् with मधु-मधुसूदन. (मधुं सूदयतीति).
(21) भीष् „ वि-विभीषणः. (विशेषेण भीषयतीति)
(22) लू—लवणः.
(23) नश् (causal) with नि & चित्त-चित्तविनाशनः.
(24) दम् with कुल-कुलदमनः.
(25) दम् „ शत्रु शत्रुदमनः.

3 Roots ग्रह् and others take इन् (णिनि) to express agent, as:-

(1) ग्रह्—ग्राही.
(2) सह् with उद्-उत्साही.
(3) दस् „ उद्-उद्दासी.
(4) भास् „ उद्-उद्भासी.
(5) स्था—स्थायी.
(6) मन्त्—मन्त्री.
(7) मृद् with सम्-संमर्दी.
(8) रक्ष् „ नि—निरक्षी.

2, 3, 5. **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** ॥ प्रत्येकमादिशब्दः सबध्यते । त्रिभ्यो गणेभ्यस्त्रय. प्रत्यया यथासख्यं भवन्ति । नन्द्यादिभ्यो ल्युः । ग्रहादिभ्यो णिनिः । पचादिभ्योऽच् स्यात् । (1 to 8) **नन्दिवाशिमदिदूषि साधिवर्धिशोभिरोचि (पि) भ्यो ण्यन्तेभ्यः संज्ञायाम्** ॥ (9-11) **सहितपिदमः संज्ञायाम्** ॥ (22) नन्द्यादिगणे निपातनाण्णत्वम् ।

3. (8 12) **रक्षश्रुवसवपशां नौ** ॥

त , वद , वदावद:, (b) हन:, घनाघन., (c) पट् (causal)—पा-ट:; पाटूपट:; (d) चर् or अद् with रात्रि रात्रिचर:, or रात्रिंचर:; रात्र्यट. or रात्रिमट:.

7. Before this अच् the य of the frequentative base is dropped; as:— कृ-चेक्रिय:, नी-नेन्य:, लू-लोलुव:, पू-पोपुव:; मृज्-मर्मृज:.

8. Roots having इ उ or ऋ or ऌ, for their penultimate and the roots ज्ञा, प्री and कृ take अ (क) *in addition to तृ and अक to form nouns denoting agent अ (क) is a weak termination as — क्षिप , लिख , †उच्—ओक:, (a bird or a Shudra), बुध , कृश , ज्ञ , प्रिय , किर., and क्षेपक: (by अक), क्षेप्ता (by तृच्).

(b) हन्तेर्घत्वं च ॥ हनो वा द्वित्वमचि । अकृताभ्यासस्य । घत्वंचाभ्यासस्य । उत्तरस्य त्वभ्यासाद्वति कुत्वम् । (c) पाटेर्णिलुकूचोक्चदीर्घश्चाभ्यासस्य ॥ (d) " रात्रेः कृति विभाषा " इति वा मुम् ।

7. चेक्रिय । " यङोऽचि च " इति लुक् । " न धातुलोप आर्धधातुके " इति गुणवृद्धिनिषेध. ।

8. इगुपधज्ञाप्रीकिरः क. ॥ इगुपधेभ्यो जानातेः प्रीणातेः किरतेश्च कप्रत्यय. स्यात् ।

* वाऽसरूपोऽस्त्रियाम् ॥ परिभाषेयम् । अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्यबाधको वा स्यात् स्त्र्यधिकारोक्त विना ॥ अतएवासरूपोऽपवाद.कप्रत्ययो ण्वुल् तृचौ न बाधते Except in स्त्र्यधिकार, special terminations (अपवादप्रत्यया:), dissimilar in form (असरूपा: become exceptions optionally to general termination (उत्सर्गप्रत्यया) in forming verbal derivatives. So the termination अ (क), अक (ण्वुल्), and तृ (तृच्) form three words क्षिप:, क्षेपक:, and क्षेप्ता.

† ओक उचः के ॥ उचेर्गुणकुत्वे निपात्येते के परे।ओक शकुन्तवृषल Before अ (क) the penultimate vowel of the root उच् takes गुण and the final च् is changed to क्

9. Roots ending in आ, with prepositions take अ (क); as:—सुग्लः, प्रज्ञ, प्रस्थः, सुम्लः.

The termination अ (श).

Before this termination the conjugational sign is added to the roots.

10. The roots पा, घ्रा, ध्मा, धे and दृश् take अ (श) to denote agent; as:—पिबः, जिघ्रः, धमः, धयः, Fem. §धया (a girl), पश्यः.

11. The root घ्रा with वि and आ does not take अ [श] but अ [क] to express a tiger; as:—व्याघ्रः.

12 The roots लिप्, विद्, both of the 6th conj. and the causals of धृ, पॄ, or पृ, विद्, एज् with उद्' चित्, सात् a (सौत्र: root) and सह्, all without any preposition take अ [श] to denote agent; as:—लिम्पः, विन्दः, धारयः, पारयः, वेदयः, उदेजयः, चेतयः, and सातयः साहयः, but प्रलिपः (by क). (b) However लिप् with नि takes अ (श); as:—निलिम्पाः (देवाः).

---

9. आतश्चोपसर्गे ॥ आकारान्तेभ्यो धातुभ्य उपसर्गे उपपदे कः स्यात् । 'श्याद्व्यधा' इति णस्यापवादः ।

10. पाघ्राध्माधेट्दृशः शः ॥ पादिभ्यो धातुभ्यः शः स्यात् ।

§ धेटष्टित्वात्स्तनंधयीति खशीव ङीप् प्राप्तः । खशोऽन्यत्र नेष्यत इति हरदत्तः ।

11. घ्रः संज्ञायां न ॥ 'व्याघ्रादिभिः' इति निर्देशात् ।

12. अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ॥ अनुपसर्गेभ्यो लिम्पादिभ्यः शः स्यात् । (a) सातिः सुखार्थः सौत्रो हेतुमण्ण्यन्तः । वासरूपन्यायेन क्विपि सातपरमात्मा । सात्वन्तो भक्ताः । (b) नौ लिम्पेर्वाच्यः ॥

अव, लिह्, श्लिष्, and श्वस् take अ (ण) necessarily; as:— अवश्यायः, प्रतिश्यायः, दायः, धायः, व्याधः, आस्रावः, संस्रावः, अत्यायः, अवसायः, अवहारः, लेहः, श्लेषः, and श्वासः.

19. The roots दु and नी without any preposition take अ (ण); as:— दावः, (from दु, 5th. conj); नायः (from नी); but प्रदवः and प्रणयः (by अच्). दु 1st conj. forms दवः by अ (अच्).

20. (a) The root ग्रह् takes अ (ण) optionally; as.- ग्रहः (a planet), ग्राहः (a crocodile).

(b) The root भू, according to **काशिका** takes अ (ण) optionally; as:—भवः (worldly existence or God Shiva) and भावाः (things). According to **भाष्य** these two words are *formed by the termination* अ (अच्) *added to the root* भू 1st. conj and भू (भावि) 10th conj. respectively

21. The root ग्रह् takes अ (क) to express a house; as:— गृहम् (a house), गृहाः (a wife)

22 The roots नृत्, खन् and रञ्ज् take अक (ष्वुन्). Before this termination the nasal of रञ्ज् is dropped as.-नर्तकः, खनकः, रजकः. The feminine of these is formed by adding ई; as:—नर्तकी, खनकी, रजकी. The word रजिका is made up from the word रजक formed by the termination अक (क्वुन्).

---

19. **दुन्योरनुपसर्गे** ॥ दुनोतेर्नयतेश्चानुपसर्गे णप्रत्ययः स्यात् ।

20. (a) **विभाषा ग्रहः** ॥ ग्रहधातोर्णप्रत्ययो वा स्यात् । पक्षेऽच् । व्यवस्थितविभाषेयम् । तेन जलचरे ग्राहः । ज्योतिषि ग्रहः । (b) " **भवतेश्च** " इति **काशिका** ॥ भवो देवः संसारश्च । भावाः पदार्थाः । **भाष्यमते** तु प्राप्त्यर्थाच्चुरादिण्यन्तादच् ।

21. **गेहे कः** ॥ गेहे कर्तरि ग्रहेः कः स्यात् । गृण्हाति धान्यादिकमिति गृहम् । तात्स्थ्याद्गृहा दाराः ।

22. **शिल्पिनि ष्वुन्** ॥ क्रियाकौशलं शिल्पम् । तद्वति कर्तरि ष्वुन् स्यात् । **नृतिखनिरञ्जिभ्य एव** ॥ **अस्यकेने च रञ्जेर्नलोपो वाच्यः** ॥ रजः (by अस्) रजकः by [अक (ष्वुन्)] । रजनम् by [अन (ल्युट्)].

38. Roots ending in consonants take अ (घञ्) to express an instrument and place of action; as:-रामः (रमन्ते योगिनो-ऽस्मिन्निति); अपामार्गः (अपामृज्यतेऽनेन व्याध्यादिरिति); विमार्गः (विमृज्यतेऽनेनेति a broom).

39. The following words are formed by अ (घञ्).

अध्यायः=[अधि+इ+अ(घञ्)] अधीयतेऽस्मिन्निति a lesson or a lecture.
न्यायः =[नि+इ+अ(घञ्)] नीयतेऽनेनेति, a method or system.
उद्यावः =[उद्+यु+अ(घञ्)] उद्युवन्त्यस्मिन्निति, a mixing, joining or blending.
संहारः=[सम्+हृ+अ (घञ्)] संहरन्त्यनेनेति.
आधारः=[आ+धृ+अ (घञ्)] आध्रियतेऽस्मिन्निति, a support.
आवायः=[आ+वे+अ (घञ्)] आवयन्त्यस्मिन्निति.
अवहारः=[अव+हृ+अ (घञ्)] अवहरन्त्यस्मिन्निति.

40. The root अच् with उद् takes अ (घञ्) to express a leathern vessel for holding liquids other than water; as:—घृतोदङ्कः (घृतमुदच्यते-उद्ध्रियते-ऽस्मिन्निति) but उदकोदञ्चनः [(by अन (ल्युट्), a bucket)].

41. The root नी with आ takes अ (घञ्) to express a net; as:-आनायः (आनीयन्ते मत्स्यादयोऽनेनेति); otherwise आनयनः.

---

38. हलश्च ॥ पुंसि संज्ञायां करणाधिकरणयोश्चेति सर्वमनुवर्तते । हलन्ता-द्धातोः करणाधिकरणयोर्घञ्प्रत्ययः स्यात् । घस्यापवादः ।

39. अध्यायन्यायोद्यावसंहाराश्च ॥ अवहाराधारावाया-नामुपसंख्यानम् ॥ अध्यायादयः शब्दा घञन्ता निपात्यन्ते । पुंसि संज्ञायां घे प्राप्ते घञ् विधीयते । चकारोऽनुक्तसमुच्चयार्थः ।

40 उदङ्कोऽनुदके ॥ उत्पूर्वादञ्चतेर्घञ् स्यादनुदके ।

41 जालमानायः ॥ आनाय इति निपात्यते जालं चेत्तद्भवति आङ्पूर्वा-न्नयतेः करणे घञ् निपात्यते ।

42. The root खन् with आ takes अ (घ), अ (घञ्), अ (ड) र (टर्), इक and इकर (व) क; as:-आखनः, आखानः, आखः, आखरः, आखनिकः, आखनिकर (व) कः.

THE TERMINATION खल्.

43. Roots in composition with the words दुस् meaning 'difficulty,' ईषत्, and सु meaning 'ease' take अ (खल्) to express an abstract notion or an object; as:-दुष्करः कटो भवता (*your honour will find it difficult to make a mat*); ईषन्निमयः, दुष्प्रापः, ईषत्करः or सुकरः (to be prepared with ease).

44. The roots मी 9th conj. मि 5th conj. with नि, and ली do not change their final vowels to आ before the terminations खल् and अच्; as:—ईषन्निमयः, दुष्प्रमयः, सुविलयः, मयः, निमयः, लयः. The first three of these are formed by खल् and the rest by अच्.

45. The root लभ् with a preposition becomes लम्भ् before the terminations खल् and अच्, as:-ईषत्प्रलम्भः, दुष्प्रलम्भः, सुप्रलम्भः, उपालम्भः (*by* घञ्); *otherwise* ईषल्लभः, लभः.

---

42. **खनो घच** ॥ खनतेर्धातोः करणाधिकरणयोर्घः प्रत्ययः स्यात् । विकरणमन्यतोऽप्ययमिति ज्ञापनार्थम् । तेन भगः पद मित्यादि । **खनेर्डडरेकइकर (व) का वाच्याः** ॥

43. **ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्** ॥ करणाधिकरणयोरिति निवृत्तम् । एषु दुःखसुखार्थेषूपपदेषु खल् स्यात् । कृच्छ्रं दुःखम् । तद्दुरो विशेषणम् । अकृच्छ्रं सुखम् । तदितरयोर्विशेषणं संभवात् । ' **तयोरेव** ' इति भावे कर्मणि च । vide note cha XVI. 1 page 297.

44. **निमिमीलियां खलचोरात्वं नेति वाच्यम्** ॥

45. **उपसर्गात्खल्घञोः** ॥ उपसर्गादेव लभेर्नुम् स्यात् खल्घञोः परयोः ।

46. The root लभ् with सु or दुर्, not accompanied by any other preposition, does not become लुम्भ् before the terminations खल् or घञ्; as:—सुलभः, दुर्लभः; but सुप्रलम्भः अतिदुर्लम्भः. * In the words अतिसुलभ and अतिदुर्लभ, सु and अति are not prepositions but कर्मप्रवचनीय.

47. The roots भू and कृ along with words denoting the subject or object expressing the being or doing like, and preceded by ईषत्, दुर् and सु, take अ (खल्); as:—दुराढ्यंभवम्, स्वाढ्यंभवम्, ईषदाढ्यंकरः, दुराढ्यंकरः, स्वाढ्यंकरः; but आढ्येन सुभूयते.

48. Roots ending in आ take the termination अन (युच्) when the roots are compounded with ईषत्, सु or दुर्; as:—ईषत्पानः (सोमो भवता), दुष्पानः, सुपानः.

49. The roots शास्, युध्, दृश्, धृष्, मृष् take अन (युच्), when compounded with ईषत्, सु or दुर्; as:—दुःशासनः, दुर्योधनः, दुर्दर्शनः, दुर्धर्षणः, दुर्मर्षणः.

50. Roots take इन् (णिनि) to express necessity or debt; as:—अवश्यंकारी, शतंदायी.

---

46. **न सुदुर्भ्यां केवलाभ्याम्** ॥ उपसर्गान्तररहिताभ्यां सुदुर्भ्यां लभेर्नुम् न स्यात् खलघञोः परयोः । * कथं तर्हि 'अतिसुलभमतिदुर्लभमिति' यदा स्वती कर्मप्रवचनीयौ तदा भविष्यति ।

47. **कर्तृकर्मणोश्च भूकृञोः** ॥ कर्तृकर्मणोरीषदादिषु चोपपदेषु भूकृञोः खल् स्यात् । चकारः सन्नियोगार्थः । यदा कर्तृकर्मणोरीषदादीनां च युगपत्प्रयोगस्तत्रैव प्रत्ययः । यथासंख्यं नेष्यते । कर्तृकर्मणी च धातोरव्यवधानेन प्रयोज्ये । ईषदादयस्तु ततः प्राक् । **कर्तृकर्मणोश्च्यर्थयोरिति** वाच्यम् ।

48. **आतो युच्** ॥ ईषदादयोऽनुवर्तन्ते । कर्तृकर्मणोरिति नानुवर्तते । कृच्छ्राकृच्छ्रार्थेष्वीषदादिषूपपदेष्वाकारान्तेभ्यो धातुभ्यो युच् स्यात् । खलोऽपवादः ।

49. **भाषायां शासि युधि दृशि धृषि मृषिभ्यो युज्वाच्यः**॥

50. **आवश्यकाधमर्ण्ययोर्णिनिः** ॥ अवश्यंभाव आवश्यकम् । उपाधिरयं नोपपदम् अवश्यंभावविशिष्टे आधमर्ण्यविशिष्टे च कर्तरि वाच्ये धातोर्णिनिः स्यात् । अवश्यकारी । मयूरव्यंसकादित्वात्समासः ।

51. Roots take ति (क्तिच्) or त (क्त) to express a blessing. These terminations are weak, and roots do not take इ before them; as:—भूतिः (भवतात्), यन्तिः (यच्छतात्) *रन्तिः, तन्तिः, †सातिः, सतिः, सन्तिः, देवदत्तः (देवा एनं देयासुः).

52. The roots पू (पूङ्) and यज् take the termination आन (शानन्) denoting the agent of an action of the present tense. The roots take their conjugational sign before this termination; as:—पवमानः (सोमम्), यजमानः. The words thus formed govern the accusative.

53. Roots in general take the termination आन (चानश्) to express ताच्छील्य (disposition), वयोवचन (age), and शक्ति (ability). The roots take their conjugational sign before this termination also. The words thus formed govern the accusative; as:—भुज्–भुञ्जानः (भोगम्); भृ–बिभ्राणः (कवचम्); वहमानः (शिखण्डम्); हन् with नि–निघ्नानः (शत्रुम्). This termination is quite different from the termination आन (शानच्) of the Atmanepada present participles. Parasmaipadi roots, as well as Atmanepadi ones take this termination in the senses given above.

---

51. **क्तिच्क्तौ च संज्ञायाम्** ॥ धातोः क्तिच् क्तश्च स्यादाशिषि । समुदायेन चेत् संज्ञा गम्यते ।

* **न क्तिचि दीर्घश्च** ॥ अनिटां वनतितनोत्यादीनां च दीर्घानुनासिकलोपौ न स्तः क्तिचि परे । Anit roots and the roots वन्, तन्, and some other roots do not drop their nasal nor lengthen their penultimate short vowel before ति । (क्तिच्).

† **सनः क्तिचि लोपश्चास्यान्यतरस्याम्** ॥ सनोतेः क्तिच्यात्वं वा स्याल्लोपश्च वा । The root सन् changes its न् to आ and makes सातिः, it loses its न् optionally and forms सतिः and सन्तिः.

52. **पूङ्यजोः शानन्** ॥ पूङो यजेश्च धातोः शानन्प्रत्ययो भवति वर्तमाने ।

53. **ताच्छील्यवयोवचनशक्तिषु चानश्** ॥ ताच्छील्यम्—तत्स्वभावता । वयः–शरीरावस्था यौवनादिः । शक्तिः–सामर्थ्यम् । ताच्छील्यादिषु द्योत्येषु धातोः कर्तरि चानश् ।

CHAPTER XXI.

ÂTMANÊPADA-PRAKRIYÂ.

आत्मनेपदप्रक्रिया.

1. Roots that are given in the **धातुपाठ** as अनुदात्तेत् (with a mute अनुदात्त) and ङित् (with a mute ङ्) are Atmanepadi; as:— एध्-एधते, स्पर्ध्-स्पर्धते; आस् आस्ते; वस्-वस्ते; पूङ्-सूते; शीङ् शेते.

2. Roots in impersonal and passive forms are Atmanepadi, as —

ग्लै-ग्लायते (भवता);
स्वप्-सुप्यते (भवता);
आस् आस्यते (भवता);
*पच्-पच्यत ओदनेन.
*भिद्-भिद्यते काष्ठेन.

} Impersonal construction (भावे)

---

1. **अनुदात्तङित आत्मनेपदम्** ॥ अनुदात्तं च ङ् च तावितौ यस्येति विग्रहः । अनुदात्तेत उपदेशे यो ङितदन्ताच्च धातोर्लस्य स्थान आत्मनेपदं स्यात् । तत्र एधस्पर्धादयोऽनुदात्तेतः । पूङादयो ङितः ।

2. **भावकर्मणोः** ॥ भावे कर्मणि च विहितलकारस्य स्थान आत्मनेपदं स्यात् ।

* यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते स्वव्यापारे स्वतन्त्रत्वात् । कर्मणस्तुकर्तृत्वविवक्षायां प्राक्सकर्मका अपि प्रायेणाकर्मकास्तेभ्यो भावे कर्तरि च लकाराः ।

When extreme ease of the performance of an action is intended to be expressed without the direct mention of the subject, the object and other karakas, on account of their having absolute independent control over their movements, are used as subject of the action and in this case (when object is used as subject) the original transitive verbs become generally intransitive and such intransitive verbs take impersonal and active forms.

कृ-क्रियते (कटः); }
हृ-ह्रियते (भारः); } Passive construction (कर्मणि).

3. In the कर्मकर्तरि (reflexive passive form) the roots are Atmanepadi, and the subject (object in the active voice) is put in the nominative case; as:- पच्-पच्यते (ओदनः स्वयमेव); भिद्-भिद्यते (काष्ठं स्वयमेव); लू लूयते (केदारः स्वयमेव). See note on second rule above.

4. When an action fit to be performed by one man is done by another, the verb expressing the action takes the Atmanepadi form. The prepositions व्यति (वि+अति) are generally prefixed to verbs expressing such an action; as:- व्यतिलुनीते ब्राह्मणः (शूद्रस्य योग्यं लवनं करोति). The same happens when reciprocity of actions is implied, as:— संप्रहरन्ते राजानः, (kings fight with one another).

5. Verbs having the sense of going, killing, and the verbs हस् and others implying vocal actions do not take Atmanepada when an interchange of action is meant; as:- व्यतिगच्छन्ति, व्यतिघ्नन्ति, व्यतिहसन्ति, व्यतिजल्पन्ति, व्यतिपठन्ति.

---

3. **कर्मवत्कर्मणा तुल्यक्रियः** कर्मस्थया क्रियया तुल्यक्रियः । कर्ता कर्मवत्स्यात् । कार्यातिदेशोऽयम् । तेन यगात्मनेपदचिण्चिण्वदिटः स्युः । कर्तुरभिहितत्वात्प्रथमा ।

4. **कर्तरि कर्मव्यतिहारे** ॥ कर्मशब्दः क्रियावाची । व्यतिहारो विनिमयः । यद्यस्य न योग्यं तस्य तत्कर्मकरणं व्यतिहारः । क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात् । व्यतिलुनीते । शूद्रस्य योग्यं शस्यादिलवनं ब्राह्मणः करोतीत्यर्थः । परस्परकरणमपि व्यतिहारः । संप्रहरन्ते राजान इत्यादिप्रयोगात् ।

5. **न गतिहिंसार्थेभ्यः** ॥ पूर्वेणात्मनेपदं प्राप्तं प्रतिषिध्यते । गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः कर्मव्यतिहार आत्मनेपदं न स्यात् । **प्रतिषेधे हसादीनामुपसंख्यानम्** ॥ हसादयो हसप्रकाराः शब्दक्रियाः ।

15 The root नाथ् is Atmanepadi when it expresses 'a wish' as,- सर्पिषोनाथते (सर्पिर्मेस्यादित्याशास्त इत्यर्थ, he wishes that he should get ghee), but माणवकमनुनाथति (He solicits for माणवक).

16 The root हृ is Atmanepadi when it expresses a habit of constantly practising, as - पैतृकमश्वा अनुहरन्ते (पितुर्गत प्रकार सतत परिशीलयन्तीत्यर्थ, horses always imitate their progenitors), but *मातुरनुहरति (He imitates his mother, not constantly).

17 The root कॄ 6th conj with अप is Atmanepadi when it signifies 'scratching with joy', 'scratching for maintenance', or 'scratching for making an abode' †स् is prefixed to कॄ after अप when it means the scratching as described above, of a quadruped or of a bird, as - अपस्किरते वृष (हृष्ट) (a bull turns up the ground in joy), अपस्किरते कुक्कुट: (भक्ष्यार्थी) (a cock scratches the ground for food), अपस्किरते श्वा (आश्रयार्थी) (a dog digs a hole to lie in), but ‡ अपकिरति कुसुमम् (He scatters a flower), § गजोऽपकिरति धूलिम् .

---

15. **आशिषि नाथ इति वाच्यम्** ॥ अनुदात्तेत्त्वादेवसिद्धे नियमार्थमिदम् । अस्याशिष्येवात्मनेपद स्यात् । अनुदात्तेत्त्व तु '**अनुदात्तेतश्च हलादे:**' इति युच्प्रत्ययार्थम् । तेन नाथनमिति सिद्धम् । 'कथम्' नाथसे किमु पति न भू 'भृताम्' इति । नाधस इति पाठ्यम् ।

16. **हरतेर्गतताच्छील्ये** ॥ गत प्रकार ।

* मातुरनुहरतीत्यत्र सादृश्यमात्र विवक्षितम् । न तु प्रकारताच्छील्यम् ।

17. **किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम्** ॥ हर्षादयो विषया. । तत्र हर्षो विक्षेपस्य कारणम् । इतरे फले ।

† **अपाच्चतुष्पाच्छकुनिष्वालेखने** ॥ अपात्किरते सुट् स्यात् **सुडपिहर्षादिष्वेव वक्तव्य:** ।

‡ इह तद्सुडौ न । हर्षादिमात्रविवक्षाया यद्यपि तङ् प्राप्तस्तथापि सुटभावेऽस्मिन् इयात् ।

§ अत्र हर्षे सत्यप्यालेखनाभावान्न सुट् । नात्मनेपदमित्यर्थ ।

18 The roots ह्नु and प्रच्छ् both with आ are Atmanepadi, as —आह्नुते (शृगाल) 'a jackal howls', आपृच्छते गुरुम्, (He takes leave of his preceptor).

19 The root शप् is Atmanepadi in the sense of censuring though the fruit of the action does not accrue to the agent as.—कृष्णाय शपते.

20 The root स्था with सम्, अव, प्र or वि is Atmanepadi, as — संतिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते

21 The root स्था with आ is Atmanepadi in solemn assertions, as —शब्दं नित्यमातिष्ठते (नित्यत्वेन प्रतिजानीत इत्यर्थ, He solemnly declares that words are imperishable)

22 The root स्था is Atmanepadi in the sense of expressing one's animus (mind) and expressing the sense of abiding by the decision of an umpire, as — गोपी कृष्णाय तिष्ठते (स्वाशय प्रकाशयतीत्यर्थ, A गोपी discloses her mind to कृष्ण). संशय्य कर्णादिषु तिष्ठते य (He who abides by the decision of कर्ण and others in points of doubt).

---

18. आङि नुप्रच्छ्योरुपसंख्यानम् ॥

19 शप उपालम्भ इति वक्तव्यम् ॥ वाचाशरीरस्पर्शनमुपालम्भ । आक्रोशार्थात्स्वरितेत कर्तृगेऽपि फले शपथरूपेऽर्थआत्मनेपद वक्तव्यमित्यर्थ ।

20 समवप्रविभ्यः स्थः ॥ " सम्, अव, प्र, वि, " इत्येवपूर्वात्तिष्ठतेरात्मनेपद स्यात् ।

21. आङः प्रतिज्ञाया मुपसंख्यानम् ॥

22 प्रकाशनस्थेयाख्ययोश्च ॥ स्वाभिप्रायकथन प्रकाशनम् । स्थेयस्याख्यास्थेयाख्या । तिष्ठत्यस्मिन्निति स्थेय । विवादपदनिर्णेता लोके स्थेय इति प्रसिद्धस्तस्य प्रतिपत्त्यर्थमाख्याग्रहणम् । प्रकाशने स्थेयाख्याया च तिष्ठतेरात्मनेपद स्यात् ।

23. The root स्था with उद् is Atmanepadi when it is used in the figurative sense, that is, in the sense of trying; as:— मुक्तौ उत्तिष्ठते (He tries to obtain absolution) But पीठादुत्तिष्ठति (He gets up from his seat), ग्रामाच्छतमुत्तिष्ठति. (The village revenues amount to a hundred).

24. The root स्था with उप is Atmanepadi when it means to praise a deity with Mantras; as:— ऐन्द्र्या गार्हपत्यमुपतिष्ठते (He praises गार्हपत्य by repeating a ऋच् extolling इन्द्र). But भर्तारमुपतिष्ठति यौवनेन (She goes to the husband through youth.)

25 The root स्था with उप is Atmanepadi in the sense of worshipping a deity, in the sense of joining, forming friendship with, or direction of a road; as·— आदित्यमुपतिष्ठते (He worships the sun), गङ्गा यमुनामुपतिष्ठते (The Ganges flows into the Yamuna), रथिकानुपतिष्ठते (He forms friendship with the charioteers); अयं पन्थाः स्रुघ्नमुपतिष्ठते (this way leads to स्रुघ्न).

In the following verse, the king is supposed to be a deity and therefore Atmanepada is used. *स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे

---

23. उदोऽनूर्ध्वकर्मणि ॥ ऊर्ध्वदेशसंयोगानुकूलं यत्कर्म तदूर्ध्वकर्म । तदन्यदनूर्ध्वकर्म । तस्मिन्नित्यर्थः । कर्मशब्दः क्रियावाची । अनूर्ध्वताविशिष्टक्रियावचनात्तिष्ठतेरात्मनेपदं स्यात् । उद ईहायामिति वक्तव्यम् । इह माभूत् । अस्माद्ग्रामाच्छतमुत्तिष्ठति । शतमुत्पद्यत इत्यर्थः । ईहाग्रहणमनूर्ध्वकर्मण एव विशेषणं नापवादः ।

24. उपान्मन्त्रकरणे ॥ उपपूर्वात्तिष्ठतेर्मन्त्रकरणेऽर्थे वर्तमानादात्मनेपदं स्यात् ।

25. उपाद्देवपूजासंगतिकरणमित्रीकरणपथिष्विति वाच्यम् ॥ संगतिकरणमुपश्लेषः । मित्रीकरणं तु निनाप्युपश्लेषेण मैत्रीसंबन्धः ।

* देवतात्वारोपान्नृपस्य देवतात्वाद्वा ऽऽत्मनेपदम् । यत्र तु न देवतात्वारोपस्तत्र नात्मनेपदम् ।

सरस्वती; but when he is not supposed to be a deity, the root takes Parasmaipada; as:— उपतस्थुर्महात्मानं धर्मपुत्रं युधिष्ठिरम् ।

26. The root स्था with उप is optionally Atmanepadi in the sense of desire for getting a thing; as:-भिक्षुक प्रभुमुपतिष्ठते or उपतिष्ठति (लिप्सयोपगच्छतीत्यर्थः, A mendicant goes to a lord with a desire to get something).

27. The root स्था with उप is Atmanepadi when it is used intransitively; as:- भोजनकाले स उपतिष्ठते (सन्निहितो भवतीत्यर्थः. He stands ready at the time of dinner). But राजानमुपतिष्ठति (He waits upon the king) Here the root is transitive.

28. The root तप् with उद् or वि is Atmanepadi when it is used *intransitively* or when it has an object which is the part of the agent's own body; as —उत्तपते (आतपः)=दीप्यत इत्यर्थ. becomes hot; वितपते (सूर्यः)=becomes hot. Also उत्तपते or वितपते पाणिम्= He warms his hand. Otherwise सुवर्णकारः सुवर्णमुत्तपति (A goldsmith heats gold); सविता वितपति पृष्ठम् (The sun heats the back); चैत्रो मैत्रस्य पाणिमुत्तपति (सन्तापयतीत्यर्थः Chaitra heats the hand of Maitra).

29. The roots यम् and हन् both with आ are Atmanepadi

---

26. **वा लिप्सायामिति वक्तव्यम् ।**

27.--**अकर्मकाच** ॥ उपपूर्वात्तिष्ठतेरकर्मकक्रियावचनादात्मनेपदं स्यात् ।
वृद्धि क्षय भय जीवित मरण लज्जा सत्ता स्थिति जागरणम् ॥
शयन क्रीडा रुचि दीप्त्यर्थं धातुगणं तमकर्मकमाहुः ॥

28. **उद्विभ्यां तपः** ॥ 'उद्, वि,' इत्येवंपूर्वात्तपतेरकर्मकक्रियावचनादात्मनेपदं स्यात् । **स्वाङ्गकर्मकाचेति वक्तव्यम् ।**

29. **आङो यमहनः** ॥ 'यम उपरमे' 'हन हिंसागत्योः' इति परस्मैपदिनौ । ताभ्यामकर्मकक्रियावचनाभ्यां स्वाङ्गकर्मकाभ्यां चाङ्पूर्वाभ्यामात्मनेपदं स्यात् । कथं तर्हि " आजघ्ने विषमविलोचनस्य वक्षः " इति **भारविः** ।" आ-

to challenge, as:— कृष्णश्चाणूरमाह्वयते, (Krishna challenges Chanur to fight), but पिता पुत्रमाह्वयति.

35. The root कृ is Atmanepadı in the following senses:—

(1) गन्धने (The act of giving a hint to deprive life); as —उत्कुरुते (सूचयतीत्यर्थः, He hints at taking the life of a man).

(2) अवक्षेपणे (the act of reproving), as:—श्येनो वर्तिकामुदाकुरुते (भर्त्सयतीत्यर्थः, the hawk reproves a वर्तिका, a kind of bird).

(3) सेवने (waiting upon), as:—हरिमुपकुरुते (He waits upon Hari)

(4) साहसिक्ये (an outrage); as·—परदारान् प्रकुरुते (तेषु सहसा प्रवर्तत इत्यर्थः, He outrages another's wife).

(5) प्रतियत्ने (the act of giving a new property), as·—एधोदकस्योपस्कुरुते, * (तस्य सतो गुणान्तराधानंकरोतीत्यर्थ ; Fuel imparts heat to water).

---

35. **गन्धनावक्षेपण सेवन साहसिक्य प्रतियत्नप्रकथनोपयोगेषु कृञः** ॥ कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भ. । गन्धनादिष्वर्थेषु वर्तमानात्करोतेरात्मनेपदं स्यात् । गन्धनम्—अपकारप्रयुक्तं हिंसात्मकं सूचनम् । अवक्षेपणम्-भर्त्सनम् । सेवनम्—अनुवृत्ति । साहसिक्यम्—सहसा वर्तत इति साहसिकः । तस्य कर्म साहसिक्यम्—साहसिकं कर्म । प्रतियत्न —सतो गुणान्तराधानम् । प्रकथनम्—प्रकर्षेण कथनम् । उपयोगो—धर्मादिप्रयोजनो विनियोग. ।

* षष्ठीसुटौ करोते. प्रतियत्न एव विधीयेते । **उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च** ॥ उपात्कृञ सुट् स्यादेष्वर्थेषु भूषणे समवाये च । उपस्कृत भुङ्क्ते । विकृतमित्यर्थ । उपस्कृत ब्रूते—वाक्याध्याहारेण ब्रूतइत्यर्थः । उपस्कृता कन्या—अलङ्कृतेत्यर्थः । उपस्कृता ब्राह्मणाः— समुदिता इत्यर्थ. ।

(6) प्रकथने (the act of reciting) as —गाथा प्रकुरुते (प्रकर्षेण कथयतीत्यर्थ He recites stories)

(7) उपयोगे (the act of laying out), as —शत प्रकुरुते (धर्मार्थं शत विनियुङ्क्त इत्यर्थ He lays out a hundred in charity), but कट करोति

36 The root कृ with अधि is Atmanepadi in the sense of defeating or bearing with as -शत्रुमधिकुरुते (क्षमत इत्यर्थ, अभिभवतीति वा, He forgives or defeats an enemy) But शास्त्र मनुष्यानधिकरोति (scripture authorizes men)

37 The root कृ with वि is Atmanepadi when it has a sound for its object as —क्रोष्टा स्वरान् विकुरुते (A fox howls) But चित्त विकरोति काम (Love affects the mind)

38 The root कृ with वि is also Atmanepadi when used intransitively, as - छात्रा विकुर्वते (निष्फल चेष्टन्त इत्यर्थ Students strive without any object in view) विकुर्वते सैन्धवा (साधु दान्ता शोभन वल्गन्तीत्यर्थ Horses well trained neigh pleasantly)

39 The root नी is Atmanepadi in the following senses

(1) संमानने (honouring), as:—शास्त्रे नयते (शास्त्रस्थं सिद्धान्तं शिष्येभ्य * प्रापयतीत्यर्थः He instructs his pupils in sciences).

(2) उत्सञ्जने (उत्क्षेपणे lifting up); as:-दण्डमुन्नयते (उत्क्षिपतीत्यर्थ. He lifts up a stick).

(3) †आचार्यकरणे (initiating into the sacred rites); as:-माणवकमुपनयते (विधिनात्मसमीपं प्रापयतीत्यर्थः He initiates माणवक into the sacred rites).

(4) ज्ञाने (प्रमेयनिश्चये investigation, knowledge); as -तत्त्वं नयते (प्रमेयं निश्चिनोतीत्यर्थः He investigates the truth).

(5) भृतौ (वेतने employing on wages); as-कर्मकरानुपनयते (भृतिदानेन स्वसमीपं प्रापयतीत्यर्थ He employs labourers as hired servants).

(6) विगणने (ऋणादेर्निर्यातने, paying debts, taxes &c); as, करं विनयते (राज्ञे देयं भागं परिशोधयतीत्यर्थः He pays taxes to the king).

(7) व्यये (spending or applying to good use); as:-शतं विनयते (धर्मार्थं शतं विनियुङ्क्त इत्यर्थ, He spends a hundred in charity). But अजां नयति ग्रामम्.

40 The root नी with वि is Atmanepadi when the object is something other than the part of the body, but must

---

*तेन च शिष्यसम्माननं फलितम्। †आचार्यकरणमाचार्यक्रिया। माणवकमीदृशेन विधिनाऽऽत्मसमीपं प्रापयति यथा स उपनेता स्वयमाचार्यः सम्पद्यते। उपनयनपूर्वकेणाध्यापनेन ह्युपनेतर्याचार्यत्वं क्रियते।

40. कर्तृस्थे चाशरीरे कर्मणि ॥ नियः कर्तृस्थे कर्मणि—क्रियाफले यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्न एव स्यात्। सूत्रे शरीरशब्देन तदवयवो लक्ष्यते।

exist in the body; as:— क्रोधं* विनयते (He removes anger). But गण्डं विनयति (He turns away his cheek). In the example विगणय्य नयन्ति पौरुषम्, the speaker intends that the fruit of the action does not accrue to the agent.

41. The root क्रम् is Atmanepadi when it expresses (1) want of interruption or free scope वृत्तिः-अप्रतिबन्धः, (2) energy (सर्गः—उत्साहः), or (3) development (तायनम्-स्फीतता); as:—

(1) ऋचि क्रमते बुद्धिः (न प्रतिहन्यत इत्यर्थः He makes uninterrupted progress in ऋक्).

(2) अध्ययनाय क्रमते (उत्सहत इत्यर्थः); He shows energy for study.

(3) अस्मिन् शास्त्राणि क्रमन्ते (स्फीतानि भवन्तीत्यर्थः); the *shastras are developed in him.*

42. The root क्रम् is also Atmanepadi when preceded by उप or परा in the foregoing senses; as:— उपक्रमते, पराक्रमते. But संक्रामति, उपक्रामति, पराक्रामति.

When the root expresses these senses no other prepositions except these are allowed.

43. The root क्रम् with आ is Atmanepadi when it expresses

---

* क्रोधं विनयते—अपगमयति । तत्फलस्य चित्तप्रसादस्य कर्तृगत्वात् "**स्वरितञितः**" इत्येव सिद्धे नियमार्थमिदम् । कथं तर्हि "विगणय्य नयन्ति पौरुषम्" इति । कर्तृगामित्वाविवक्षायां भविष्यति ।

41. **वृत्तिसर्गतायनेषु क्रमः** ॥ शेषात्कर्तरि परस्मैपदे प्राप्ते वृत्त्यादिष्वर्थेषु क्रमेर्धातोरात्मनेपदं स्यात् ।

42. **उपपराभ्याम्** ॥ वृत्त्यादिष्वाभ्यामेव क्रमेरात्मनेपदं स्यान्नतूपसर्गान्तरपूर्वात् ।

43. **आङ उद्गमने** ॥ **ज्योतिरुद्गमन इति वाच्यम्** ॥ आङ्पूर्वात्क्रमतेर्ज्योतिरुद्गमने वर्तमानादात्मनेपदं स्यात् ।

the rising of a luminary body, as - आक्रमते सूर्यः (उदयत इत्यर्थः The sun rises) But आक्रामति धूमो हर्म्यतलम् (The smoke covers the terrace) आक्रामति धूमो हर्म्यतलात् (The smoke issues from the terrace)

44. The root क्रम् with वि is Atmanepadi when it expresses stepping, as.-साधु * विक्रमते वाजी (The horse has a good tread). But विक्रामति सन्धिः (द्विधा भवति-स्फुटतीत्यर्थ. The joint splits).

45. The root क्रम् preceded by प्र or उप is Atmanepadi when it expresses beginning, as -प्रक्रमते or उपक्रमते (He begins) But प्रक्रामति (गच्छतीत्यर्थः He goes); उपक्रामति (आगच्छतीत्यर्थ He comes).

46 The root क्रम् without any preposition is both Atmanepadi and Parasmaipadi when it does not express want of interruption, energy or development, as. —क्रमते or क्रामति.

47. The root ज्ञा with अप is Atmanepadi in the sense of concealing or denying, as — शतमपजानीते (अपलपतीत्यर्थः He denies a hundred)

---

44. **वेः पादविहरणे** ॥ विपूर्वात्क्रमते. पादविहरणेऽर्थे वर्तमानादात्मनेपद स्यात् । विहरण विक्षेप. ।

* अश्वादीना गतिविशेषो विक्रमणमुच्यते । यद्यपि क्रमि पादविहरण एव पठ्यते " **क्रमु पादविक्षेपे** " इति । तथाप्यनेकार्थत्वाद्धातूनामेतमुक्तम् ।

45. **प्रोपाभ्यां समर्थाभ्याम्** ॥ समर्थौ—तुल्यार्थौ । शक्त्वादित्वात्परूपम् । प्रारम्भेऽनयोस्तुल्यार्थता । प्र, उप, इत्येताभ्या प्रारम्भार्थाभ्या परस्मात्क्रमतेरात्मनेपद स्यात् ।

46. **अनुपसर्गाद्वा** ॥ क्रम इत्यनुवर्तते । अप्राप्तविभाषेयम् । उपसर्गवियुक्तात्क्रमतेरात्मनपद स्यात् । वृत्त्यादौ तु नित्यमेवात्मनेपदम् ।

47. **अपह्नवे ज्ञः** ॥ जानातेरपह्नवे वर्तमानादात्मनेपद स्यात् । अपह्नवः अपह्नुति—अपलाप. । सोपसर्गश्चायमपह्नवे वर्तते । न केवल. ।

48 ज्ञा is Atmanepadi when used intransitively, as — सर्पिषो जानीते (सर्पिषोपायेन प्रवर्तत इत्यर्थ Having obtained ghee, he proceeds to perform a sacrifice with it), but स्वरेण पुत्र जानाति (He recognizes his son by his voice)

49 The root ज्ञा with सम् or प्रति is Atmanepadi, when it is used *transitively* and does *not* express remembering with tenderness, as —शत सजानीते (अवेक्षत इत्यर्थ He looks for a hundred), शत प्रतिजानीते (अङ्गीकरोतीत्यर्थ He promises a hundred) But मातर * मातुर्वा सजानाति (उत्कण्ठत इत्यर्थ He remembers his mother with tenderness)

50 The root वद् is Atmanepadi in the following senses —

(1) भासने (दीप्तौ, showing brilliancy or proficiency in), as —शास्त्रे वदते (भासमानो ब्रवीतीत्यर्थ He shows brilliancy in a science)

(2) उपसभाषायाम् (उपसान्त्वने, pacifying), as —भृत्यानुपवदते (सान्त्वयतीत्यर्थ He pacifies his servants)

---

48 **अकर्मकाच्च ॥** अकर्मभिप्रायार्थमिदम् । कर्त्रभिप्राये ह्यनुपसर्गाज्ज्ञ इति वक्ष्यति । जानातेरकर्मकक्रियावचनादात्मनेपद स्यात् । कथ चायमकर्मक । नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितम् । किं तर्हि ज्ञानपूर्विकाया प्रवृत्तौ करणत्वेन । तथा च " **ज्ञोऽविदर्थस्यकरणे** " इति षष्ठी विधीयते ।

49 **संप्रतिभ्यामनाध्याने ॥** ज्ञ इत्यनुवर्तते । सकर्मकार्थमिदम् । 'सम्, प्रति' इत्येवपूर्वाज्जानातेरनाध्याने वर्तमानादात्मनेपद स्यात् । आध्यानमुत्कण्ठापूर्वक स्मरणम् । '**अनाध्याने**' इति योगो विभज्यते । तत्सामर्थ्यात् '**अकर्मकाच्च**' इति प्राप्तिरपि वार्यते ।

* कर्मण शेषत्वविवक्षाया षष्ठी ।

50 **भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥** शेषात्कर्तरि परस्मैपदे प्राप्ते भासनादिषु विशेषणेषु सत्सु वदतेरात्मनेपद स्यात् उपसभाषोपमन्त्रणे धात्वर्थौ । इतरे प्रयोगोपाधय ।

In this sense the root is generally preceded by उप.

(3) ज्ञाने (सम्यगवबोधे perfect knowledge); as:—शास्त्रे वदते (वदितुं जानातीत्यर्थः He knows how to explain a science).

(4) यत्ने (उत्साहे energy); as:—क्षेत्रे वदते (तद्विषयमुत्साहमाविष्करोतीत्यर्थः He toils in the field).

(5) विमतौ (नानामतौ dispute or quarrel). शास्त्राणि परस्परं विवदन्ते (Scriptures differ from one another).

(6) उपनिमन्त्रणे (रहस्युपच्छन्दने requesting), as.—कुलभार्यामुपवदते (रहस्युपच्छन्दयतीत्यर्थः. He requests a lady).

51. The root वद् with सम् and प्र is Atmanepadi when it is used to express a loud and conjoint speech of men; as:— संप्रवदन्ते ब्राह्मणाः (Brahmins are speaking loudly together). But संप्रवदन्ति खगाः (Birds make sound)

52 The root वद् with अनु is Atmanepadi when it is used transitively in the above mentioned sense; as:—अनुवदते कठः *कलापस्य (यथाकलापोऽधीयानो वदति तथा कठ इत्यर्थः Katha, while studying recites like Kalapa) But उक्तमनुवदति (He reproduces what is said); here the root is transitive अनुवदति वीणा (The lute resounds); here the sound is not distinct.

53. The root वद् with वि and प्र is Atmanepadi optionally

---

51. **व्यक्तवाचां समुच्चारणे** ॥ वद इत्यनुवर्तते । मनुष्यादीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात्। ननु 'वदव्यक्तायांवाचि' इत्येव पठ्यते। तत्र किं व्यक्तवाचामितिविशेषणेन । प्रसिद्ध्युपसंग्रहार्थमेतत् । व्यक्तवाच इति हि मनुष्याः प्रसिद्धाः । तेषां समुच्चारणे यथा स्यात् ।

52. **अनोरकर्मकात्**॥व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात्। *अनुः सादृश्ये । तेन कलापस्येति तुल्यार्थयोगेऽपि शेषत्वविवक्षायां षष्ठी ।

53. **विभाषा विप्रलापे** ॥ विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे वर्तमानाद्वदेरात्मनेपदं वा स्यात् । प्राप्तविभाषेयम् ।

in the sense of disputing; as:— विप्रवदन्ति-न्ते वैद्याः (युगपत्परस्परप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः Doctors are at variance). But संप्रवदन्ते ब्राह्मणाः (The Brahmins talk conjointly); विप्रवदन्ति शकुनयः (Birds make noise indistinctly); क्रमेण वैद्या वैद्येन सह विप्रवदन्ति (Doctors discuss with a doctor in turns).

54. The root गॄ 6th. conj. with अव is Atmanepadi; as:— अवगिरते ग्रासम् (He swallows a mouthful).

55. गॄ with सम् is Atmanepadi when it expresses acceptance; as:— शब्दं नित्यं संगिरते (He maintains that words are constant). But संगिरति ग्रासम् (He swallows a mouthful).

56. The root चर् with उद् is Atmanepadi when it is used transitively; as:-धर्ममुच्चरते (उल्लङ्घ्य गच्छतीत्यर्थः He transgresses duty). But बाष्पमुच्चरति (उपरिष्टाद्गच्छतीत्यर्थः Vapour goes up).

57. The root चर् with सम् along with a word in the instrumental case is Atmanepadi. as:— रथेन संचरते (He goes in a chariot). अश्वेन संचरते. Other prepositions may come between सम् and the root, as.— रथेन समुदाचरते. But इमं लोकं संचरति (He wanders over this world).

58 The root दा 1st conj 'to give' with सम् is Atmanepadi

---

54. **अवाद्ग्रः** ॥ अवपूर्वाद्गिरतेरात्मनेपदं स्यात् । गृणातिस्त्ववपूर्वो न प्रयुज्यत एवेति **भाष्यम्** ।

55. **समः प्रतिज्ञाने** ॥ प्रतिज्ञानमभ्युपगमः । संपूर्वाद्गिरतेरात्मनेपदं स्यात् प्रतिज्ञाने ।

56. **उदश्चरः सकर्मकात्** ॥ उत्पूर्वाच्चरतेः सकर्मकक्रियावचनादात्मनेपदं स्यात् ।

57. **समस्तृतीयायुक्तात्** ॥ संपूर्वाच्चरतेस्तृतीयायुक्तादात्मनेपदं स्यात् । तृतीयेति तृतीयाविभक्तिर्गृह्यते । तया चरतेर्यद्वारको योगः । सम इति विशेषणे षष्ठी नतु पञ्चमी । तेनेदं सूत्रं व्यवहितेऽपि प्रवर्तते ।

58. **दाणश्च सा चेच्चतुर्थ्यर्थे** ॥ संपूर्वाद्दाणस्तृतीयान्तेन युक्तादात्मनेपदं स्यात्तृतीया चेच्चतुर्थ्यर्थे ।

65 The root भुज् 7th conj is Atmanepadi when it means other than protection, as — ओदनं भुङ्क्ते (He eats food). But महीं भुनक्ति (He protects the earth). In the examples like बुभुजे पृथिवीपालः पृथिवीमेव केवलम्, or वृद्धो जनो दुःखशतानि भुङ्क्ते, भुज् has the sense of experience.

66 The roots which are given in the धातुपाठ with a mute स्वरित and mute ञ् are Atmanepadi, when the fruit of the action accrues to the agent, as- यजते, पचते, सुनुते, कुरुते *स्वामिदासौ पचेते

---

65 भुजोऽनवने ॥ ['भुज' पालनाभ्यवहारयोः] इति रुधादौ पठ्यते । तस्मादनवनेऽपालने वर्तमानादात्मनेपदं स्यात् । अनवनप्रतिषेधेन रौधादिकस्यैव ग्रहणं विज्ञायते । न तौदादिकस्य 'भुजोकौटिल्ये' इत्यस्य । तेनेह न 'निभुजति पाणिम्' । अदन इति वक्तव्ये ऽनवन इति पर्युदासग्रहणादवनभिन्नउपभोगादानेऽप्यात्मनेपदविधानार्थमिदम् ।

66 स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥ स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले । क्रियाफलं च क्रियाजन्यमुख्योद्देश्यभूतं फलं तृप्तिस्वर्गादि । न तु धात्वर्थमात्रम् । नापि दक्षिणावेतनादिलाभरूपम् । यथोक्तं हरिणा ॥ "यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ॥ तत्प्रधानं फलं तासां न लाभादिप्रयोजनम् ॥" इति । अर्थ्यत इत्यर्थः । प्रयोजनापरपर्यायं फलम् । तस्येत्यर्थः पचादयः फलावच्छिन्नव्यापाररूपा पचाप्रभृतिक्रिया । तासां पचाप्रभृतिक्रियाणां फलं स्वेच्छयानादिलाभप्रयोजकम् । तेन याजकपाचकादानां दक्षिणावेतनादिलाभरूपप्रयोजनसत्त्वेऽपि तदर्थक्रियावृत्तेर्धातोर्न प्रसङ्गः ।

* 'स्वामिदासौ पचेते' इत्यादौ स्वामिधर्मस्य दासे आरोपादात्मनेपदम् । दासधर्मस्य तु न स्वाम्यारोपः । उत्तमे निकृष्टधर्मारोपस्य प्रयोजनं विना स्वरसतोऽप्रतीतेरिति न कदाचित्तत्र परस्मैपदम् ।

In such cases, as स्वामिदासौ पचेते, the Atmanepadi is used because, the servant is made to form an appendage to the master To conceive the master to form an appendage to the servant, without any special reason, is revolting to the mind

(The master and his servant cook) But यजन्ति याजकाः, पचन्ति पाचकाः, कुर्वन्ति कर्मकराः. Here the fruit means the principal fruit for which the action is undertaken. In the examples यजन्ति याजकाः &c. though the fruit (दक्षिणा wages &c.) accrues to the doer, it is not the principal fruit.

67. The root वद् with अप is Atmanepadi when the fruit of the action accrues to the agent, as— धनकामो न्यायमपवदते (न्यायापवादेन धनमर्जयिष्यामीति मन्यते, (one who desires wealth thinks of acquiring it by the abuse of justice). But अपवदति.

68. The causal forms of roots take the Atmanepada when the fruit of the action accrues to the agent; as— कारयते (कटम्), पाचयते (ओदनम्), but कारयति (कटं परस्य).

69. The root यम् with सम्, उद् or आ is Atmanepadi, when the object is not a literary work, or when the fruit of the action accrues to the agent; as — व्रीहीन् संयच्छते (He gathers rice); भारमुद्यच्छते (He lifts up a load); वस्त्रमायच्छते (He spreads the cloth). But उद्यच्छति वेदम् (अधिगन्तुमुद्यमं करोतीत्यर्थः He tries to learn the Vedas).

---

67. **अपाद्वदः॥** कर्त्रभिप्राय इत्यनुवर्तते । अपपूर्वाद्वदतेः कर्त्रभिप्राये क्रियाफल आत्मनेपदं स्यात् ।

68. **णिचश्च ॥** णिजन्तादात्मनेपदं स्यात्कर्त्रभिप्राये क्रियाफले ।

69. **समुदाङ्भ्यो यमोऽग्रन्थे ।** अग्रन्थ इतिच्छेदः । 'सम्, उद्, आङ्, इत्येवंपूर्वाद्यमेः कर्तृगामिनि क्रियाफल आत्मनेपदं स्याद्ग्रन्थविषयश्चेत्प्रयोगो न भवति । आङ्पूर्वादकर्मकात् " आङो यमहनः " इति सिद्धमेवात्मनेपदम् । सकर्मकार्थमिदं पुनर्ग्रहणम् ।

70 The root ज्ञा without any preposition is Atmanepadi when the fruit of the action accrues to the agent; as- गां जानीते, but स्वर्गं लोकं न प्रजानाति मूढः A fool does not know the next world); देवदत्तस्य गां जानाति. In the verse "इत्थं नृप पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य" from Bhatti, the form अनुजज्ञे is the passive perfect of ज्ञा with अनु.

71. The Atmanepadi forms sanctioned by the foregoing five rules are optionally used, when the words in the text denote that the fruit of the action accrues to the agent; as - स्वं यज्ञं यजति यजते वा (He offers his own sacrifice).

स्वं कटं करोति कुरुते वा (He makes his own mat.).

स्वं पुत्रमपवदति अपवदते वा (He reproaches his own son)

स्वं यज्ञं कारयति कारयते वा (He causes his own sacrifice to be performed).

स्वान्व्रीहीन् संयच्छति संयच्छते वा (He gathers his own rice).

स्वां गां जानाति जानीते वा (He recognizes his own cow).

72 The Causal of गम् with आ takes Atmanepada in the sense of having patience, as - आगमयस्व तावत् (मात्वरिष्ठा इत्यर्थः ; Come at your leisure, do not make haste).

70- अनुपसर्गाज्ज्ञः ॥ 'अकर्मकाच्च' इत्येव सिद्धे सकर्मकार्थमारम्भः । अनुपसर्गाज्जानातेः कर्तृगामिनि क्रियाफले आत्मनेपदं स्यात् । कथं तर्हि भट्टिः "इत्थं नृप पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य" इति । कर्मणि लिट् । नृपेणेति विभक्तिविपरिणामः ।

71 विभाषोपपदेन प्रतीयमाने ॥ स्वरितञितः इत्यादिपञ्चसूत्र्या यदात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात् । समीपे श्रूयमाणं शब्दान्तरमुपपदम् । स्वं यज्ञं यजति यजते वा । स्वमित्युपलक्षणम् । स्वार्थमात्मार्थं यज्ञं यजति यजते इत्याद्यपि ग्राह्यम् ।

72- आगमेः क्षमायामात्मनेपदं वक्तव्यम् ॥ ण्यन्तस्येदं ग्रहणम् । क्षमा-उपेक्षा-कालहरणमिति यावत् ।

73. Causal forms of transitive roots take the Atmanepada terminations, when the verbs are used reflexively, or when the object in the primitive sense becomes the agent in the Causal, except in the sense of remembering with tenderness; as —दर्शयते भवः (भव shows himself), आरोहयते हस्ती (न्यग्भवतीत्यर्थ. The elephant bends down), स्मारयति वनगुल्मः (उत्कण्ठापूर्वस्मृतौ विषयो भवतीत्यर्थ A wild thicket fills (his) mind with tender remembrance of itself)

74 The roots भी and स्मि in the Causal form take the Atmanepada, when the agent of the Causal verb is the cause of fear or surprise, as —मुण्डो भापयते or मुण्डो भीषयते (A man with a shaved head inspires fear). जटिलो विस्मापयते (A man with matted hair astonishes) But कुञ्चिकयैनं भाययति (He frightens him with a कुञ्चिका). रूपेण विस्माययति (He astonishes by his beauty) Vide Chap VIII Sect 1 26 (b).

75 The Causal of गृध् and वञ्च् is Atmanepadi, when the Causal base implies deceiving as —माणवकं वञ्चयते (He deceives माणवक). But श्वानं गर्द्धयति (अभिकाङ्क्षां जनयतीत्यर्थ He creates a desire in a dog to get something) अहिं वञ्चयति (वर्जयतीत्यर्थ *He avoids a serpent*).

---

73 **णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने** ॥ ण्यन्तादात्मनेपदं स्यादणौ या क्रिया सैव चेण्ण्यन्तेनोच्यते ऽणौ यत्कर्मकारकं स चेण्णौ कर्ता स्यादनाध्याने। '**णिचश्च**' इति सिद्धे कर्त्रभिप्रायार्थमिदम्। कर्त्रभिप्राये तु '**विभाषोपपदेन**' इति विकल्पे '**अणावकर्मकात्**' इति परस्मैपदे च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवेष्यते।

74. **भीस्म्योर्हेतुभये** ॥ णेरित्यनुवर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। बिभेतेः स्मयतेश्च ण्यन्तादात्मनेपदं स्याद्धेतुश्चेद्भयस्मययोः। सूत्रे भयग्रहणं, स्मयस्यो, पलक्षणम्।

75. **गृधिवञ्च्योः प्रलम्भने** ॥ णेरित्यनुवर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। '**गृधु**' अभिकाङ्क्षायाम्। '**वञ्चु**' गतौ। अनयोर्ण्यन्तयोः प्रलम्भने वर्तमानयोरात्मनेपदं स्यात्। प्रलम्भनम् विप्रलम्भनम् मिथ्याफलाख्यानम् प्रतारणमित्यर्थः।

76 The Causal of ली 4th and 8th Conj is Atmanepadi in the sense of worshipping, defeating or deceiving, as — जटाभिर्लापयते (पूजा समधिगच्छतीत्यर्थ He commands respect by his matted hair), श्येनो वर्तिकामुल्लापयते (न्यक्करोति-अभिभवतीत्यर्थ A hawk overcomes a वर्तिका, a kind of bird) बालमुल्लापयते (विसंवादयति-वञ्चयतीत्यर्थ He deceives a child) Vide Chapter VIII Sec 1,24 (b)

77 The Causal of कृ is Atmanepadi, when the word मिथ्या is in composition with it and when the action is done repeatedly as -पद मिथ्या कारयते (सापचार स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थ He frequently mispronounces a word) But पद सुष्ठु कारयति (He pronounces a word correctly) पद मिथ्या कारयति (सकृदुच्चारयतीत्यर्थ He mispronounces a word only once)

78 शिक्ष्, the Desiderative base of शक्, is Atmanepadi in the sense of having the curiosity to learn, as — शिक्षते (धनुषि) (धनुर्विषये ज्ञाने शक्तोभवितुमिच्छतीत्यर्थ He wishes to get proficiency in archery)

79 The Desiderative form of a root is Atmanepadi in the circumstances under which the primitive is, as — एध् एदिधिषते, शी शिशयिषते, विश् with नि निविविक्षते, क्रम् with आ आ

---

76 लियः संमाननशालीनीकरणयोश्च॥ लाङ्लियोर्ण्यन्तयोरात्मनेपदं स्यादकर्त्रगेऽपि फले पूजाभिभवयोः प्रलम्भने चार्थे। समाननम्—पूजनम्। शालीनीकरणम्—न्यग्भावनम्।

77. मिथ्योपपदात्कृञोऽभ्यासे ॥ णेरित्यनुवर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भ। ण्यन्तात्करोतेर्मिथ्योपपदादात्मनेपदं स्यादभ्यासे। अभ्यास -पुनःपुनः करणम्—आवृत्ति।

78 शिक्षेर्जिज्ञासायाम् ॥ अत्र 'शिक्षविद्योपादाने' इत्यस्य न ग्रहणम्। तस्यानुदात्तत्वादात्मनेपदसिद्धेः। किं तु शक सन्नन्तस्य।

79. पूर्ववत्सनः ॥ सनः पूर्वो यो धातुरात्मनेपदी तद्वत् सन्नन्तादात्मनेपदं स्यात्। येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते तेनैव सन्नन्तादपि भवति।

चिकत्सते, भू बुभूषति, § शद्-शिशत्सति, मृ मुमूर्षति.

The last two roots in the Desiderative form do not take Atmanepada, though they are Atmanepadi in the primitive

80 The Desiderative base of the roots ज्ञा, श्रु, स्मृ and दृश् is Atmanepadi, as – जिज्ञासते (धर्मम्) He wishes to know धर्म, शुश्रूषते (गुरुम्) He wishes to hear from (serve) a preceptor, सुस्मूर्षते (नष्टम्) He recollects lost things, दिदृक्षते (नृपम्) He wishes to see the king Vide chap IX 82-85, page 178

81 The Desiderative form of ज्ञा with अनु does not take Atmanepada, as – पुत्रमनुजिज्ञासति (पुत्रमनुज्ञातुमिच्छति He wishes to give permission to his son) Vide chap IX, 82, page 178. But *सर्पिषोऽनुजिज्ञासते (सर्पिषा प्रवर्तितुमिच्छतीत्यर्थ He wishes to proceed with ghee)

82 The Desiderative base of श्रु with प्रति or आ does not take Atmanepada, as –प्रतिशुश्रूषति, आशुश्रूषति, but देवदत्त † प्रतिशुश्रूषते (He serves देवदत्त) Here प्रति is not a preposition, but a कर्मप्रवचनीय (a preposition used by itself) Vide Chap IX 83 †page 179

---

§ शदेरित्यादिसूत्रद्वये सनोनेत्यनुवर्त्य वाक्यभेदेन व्याख्येयम् ।

80 **ज्ञाश्रुस्मृदृशां सनः** ॥ 'ज्ञा, श्रु, स्मृ, दृश, ' इत्येतेषा सन्नन्तानामात्मनेपद स्यात ।

81· **नानोर्ज्ञः**॥ पूर्वेण योगेन प्राप्तमात्मनेपद प्रतिषिध्यते । अनुपूर्वाज्जानाते सन्नन्तादात्मनेपद न स्यात् । तथा च सति सकर्मकस्यैवाय प्रतिषेध ।

* '**पूर्ववत्सनः**' इति तङ् । '**अकर्मकाच्च**' इति केवलाद्विधानात्।

82 **प्रत्याङ्भ्यां श्रुवः** ॥ प्रति, आङ्' इत्येवपूर्वाच्छृणोते सन्नन्तादात्मनेपद न स्यात् ।

† उपसर्गग्रहण चेदम् । तस्मादिह प्रतिषधो न भवति । प्रते कर्मप्रवचनीयत्व तु ।

(causes the lotus to bloom) योधयन्ति (काष्ठानि) (causes sticks to fight), नाशयति (दुःखम्) (destroys pain), जनयति (सुखम्) (begets pleasure), अध्यापयति (वेदम्) (teaches Vedas), प्रावयति (प्रापयतीत्यर्थः brings), द्रावयति (विलापयतीत्यर्थः melts), स्रावयति (स्यन्दयतीत्यर्थः causes to flow).

11 Roots expressing eating and moving, take Parasmaipada in the Causal As – गॄ with नि–निगारयति (makes one swallow), अश् आशयति (feeds), भुज् to eat भोजयति (feeds), चल्–चलयति (moves), चुप्–चोपयति (moves), कम्प्–कम्पयति (shakes).

12 The Causal of अद् is Parasmaipadi, when the fruit of the action does not accrue to the agent As आदयत्यन्नं बटुना (he causes the boy to eat his food) But it is Atmanepadi, when the fruit accrues to the agent As –आदयते देवदत्तेन (It is caused to be eaten by Devadatta)

13 The Causal of intransitive roots, having sentient beings for their agents take Parasmaipada As शेते कृष्णः कृष्णं गोपी शाययति (the गोपी lulls Krishna to sleep) आस्ते देवदत्तः – देवदत्तमासयति (makes Devdatta sit), But शुष्यन्ति व्रीहयः –शोषयते व्रीहीनातपः (the sun dries up corn) Here the subject, आतप the sun, of the verb, शोषयते being not a sentient being, the verb is Atmanepadi

---

11. **निगरणचलनार्थेभ्यश्च** ॥ णेरिति वर्तते । कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवाद परस्मैपद विधीयते । निगरणम्–अभ्यवहारः । चलनम्–कम्पनम् । निगरणार्थेभ्यश्चलनार्थेभ्यश्च धातुभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात् । अयमपि योगः सकर्मकार्थः । अचित्तवत्कर्तृकार्थश्च ।

12 **अदेः प्रतिषेधः** ॥ ' **निगरणचलनार्थेभ्यश्च** ' इति सूत्रेण प्राप्तस्यायं निषेधः । अकर्त्रभिप्राये क्रियाफले शेषादिति परस्मैपदं स्यादेव ।

13 **अणावकर्मकाच्चित्तवत्कर्तृकात्** ॥ णेरिति वर्तते । कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते । अण्यन्तो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च तस्माण्ण्यन्तात्परस्मैपदं स्यात् ।

14. The Causals of पा 'to drink,' दम् 'to restrain,' यम् with आ 'to draw in,' यस् with आ 'to try,' मुह् with परि 'to faint,' रुच् 'to shine or like,' नृत् 'to dance,' वद् 'to speak,' वस् 'to dwell,' and धे 'to suck,' do not take Parasmaipada, when the fruit of the action accrues to the agent. As:- पाययते, दमयते, आयामयते, आयासयते, परिमोहयते, रोचयते, नर्तयते, वादयते, वासयते, धापयेते शिशुमेकं *समीची (two good nurses suckle one child).

The Causals of these roots take Parasmaipada, when the fruit of the action does not accrue to the agent. As -- वत्सान् पाययति पयः; दमयन्ती कमनीयतामदम् (checking the pride of beauty); भिक्षा वासयति (alms make one dwell).

15. The Denominatives formed by §य (क्यष्) take either pada As:- लोहितायति ते (he becomes red); पटपटायते (he makes the sound Pat, Pat).

16. The roots द्युत् and others, all Atmanepadi, take either pada in the Aorist. As.- अद्युतत् or अद्योतिष्ट, अलुठत् or अलोठिष्ट.

---

14. नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ पूर्वेण योगद्वयेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवाद परस्मैपद विहितम् । तस्यप्रतिषेधोऽयमुच्यते । यत्कर्त्रभिप्रायविषयमात्मनेपद तदवस्थितमेव न प्रतिषिध्यते । एभ्यो ण्यन्तेभ्यः परस्मैपद न स्यात् । ' णिचश्च ' इत्यात्मनेपदं भवति । तत्रपिबतिर्निगरणार्थः । इतरे चित्तव कर्तृकाऽकर्मकाः । नृतिश्चलनार्थोऽपि । पादिषु धेट उपसंख्यानम् ।

* समीची इति प्रथमाद्विवचनम् ।

15. वा क्यषः । क्यषन्तात्परस्मैपदं वा स्यात् ।

§ लोहितादिडाज्भ्यः क्यष् । लोहितादिभ्यो डाजन्तेभ्यश्च भवत्यर्थे क्यष् स्यात् । लोहित, नील, हरित, पीत, मद्र, फेन, मन्द, लोहितादिराकृतिगणः ।

16. द्युभ्द्यो लुङि । वेत्येव । ' द्युतदीप्तौ ' तस्मादारभ्यार्लुठादयोऽपि कृपूपर्यन्तास्तथैव व्यपदिश्यन्ते । अनुदात्तेत्वान्नित्यमात्मनेपदे प्राप्ते द्युतादिभ्यो लुङः परस्मैपदं वा स्यात् । पुषादीति सूत्रेण परस्मैपदेऽङ् । Vide chap. IV. sect. II no III. page 94.

*सृजेः श्रद्धावति दयंस्तु यथा मालां हि सृज्यते ॥ १७ ॥
ग्रीवास्समेः प्रतिज्ञाने चरेरुदि सकर्मकात् ॥
समस्तृतीयायुक्तात्स्वीकारेण तृपयच्छते ॥ १८ ॥
तृतीया चेच्चतुर्थ्यर्थे दाणः शिति ग्रदेर्मृडेः ॥
लिङ्लुङोश्च कृत्रेः प्रागवदामो यस्तु प्रयुज्यते ॥ १९ ॥
सनः श्रुस्मृदृशिज्ञाभ्यो नानोज्ञो नाङ्प्रतेः श्रुवः ॥
अयज्ञपात्रेषु यमेरजायन्तोपभर्गतः ॥ २० ॥
सपः क्ष्णोनेरनेवने भुनक्तरथ णेरणौ ॥
यत्कर्म णौ स कर्ता चेद्वेदाध्यानवर्जिते ॥ २१ ॥
यथाऽऽरोहयते हस्ती स्वयं दर्शयते नृपः ॥
भीस्म्योः प्रयोजकाद्भीतिस्मययोर्वञ्चनेतगृधेः ॥ २२ ॥
प्रलम्भने लियः पूजान्यकृयोर्वञ्चनेऽपि च ॥
मिथ्याशब्दोपपदत. पौन पुन्ये कृञो णिचः ॥ २३ ॥
फले च कर्त्रभिप्राये स्वरितेतो ञितो णिचः ॥
पचते कुरुते ब्रूते घट कारयते तथा ॥ २४ ॥
अपाद्वदः समोऽड्द्यो यमेरग्रन्थगोचरे ॥
इश्चोपसर्गरहिताच्छब्दोन्तरगतौ तु वा ॥ २५ ॥
